# MudgalapurAna Khanda 3 Mahodaracharitam

# મુદ્ગલપુરાણં ખણ્ડઃ ૩ મહોદરચરિતમ્

## Document Information

Text title : Mudgala Purana Khanda 3 Mahodaracharitam

File name : mudgalapurANam3.itx

Category : purana, ganesha

Location : doc_purana

Proofread by : Yash Khasbage

Latest update : September 18-19, 2023 Ganeshachaturthi

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 18, 2023

*sanskritdocuments.org*

MudgalapurAna Khanda 3 Mahodaracharitam

# મુદ્ગલપુરાણં ખણ્ડઃ ૩ મહોદરચરિતમ્

॥ મુદ્ગલપુરાણં ખણ્ડઃ ૩ ॥

॥ અથ શ્રીમુદ્ગલપુરાણે તૃતીયઃ ખણ્ડઃ પ્રારભ્યતે ॥

(Page ખં. ૩ અ. ૧ પાન ૧)

## ૩.૧ રવિવાલખિલ્યપ્રશ્નવર્ણનં નામ પ્રથમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શૌનક ઉવાચ ।
સૂત સર્વાર્થતત્ત્વજ્ઞ તારિતોઽહં ત્વયા દ્વિજ ।
ગણેશચરિતં પુણ્યં શ્રાવિતં પરમાદ્ભુતમ્ ॥ ૧॥

એકદન્તસ્ય માહાત્મ્યં શ્રુતં ત્વત્તો દ્વિજોત્તમ ।
યથા નરઃ સુધાપાનાત્ ન તૃપ્તોઽહં તથાઽભવમ્ ॥ ૨॥

મહોદરસ્ય માહાત્મ્યમધુના વદ વિસ્તરાત્ ।
કીદૃશોઽયં ગણેશસ્તુ કતિ તસ્યાવતારકાઃ ॥ ૩॥

કુરુક્ષેત્રં મહત્તસ્ય કસ્માદ્ભૂમૌ સમાગતઃ ।
ઇત્યાદિ સર્વમત્યન્તં માહાત્મ્યં વદ તસ્ય મે ॥ ૪॥

સૂત ઉવાચ ।
શ ૃણુ શૌનક વિપેન્દ્ર ધન્યોઽસ્યત્ર ન સંશયઃ ।
વિવર્ધયસિ ઢુણ્ઢેસ્ત્વં રહસ્યં પરમાદ્ભુતમ્ ॥ ૫॥

અતોઽહં હર્ષિતઃ સર્વં કથયિષ્યામિ વિસ્તરાત્ ।
મહોદરસ્ય માહાત્મ્યં યથા વ્યાસાચ્છુતં મયા ॥ ૬॥

દક્ષેણાઽપિ તથા પૃષ્ટ યથા ત્વં માં પ્રપૃચ્છસિ ।
મુદ્ગલેન યથા પ્રોક્તં તથૈવ ત્વાં બ્રવીમ્યહમ્ ॥ ૭॥

દક્ષ ઉવાચ ।
ત્વયા મુદ્ગલ યોગીન્દ્ર તારિતોઽહં વિશેષતઃ ।
મઙ્ગલાયતનાં પૂર્ણાં કથાં વદસિ માનદ ॥ ૮॥

અધુના વદ મે બ્રહ્મન્ મહોદરચરિત્રકમ્ ।
વિસ્તરેણ મહાભાગ ભવબન્ધવિમોચનમ્ ॥ ૯॥

મુદ્ગલ ઉવાચ ।
ધન્યોઽસિ દક્ષ યેન ત્વં ગણેશામૃતસત્કથામ્ ।
ભાવયુક્તશ્ચ પિબસિ સઙ્ક્ષેપેણ બ્રવીમિ તે ॥ ૧૦॥

મહોદરસ્ય માહાત્મ્યં વિસ્તરેણૈવ વર્ણિતુમ્ ।
ભુવનેષ્વર્હતિ ચ કઃ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૧૧॥

એવમેવ પુરા પૃષ્ટો વાલખિલ્યૈર્મહાત્મભિઃ ।
સૂર્યસ્તાનબ્રવીદ્યચ્ચ તદેવ શ‍ૃણુ યત્નતઃ ॥ ૧૨॥

દક્ષ ઉવાચ ।
કથં સ વાલખિલ્યૈશ્ચ પૃષ્ટો ભાનુર્મહાયશાઃ ।
તત્સર્વં વિસ્તરેણૈવ વક્તુમર્હસિ મુદ્ગલ ॥ ૧૩॥

મુદ્ગલ ઉવાચ ।
રથસ્થં ભાસ્કરં નિત્યં મહર્ષય ઉપાસતે ।
વાલખિલ્યા મહાભાગા ભક્તિયુક્તેન ચેતસા ॥ ૧૪॥

તત્ર સૂર્યં ગણેશસ્ય કીર્તને નિરતં મુદા ।
દૃષ્ટ્વા પપ્રચ્છુરાદિત્યં વિસ્મિતા વાલખિલ્યકાઃ ॥ ૧૫॥

ભાનો ત્વં બ્રહ્મરૂપશ્ચ વેદેષુ પ્રતિપાદિતઃ ।
એક એવાદ્વિતીયાખ્યોઽમૃતાત્મા નાત્ર સંશયઃ ॥ ૧૬॥

ત્વદીયભજનેનૈવ સિદ્ધાઃ પરમયોગિનઃ ।
વિષ્ણુમુખ્યાઃ સુરેશાના ભવન્તિ વિવિધા જનાઃ ॥ ૧૭॥

કર્મણાં મૂલરૂપેણ સગુણસ્ત્વં વિભાસિ વૈ ।
જ્ઞાનરૂપેણ સર્વત્ર નિર્ગુણોઽસિ દિવાકર ॥ ૧૮॥

ત્વત્તઃ પરતરં નાસ્તિ વેદાદિષુ વિશેષતઃ ।
તદપિ ત્વં વિશેષેણ ભજસે ગણનાયકમ્ ॥ ૧૯॥

કોઽસૌ ગણેશનામા વૈ તં કથં ભજસે વદ ।
મોહયુક્તા વયં જાતાસ્તવ દૃષ્ટ્વા ચિકીર્ષિતમ્ ॥ ૨૦॥

અતો નસ્તેજસા નાથ વદ તત્ત્વં યથાતથમ્ ।
કસ્માદ્ભ્રામયસે સર્વાન્ ગણેશસ્તવનેન વૈ ॥ ૨૧॥

મુદ્ગલ ઉવાચ ।
ઇતિ પૃષ્ટો મહાતેજાઃ સૂર્ય આત્મા શરીરિણામ્ ।
જગાદ સકલં તેભ્યસ્તચ્છૃણુ ત્વં પ્રજાપતે ॥ ૨૨॥

સૂર્ય ઉવાચ ।
વાલખિલ્યા મહાભાગાઃ શ ૃણુધ્વં સર્વસમ્મતાઃ ।
ચરિતં ગણનાથસ્ય ભવિષ્યથ ચ યોગિનઃ ॥ ૨૩॥

અહમાત્મા ચ વેદેષુ કથિતો નાત્ર સંશયઃ ।
તત્ર જ્ઞાનં વો વદામિ ભ્રમનાશકરં મહત્ ॥ ૨૪॥

અસત્યં બ્રહ્મ યત્ પ્રોક્તં તત્રાહં જીવધારકઃ ।
એક એવાદ્વિતીયશ્ચ સત્યરૂપો મહર્ષયઃ ॥ ૨૫॥

(Page ખં. ૩ અ. ૨ પાન ૨)
વેદાદિભાવભિન્નેષ્વાત્માકારેણ વ્યવસ્થિતઃ ।
સત્યાસત્ય ઇતિ દ્વન્દ્વં જ્ઞાતવ્યં વિબુધોત્તમૈઃ ॥ ૨૬॥

તયોરભેદભાવે યત્ સમરૂપં પરાત્પરમ્ ।
આનન્દ ઉભયાનન્દાદ્બ્રહ્મ યદ્વિષ્ણુરુચ્યતે ॥ ૨૭॥

સમાનન્દાત્તુરીયં યદ્બ્રહ્માવ્યક્તસ્વરૂપકમ્ ।
સર્વેષાં નેતિ કર્તાઽસૌ શઙ્કરશ્ચ પ્રકથ્યતે ॥ ૨૮॥

ચતુર્ણાં યોગકર્તાઽસૌ સ્વાનન્દઃ પરિકીર્તિતઃ ।
સર્વસંયોગરૂપં તદ્બ્રહ્મ વેદેષુ કથ્યતે ॥ ૨૯॥

સ્વપદાન્ન પરો યોગઃ સંયોગાત્મક ઉચ્યતે ।
સ એવ ગણનાથશ્ચ માયાયુક્તઃ પ્રકથ્યતે ॥ ૩૦॥

માયયા સર્વભાવેષુ સંયોગાભેદતઃ સ્વયમ્ ।
તિષ્ઠતિ બ્રહ્મ વિપ્રેશાસ્તેન તન્માયયા યુતમ્ ॥ ૩૧॥

અયોગશ્ચ પરઃ પ્રોક્તઃ સંયોગાન્નાત્ર સંશયઃ ।

નિર્માયિકમિદં બ્રહ્મ વેદે ચૈવ હિ કથ્યતે ॥ ૩૨॥

તત્ર કેષાં ન સંયોગસ્તસ્ય કેષ્વપિ નો ભવેત્ ।
અયોગસ્તેન નામાઽભૂદભિન્નોઽપિ મહર્ષયઃ ॥ ૩૩॥

સંયોગાયોગયોર્યોગે ગણેશો યોગવાચકઃ ।
શાન્તિદો બ્રહ્મભાવેષુ બ્રહ્મણસ્પતિરુચ્યતે ॥ ૩૪॥

સર્વેષાં બ્રહ્મણાં વિપ્રાઃ પતિસ્તેન પ્રકીર્તિતઃ ।
ગણેશસ્તં સદા ભક્તિયુક્તોઽહં પ્રભજામિ હિ ॥ ૩૫॥

ગણઃ સમૂહરૂપશ્ચ ધાતુરુક્તો મનીષિભિઃ ।
બાહ્યાન્તરાદિયોગે વૈ સમૂહો જાયતે દ્વિજાઃ ॥ ૩૬॥

તેનાઽયં ગણરાજોઽભૂદ્બ્રહ્મરૂપા ગણા મતાઃ ।
તેષાં સ્વામી ન સન્દેહસ્તં ભજેઽહં વિશેષતઃ ॥ ૩૭॥

આત્માકારં ચ યદ્બ્રહ્મ તદેવૈકગણાત્મકમ્ ।
સોઽહં સ્વામિનમત્યન્તં ભજે ભક્તિપરિપ્લુતઃ ॥ ૩૮॥

મુદ્ગલ ઉવાચ ।
સૂર્યસ્ય વચનં શ્રુત્વા વાલખિલ્યા મહર્ષયઃ ।
ઊચુસ્તં વિસ્મિતાઃ સર્વે પ્રબદ્ધકરસમ્પુટાઃ ॥ ૩૯॥

વાલખિલ્યા ઊચુઃ ।
રવે ગણેશમાહાત્મ્યં વિસ્તરાદ્વદ યોગદમ્ ।
યેન તત્ત્વાર્થવિજ્ઞાને ભવામસ્તસ્ય કૌશલાઃ ॥ ૪૦॥

રવિરુવાચ ।
શ૱ૃણુધ્વં મુનયઃ સર્વે કથાં સકલસિદ્ધિદામ્ ।
બ્રહ્મણા કથિતા મે યા સર્વપાપપ્રણાશિની ॥ ૪૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે રવિવાલખિલ્યપ્રશ્નવર્ણનં નામ પ્રથમોઽધ્યાયઃ ॥ ૩.૧

## ૩.૨ સૂર્યસઞ્જીવનદાનં નામ દ્વિતીયોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

વાલખિલ્યા ઊચુઃ ।

વદ સૂર્ય વિશેષેણ બ્રહ્મણા કથિતં મહત્ ।
ગણેશસ્ય ચરિત્રં તે શ્રવણે લાલસા પ્રભો ॥ ૧॥

સૂર્ય ઉવાચ ।
પુરાઽહમાત્મરૂપે ચ સંસ્થિતઃ સર્વલોકગઃ ।
ગણેશધ્યાનસન્નિષ્ઠો યોગીન્દ્રાણાં ગુરુઃ સ્વયમ્ ॥ ૨॥

બ્રહ્મણા સૃષ્ટમત્યન્તં ત્રૈલોક્યં સચરાચરમ્ ।
કશ્યપસ્તત્ર મુખ્યો વૈ પ્રજાપતિસમોઽભવત્ ॥ ૩॥

તેન મે વૈ તપસ્તમં વર્ષાણામયુતં દ્વિજાઃ ।
આકૃષ્ણેનેતિ મન્ત્રેણ ધ્યાનનિષ્ઠો બભૂવ હ ॥ ૪॥

તતસ્તં વરદાતાઽહં ગતસ્તસ્યાશ્રમે પુરા ।
સ માં દૃષ્ટ્વા નમસ્કૃત્યાઽપૂજયદ્ભક્તિસંયુતઃ ॥ ૫॥

તતસ્તુષ્ટાવ માં વિપ્રઃ પ્રબદ્ધકરસમ્પુટઃ ।
વરદં સર્વભાવેન ભક્તિનમ્રાત્મકન્ધરઃ ॥ ૬॥

કશ્યપ ઉવાચ ।
નમસ્તે જગદાધાર આત્મને પરમાત્મને ।
સૂર્યાય ત્રિવિધાયૈવ ત્રિકાલજ્ઞાય તે નમઃ ॥ ૭॥

ભેદાભેદવિહીનાય નાનાભેદધરાય તે ।
અનાકારાય દેવાય શાશ્વતાય નમો નમઃ ॥ ૮॥

અમેયશક્તયે તુભ્યં કર્માધારાય ભાનવે ।
સર્વકર્મમયાયૈવ ત્રિરૂપાય નમો નમઃ ॥ ૯॥

અમૃતાય સદા બ્રહ્મનિષ્ઠાય ત્વન્તરાત્મને ।
અર્યમ્ણે રવયે ચૈવ હરિદશ્વાય તે નમઃ ॥ ૧૦॥

આદિમધ્યાન્તહીનાય તદાધારાય તે નમઃ ।
અનન્તવિભવાયૈવ તેજોરાશે નમો નમઃ ॥ ૧૧॥

દીનનાથાય સર્વાય દિનાનાં પતયે નમઃ ।
નમો હન્ત્રે સ્વભક્તાનાં પાલકાય નમો નમઃ ॥ ૧૨॥

ભુક્તિમુક્તિપ્રદાયૈવ નાનાખેલકરાય ચ ।
નમો નમઃ પરેશાય પુરુષાય દિવસ્પતે ॥ ૧૩॥

એકસ્મૈ ચાદ્વિતીયાય માયાધારાય માયિને ।
સંજ્ઞાપતે નમસ્તુભ્યં રક્ષ માં શરણાગતમ્ ॥ ૧૪॥

આત્માકારં ચ સર્વત્ર કિં સ્તૌમિ ત્વાં દિવાકરમ્ ।
સમર્થા નાભવન્ વેદા અતસ્ત્વાં પ્રણમામહે ॥ ૧૫॥

દેહિ મે પરમેશાન ભક્તિં તે ચરણામ્બુજે ।
અન્યં વરં યયાચેઽહં ત્વં મે પુત્રો ભવ પ્રભો ॥ ૧૬॥

સૂર્ય ઉવાચ ।
એવં વદન્તમાનન્દયુક્તં મુનિવરં દ્વિજાઃ ।
અવદં તં પ્રસન્નોઽહં ભાવયુક્તં તપસ્વિનમ્ ॥ ૧૭॥

તવ પુત્રો ભવિષ્યામિ દ્વાદશાદિત્યરૂપવાન્ ।
મદીયા ભક્તિરુગ્રા તે ભવિષ્યતિ મહામુને ॥ ૧૮॥

યદ્યદિચ્છસિ વિપ્રેન્દ્ર તત્તત્તે સફલં ભવેત્ ।
ભવામિ સ્મરણેનાઽહં પ્રત્યક્ષસ્તે પુરો મુને ॥ ૧૯॥

ત્વયા કૃતમિદં સ્તોત્રં મદીયં સર્વદં ભવેત્ ।
ભુક્તિં મુક્તિં પ્રદાસ્યામિ મુને સ્તોત્રેણ તોષિતઃ ॥ ૨૦॥

એવમુક્ત્વા વાલખિલ્યાઃ સૌરલોકે ગતોઽભવમ્ ।
અન્તર્ધાય સ્વમાત્માનં સોઽપિ સમ્મુદિતોઽભવત્ ॥ ૨૧॥

અદિત્યાપિ તથા તપ્તં તપો મે પરમાદ્ભુતમ્ ।
તયાઽપીદં ચ વિપ્રેન્દ્રા યાચિતં તન્મયા કૃતમ્ ॥ ૨૨॥

અહં પુત્રસ્ય ભાવેન કશ્યપાજ્જઠરે ગતઃ ।
અદિત્યાશ્ચ સુકાલે સા સુષુવે માં મહર્ષયઃ ॥ ૨૩॥

જાતકર્માદિકં સર્વં ચકાર મુનિસત્તમઃ ।
કાલે મૌઞ્જ્યાદિકં કર્મ વેદાધ્યયનમાદિશત્ ॥ ૨૪॥

તથા તતાપ પુત્ર્યર્થં વિશ્વકર્મા તપો દ્વિજાઃ ।
સંજ્ઞાઽગ્રે ભવિતા પુત્રી કર્મરૂપા સુસિદ્ધિદા ॥ ૨૫॥

તયા તસ્મૈ વરો દત્તઃ સાઽપિ પુત્રી બભૂવ હ ।
મહ્યં તતસ્તેન ભાવેન દત્તા વિશ્વકર્મણા ॥ ૨૬॥

અહં ચ બ્રહ્મણા તત્રાભિષિક્તો જ્યોતિષાં તથા ।

ગ્રહાણાં કર્મણાં રાજ્યે તતોઽહં મુદિતોઽભવમ્ ॥ ૨૭॥

સદાધારમિદં સર્વં ત્રૈલોક્યં સચરાચરમ્ ।
વૃષ્ટ્યાદિના તથા કાલે તત્કરોમિ સ્મ તર્પિતમ્ ॥ ૨૮॥

કર્મણાં ફલદાતાઽહં કર્માધારઃ પ્રકીર્તિતઃ ।
વેદે સર્વજનાનામન્તરાત્મા જગદાત્મનામ્ ॥ ૨૯॥

તતો બહૌ ગતે કાલેઽભવં મનસિ ગર્વિતઃ ।
નિરાધારોઽહમેકો વૈ મદાધારમિદં બભૌ ॥ ૩૦॥

કશ્યપસ્ય સુતોઽહં વૈ જાતસ્તત્ર મયા દ્વિજાઃ ।
(Page ખં. ૩ અ. ૨ પાન ૪)
ગણેશારાધનં કિઞ્ચિન્ન કૃતં કર્મધારિણા ॥ ૩૧॥

એવં ક્રમેણ તત્રાઽપિ બહુઃ કાલો ગતોઽભવત્ ।
તતોઽકસ્માચ્ચ મે વિઘ્નઃ સમુત્પન્નઃ સુદારુણઃ ॥ ૩૨॥

માલી સુમાલિકો દૈત્યૌ તેપતુસ્તપ ઉત્તમમ્ ।
દિવ્યવર્ષસહસ્રાણિ શિવઃ સન્તોષિતોઽભવત્ ॥ ૩૩॥

વરં દદૌ સ તાભ્યાં યથાચિતં તાદૃશં પરમ્ ।
સૂર્યતેજઃસમં દિવ્યં વિમાનં પ્રાપતુસ્તદા ॥ ૩૪॥

તાભ્યાં વિમાનનિષ્ઠાભ્યાં જિતં સર્વં ચરાચરમ્ ।
રાજ્યં તૌ ચક્રતુર્દૈત્યૌ ત્રિલોકસ્ય મહર્ષયઃ ॥ ૩૫॥

તતો બહૌ ગતે કાલે ધર્ષયન્તૌ ચ માં દ્વિજાઃ ।
વિમાને સંસ્થિતૌ દૈત્યૌ જગ્મતુર્દિવિ ભાનુવત્ ॥ ૩૬॥

વિમાનતેજસા સર્વં વ્યાપ્તં ત્રૈલોક્યમણ્ડલમ્ ।
રાત્રિલોપં ચ સર્વત્ર ચક્રતુઃ પરમાદ્ભુતૌ ॥ ૩૭॥

અહમસ્તઙ્ગતો દૈત્યૌ વિમાને તત્ર સંસ્થિતૌ ।
ઉદયે સમનુપ્રાપ્તૌ તતશ્ચ દિવસોઽભવત્ ॥ ૩૮॥

એવં માં તૌ નિરર્થં વૈ ચક્રતુર્દૈત્યપુઙ્ગવૌ ।
અર્કતેજઃસમાનેન વિમાનેન મહૌજસૌ ॥ ૩૯॥

અહં સઙ્ક્ષુભિતોઽત્યન્તં જાતસ્તદપિ ભો દ્વિજાઃ ।
અસહે વરદાનસ્ય બલં જ્ઞાત્વા વિશેષતઃ ॥ ૪૦॥

એવં સપ્ત ગતાસ્તત્ર દિવસાસ્તદપિ દ્વિજાઃ ।
ન સમે સંસ્થિતૌ દૈત્યૌ લોકાઃ સર્વે સુવિસ્મતાઃ ॥ ૪૧॥

કર્મલોપશ્ચ સર્વત્ર ભ્રમાજ્જાતો મહર્ષયઃ ।
તેજસા દગ્ધરૂપા વૈ પૃથ્વી જાતા તથા જનાઃ ॥ ૪૨॥

તતોઽહં ક્ષુભિતોઽત્યન્તં ગર્વયુક્તઃ સ્વતેજસા ।
જ્વાલયામિ વિમાનં સ્મ દૈત્યૌ ભૂમૌ મુમૂર્ચ્છતુઃ ॥ ૪૩॥

દગ્ધૌ તેજઃસમૂહેન મદીયેન તતઃ શિવઃ ।
આયયૌ સહસા ક્રુદ્ધઃ સ્મૃતસ્તાભ્યાં વિશેષતઃ ॥ ૪૪॥

ત્રિશૂલેન મદીયં વૈ શિરશ્છિન્નં શિવેન ચ ।
પતિતોઽહં તતઃ કાશ્યાં લુલિતઃ સ મૃતોઽભવમ્ ॥ ૪૫॥

તતઃ સર્વં જગત્ ક્ષુબ્ધં સૂર્યહીનતયા દ્વિજાઃ ।
તદ્ દૃષ્ટ્વા પરમાશ્ચર્યં યયુસ્તત્ર મહર્ષયઃ ॥ ૪૬॥

દેવાઃ સર્વે ભયોદ્વિગ્ના વિષ્ણુબ્રહ્માદયો યયુઃ ।
શઙ્કરં સાન્ત્વયામાસુર્નાનાયત્નૈઃ સુરર્ષયઃ ॥ ૪૭॥

તતઃ શિવં સમૂચુસ્તે કિં કૃતં વૃષભધ્વજ ।
સૂર્યં હત્વા સદાત્માનં જગદ્ધારયસે કથમ્ ॥ ૪૮॥

ત્વં કાલરૂપભાવેન તમોયુક્તઃ સદાશિવ ।
અકાલે વિશ્વસંહારે વર્તસે કિં મહેશ્વર ॥ ૪૯॥

તેષાં વચનમાકર્ણ્ય શઙ્કરઃ શોકસંયુતઃ ।
જગાદ તાન્ મહાદેવાન્ દૈવેનેદં સુકારિતમ્ ॥ ૫૦॥

નિમિત્તમાત્રં ભાવેન માં કૃત્વા ચ સુરર્ષયઃ ।
વિઘ્નરાજેન વિઘ્નોઽયં દારુણઃ સમ્પ્રકાશિતઃ ॥ ૫૧॥

મહ્યં પુરા ગણેશાનો વરદાતા બભૂવ હ ।
સ્મૃતમાત્રસ્તવાગ્રેઽહં સાક્ષાદ્વૈ સમ્ભવામિ ચ ॥ ૫૨॥

અતોઽહં શરણં તં ચ ગમિષ્યામ્યધુના વિભુમ્ ।
જીવયિષ્યામિ ભાનું તં તેજસા ગણપસ્ય ચ ॥ ૫૩॥

ઇત્યુક્ત્વા તં હૃદિ ધ્યાત્વા મનસાઽપૂજયચ્ચ સઃ ।

અયાચત વિશેષેણ જીવનાય રવેરપિ ॥ ૫૪॥

જગજ્જીવનદાતાઽયં સૂર્યઃ સ્વામિન્ મયા હતઃ ।
(Page  ખં. ૩ અ. ૩ પાન ૫)
તં જીવય ગણેશાન નોચેદ્દેહં ત્યજામ્યહમ્ ॥ ૫૫॥

ઇતિ પ્રાર્થયમાનં તં જ્ઞાત્વા શમ્ભું ગજાનનઃ ।
આત્મનામાત્મરૂપઃ સ જીવયામાસ તં રવિમ્ ॥ ૫૬॥

ઉત્થિતં કશ્યપસ્યૈવં પુત્રં દૃષ્ટ્વા સુરર્ષયઃ ।
હર્ષિતાસ્તં જયેતિ સ્મ ગજાનન જગુર્મુદા ॥ ૫૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે સૂર્યસઞ્જીવનદાનં નામ દ્વિતીયોઽધ્યાયઃ ॥ ૩.૨

## ૩.૩ સૂર્યવરપ્રદાનં નામ તૃતીયોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂર્ય ઉવાચ ।
તતો લોલાર્કનામાઽહં કાશ્યાં જાતો મહર્ષયઃ ।
વિસ્મિતો માનસેઽત્યન્તં કિમાધારમિદં ભવેત્ ॥ ૧॥

અહમાત્મા ચ સર્વેષામાત્મનો મરણં કથમ્ ।
મૃતે મયિ જગત્ સર્વં કેન જીવયુતં કૃતમ્ ॥ ૨॥

અહં ચ જીવિતઃ કેન નાહમાત્મા શરીરિણામ્ ।
મોહયુક્તતયા વ્યર્થં ગર્વિષ્ઠઃ સમ્ભવામિ વૈ ॥ ૩॥

અતોઽહં કાનનં યાસ્યે ત્યક્ત્વા સર્વં વિશેષતઃ ।
યદાધારં ભવેદ્વિશ્વં તં ભજિષ્યામિ નિત્યદા ॥ ૪॥

નિઃસૃતોઽહં ગૃહં ત્યક્ત્વા તત્ર માં વિધિરબ્રવીત્ ।
સાન્ત્વયિત્વા સ વેદાનાં વાક્યૈઃ પરમતત્ત્વવિત્ ॥ ૫॥

શ ૃણુ સૂર્ય રહસ્યં યત્ સર્વેભ્યઃ શાન્તિદાયકમ્ ।
ભવિતાસિ તતઃ શાન્તઃ કિમર્થં શ્રામ્યતે મુધા ॥ ૬॥

ત્વમાત્મા સર્વભૂતાનામાત્માધારમિદં સ્મૃતમ્ ।
આત્મનો મરણં નાસ્તિ બ્રહ્મવેદે વદન્તિ ભોઃ ॥ ૭॥

બ્રહ્મણાં પતિરૂપેણ સંસ્થિતો ગણનાયકઃ ।
તસ્માન્નાનાવિધાનીહ બ્રહ્માણિ પ્રોદ્ભવન્તિ વૈ ॥ ૮॥

કશ્યપાત્મજ સર્વત્ર યોગેન ચ સ તિષ્ઠતિ ।
તસ્મિન્ સ્થિતે કથં વિશ્વં તન્નશ્યતિ વદસ્વ મામ્ ॥ ૯॥

ત્વં કશ્યપસ્ય પુત્રત્વં પ્રાપ્તશ્ચ વરદાનતઃ ।
તત્રાજ્ઞાનાવૃતત્વેન પૂજિતો ન ગણાધિપઃ ॥ ૧૦॥

તેન વિઘ્નઃ સમુત્પન્નો વિપરીતમયઃ પરઃ ।
આત્મનો મરણં પશ્ય તવ પ્રાપ્તં ભજસ્વ તમ્ ॥ ૧૧॥

તેન સર્વં શુભં પૂર્ણં ભવિષ્યતિ રવે પુનઃ ।
યોગશાન્તિધરસ્ત્વં વૈ ગાણપત્યો ભવિષ્યસિ ॥ ૧૨॥

અર્યમોવાચ ।
ઇતિ શ્રુત્વા વિધેર્વાક્યં વિસ્મિતોઽહં વદામિ તત્ ।
જ્ઞાનાર્થં ગણરાજસ્ય શ‍ૃણુધ્વં મે વિચેષ્ટિતમ્ ॥ ૧૩॥

અહો બ્રહ્મંસ્ત્વયા સ્વામિન્ બોધિતોઽહં વિશેષતઃ ।
સંશયં તત્ર જાતં મે છેદયસ્વ પિતામહ ॥ ૧૪॥

યોગશાન્તિધરઃ પૂર્ણો ગણેશઃ પરિકીર્તિતઃ ।
કરોતિ સ કથં વિઘ્નં વિકારીવ વદસ્વ મે ॥ ૧૫॥

બ્રહ્મોવાચ ।
શ‍ૃણુ સૂર્ય મહાપ્રાજ્ઞ વચઃ સંશયનાશકમ્ ।
ગણેશભક્તસ્ત્વં યેન ભવિતાઽસિ મહાપ્રભો ॥ ૧૬॥

યોગશાન્તિમયઃ પૂર્ણો ગણેશશ્ચૈવ નિશ્ચિતમ્ ।
તેન નાનાવિધં વિશ્વં રચિતં બ્રહ્મ માનદ ॥ ૧૭॥

તત્ર માયામયો મોહઃ સર્વત્ર ભ્રાન્તિદાયકઃ ।
તેન ભ્રાન્તિસમાયુક્તે જગદ્બ્રહ્મ બભૂવતુઃ ॥ ૧૮॥

તયોર્મોહવિનાશાર્થં યોગમાર્ગં ગજાનનઃ ।
(Page  ખં. ૩ અ. ૩ પાન ૬)
ચકાર સર્વશાન્તેભ્યઃ શાન્તિદં યોગસેવયા ॥ ૧૯॥

તત્ર તસ્ય કલાંશા યે બ્રહ્માકારાઃ શિવાદયઃ ।

બ્રહ્મભાવેન ગર્વેણાઽભવન્ સ્વબ્રહ્મણિ સ્થિતાઃ ॥ ૨૦॥

તેભ્યઃ શાન્તિપ્રદાનાર્થં વિઘ્નદાતા ગજાનનઃ ।
ભવતે તેન તે સર્વે ગર્વહીના ભવન્તિ વૈ ॥ ૨૧॥

ગર્વહીનસ્વભાવેન યોગમિચ્છન્તિ શાશ્વતમ્ ।
મૂલભૂતં ચ સર્વેષાં જગતાં બ્રહ્મણાં રવે ॥ ૨૨॥

સાધયિત્વા મહાયોગં શાન્તિરૂપા ભવન્તિ તે ।
તત્ર વિઘ્નહરો ઢુણ્ઢિસ્તેષાં ભવતિ સર્વદા ॥ ૨૩॥

તતો વિઘ્નેશ્વરં દેવં ભજન્તે શાન્તિધારકાઃ ।
યોગશાન્તિમયં પૂર્ણં ભક્તિભાવસમન્વિતાઃ ॥ ૨૪॥

એતદર્થં ગણેશાનઃ કુરુતે વિઘ્નમુત્તમમ્ ।
દેવર્ષીણાં ચ સાધૂનાં દુષ્ટાનાં નૈવ તાદૃશમ્ ॥ ૨૫॥

બ્રહ્મણો ગિરમાકર્ણ્ય પ્રસન્નઃ સવિતા પુનઃ ।
વિધિં જગાદ યોગાર્થં સર્વજ્ઞં ભક્તિસંયુતઃ ॥ ૨૬॥

સૂર્ય ઉવાચ ।
વદ બ્રહ્મન્ ગણેશસ્ય પ્રાપ્ત્યર્થં યોગમુત્તમમ્ ।
સાધયિત્વા ગણેશોઽહં ભવિષ્યામિ વિધે યતઃ ॥ ૨૭॥

બ્રહ્મોવાચ ।
સમ્યક્ પૃષ્ટં ત્વયા વત્સ ત્વં જાનાસિ વિશેષતઃ ।
અપિ તત્ કશ્યપાજ્જાતઃ સર્વં તેન સુવિસ્મૃતમ્ ॥ ૨૮॥

અધુના શ ૃણુ સર્વં ત્વં ગાણેશં જ્ઞાનમુત્તમમ્ ।
સાધયિત્વા ગણેશાનઃ કાલેન પ્રભવિષ્યસિ ॥ ૨૯॥

માયાશક્તિરસદ્રૂપા ભેદાકારા મહામતે ।
જાનીહિ તત્ર સર્વાત્મા ત્વં ચ સદ્રૂપ ઉચ્યસે ॥ ૩૦॥

તયોઃ સ્રષ્ટા સદાનન્દો વિષ્ણુઃ સામ્યપ્રધારકઃ ।
ત્રિભિર્હીનઃ શિવો વ્યક્તસ્ત્રિભિર્જાનીહિ સંયુતઃ ॥ ૩૧॥

ચતુર્ણાં ચૈવ સંયોગે સ્વાનન્દઃ પરિકીર્તિતઃ ।
સ્વાનન્દાન્ન પરબ્રહ્મ સંયોગાત્મકમુચ્યતે ॥ ૩૨॥

સ એવ ગણરાજસ્તુ માયાખેલક ઉચ્યતે ।

સંયોગાભેદભાવેન જગતિ બ્રહ્મણિ સ્થિતઃ ॥ ૩૩॥

અયોગે માયયા હીનો ગણેશો બ્રહ્મવાચકઃ ।
સર્વસંયોગહીનશ્ચાસમાધિસુખદાયકઃ ॥ ૩૪॥

સંયોગાયોગયોર્યોગે ગણેશઃ શાન્તિવાચકઃ ।
યોગશાન્તિપ્રદઃ સોઽપિ શાન્તીનાં શાન્તિરુચ્યતે ॥ ૩૫॥

મનોવાણીમયં સર્વં ગકારાક્ષરવાચકમ્ ।
મનોવાણીવિહીનં યત્ તત્ જાનીહિ ણકારજમ્ ॥ ૩૬॥

તયોઃ સ્વામી ગણેશાનો બ્રહ્મણાં બ્રહ્મ ઉચ્યતે ।
સામવેદે રવે પશ્ય તં ભજસ્વ વિધાનતઃ ॥ ૩૭॥

દ્વિવિધા તસ્ય માયા વૈ સિદ્ધિર્બુદ્ધિશ્ચ કથ્યતે ।
તાભ્યાં યુક્તઃ ખેલતિ સ નાનાર્થે ગણનાયકઃ ॥ ૩૮॥

ચિત્તં પઞ્ચવિધં પુત્ર બુદ્ધિરૂપં ન સંશયઃ ।
ઉચ્યતે સિદ્ધિરૈશ્વર્યં ભોગભેદાય પઞ્ચસુ ॥ ૩૯॥

તયોર્બિમ્બિસ્વરૂપં યજ્જહિ તદ્ યોગસેવયા ।
શાન્તિયોગધરઃ પુત્ર ભવિષ્યસિ ન સંશયઃ ॥ ૪૦॥

એવમુક્ત્વા ગણેશસ્ય દદૌ મન્ત્રં ષડક્ષરમ્ ।
તસ્મૈ સૂર્યાય પૂર્ણં સ વિધિયુક્તં પિતામહઃ ॥ ૪૧॥

વિધિં પ્રણમ્ય ચ વનં યયૌ ભાનુઃ સુશોભનમ્ ।
તતાપ તપ ઉગ્રં સ નિરાહારપરાયણઃ ॥ ૪૨॥

જજાપ હૃદિ સન્ધ્યાય ગણેશં મન્ત્રમુત્તમમ્ ।
એવં વર્ષસહસ્રેણ પ્રસન્નોઽભૂદ્ગજાનનઃ ॥ ૪૩॥

તં યયૌ ભક્તિભાવેન સુપ્રીતઃ સૂર્યમાદરાત્ ।
સ્વગણૈઃ સેવિતઃ સાક્ષાદ્બોધયામાસ વિઘ્નપઃ ॥ ૪૪॥

(Page ખં. ૩ અ. ૩ પાન ૭)
ગણેશ ઉવાચ ।
ભો સૂર્ય વૃણુ મત્તસ્ત્વં વરાન્નાનાવિધાન્ પરાન્ ।
તાન્ દાસ્યામિ મહાભાગ તપસા તોષિતસ્ત્વયા ॥ ૪૫॥

શ્રુત્વા ગણેશવાણીં સ સવિતા બોધસંયુતઃ ।

દૃષ્ટ્વા ગણપતિં ભક્ત્યા સમુત્તસ્થૌ ભ્રમાન્વિતઃ ॥ ૪૬॥

તં પ્રણમ્યાપૂજયત્ સ યથાવિધિ ગજાનનમ્ ।
તુષ્ટાવ સુમના ભાનુઃ પુરો બદ્ધાઞ્જલિઃ સ્થિતઃ ॥ ૪૭॥

ભાનુરુવાચ ।
નમસ્તે વિઘ્નનાથાય વિઘ્નકર્ત્રે દુરાત્મનામ્ ।
ભક્તાનાં વિઘ્નહર્ત્રે તે ગણેશાય નમો નમઃ ॥ ૪૮॥

ચતુર્બાહુધરાયૈવ મૂષકવાહનાય તે ।
નાગયજ્ઞોપવીતાય નાભિશેષાય તે નમઃ ॥ ૪૯॥

મહોદરાય દેવાય સિદ્ધિબુદ્ધિયુતાય તે ।
શૂર્પકર્ણાય સર્વાય ચૈકદન્તાય વૈ નમઃ ॥ ૫૦॥

ગજવક્ત્રધરાયૈવ ભાલચન્દ્રાય તે નમઃ ।
ચિન્તામણિધરાયૈવ હૃદયે તે નમો નમઃ ॥ ૫૧॥

રક્તામ્બરાય રક્તાય નાનાભૂષણશાલિને ।
અમેયાય નમસ્તુભ્યં નાનાલીલાકરાય ચ ॥ ૫૨॥

અનાધારાય સર્વેષામાધારાય ચ તે નમઃ ।
સ્વાનન્દવાસિને તુભ્યમિક્ષુસાગરખેલિને ॥ ૫૩॥

હેરમ્બાય નમસ્તુભ્યં લમ્બોદર નમો નમઃ ।
જગતાં બ્રહ્મણાં પાત્રે બ્રહ્માધીશાય તે નમઃ ॥ ૫૪॥

નિરાકારાય સર્વેશ પાલકાય નમો નમઃ ।
સાકારાય ચ ભો ઢુણ્ઢે તાભ્યાં યોગાય તે નમઃ ॥ ૫૫॥

યોગશાન્તિપ્રદાત્રે તે યોગશાન્તિમયાય ચ ।
યોગિભ્યો યોગદાત્રે તે યોગેશાય નમો નમઃ ॥ ૫૬॥

એવં સ્તુવતિ સૂર્યે ચ ભક્તિરસસમન્વિતે ।
અકસ્માદ્બાષ્પકણ્ઠઃ સ સરોમાઞ્ચો બભૂવ હ ॥ ૫૭॥

પુલકાઙ્કિતદેહં તં દૃષ્ટ્વા ખિન્નમિવ સ્થિતમ્ ।
જગાદ ગણનાથો વૈ સૂર્યં ભક્તિરસપ્લુતમ્ ॥ ૫૮॥

ગણેશ ઉવાચ ।
ત્વયા કૃતમિદં સ્તોત્રં મદીયં સર્વદં ભવેત્ ।

ભુક્તિમુક્તિપ્રદં ભાનો મમ પ્રીતિવિવર્ધનમ્ ॥ ૫૯॥

યદ્યદિચ્છસિ તત્તદ્વૈ સફલં પ્રભવિષ્યતિ ।
પઠતાં શ‍ૃણ્વતાં ચૈવ સદાનન્દપ્રવર્ધનમ્ ॥ ૬૦॥

ત્વં તુ મત્તો વરાન્ બ્રૂહિ તાન્ દાસ્યામિ ન સંશયઃ ।
તપસા ભાવિતોઽત્યન્તં ભૃશં સ્તોત્રેણ તોષિતઃ ॥ ૬૧॥

એવમુક્તો ગણેશેન ભાનુર્ભક્તિપરાયણઃ ।
ઉવાચ તં ગણાધીશં હર્ષનિર્ભરમાનસઃ ॥ ૬૨॥

સૂર્ય ઉવાચ ।
તુષ્ટોઽસિ ગણનાથ ત્વં યદિ દાસ્યસિ મે વરમ્ ।
તદા ભક્તિં દૃઢાં તે વૈ દેહિ નાથ નમોઽસ્તુ તે ॥ ૬૩॥

અન્યં યદા સ્મરામિ ત્વાં તદા દર્શય રૂપકમ્ ।
યદ્યદિચ્છામિ તત્તન્ મે સફલં ભવતુ પ્રભો ॥ ૬૪॥

ઓમિત્યુક્ત્વા ગણેશાનસ્તત્રૈવાન્તરધીયત ।
સૂર્યઃ ખિન્ન ઇવાતિષ્ઠત્તત્રૈવં વાલખિલ્યકાઃ ॥ ૬૫॥

તતસ્તેન ગણેશસ્ય સ્થાપિતા મૂર્તિરાદરાત્ ।
બ્રાહ્મણૈઃ સહ ભાનુસ્તાં પૂજયામાસ ભક્તિતઃ ॥ ૬૬॥

તતઃ સ્વગૃહમાગત્ય મૂર્તિં કૃત્વાઽહમાદરાત્ ।
પૂજયામિ સદા દેવં ગણેશાનં ભજામિ તમ્ ॥ ૬૭॥

એતત્ સર્વં મદીયં વશ્ચેષ્ટિતં કથિતં દ્વિજાઃ ।
વાલખિલ્યા મહાભાગાઃ કિં ભૂયઃ શ્રોતુમિચ્છથ ॥ ૬૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે સૂર્યવરપ્રદાનં નામ તૃતીયોઽધ્યાયઃ ॥ ૩.૩
(Page ખં. ૩ અ. ૪ પાન ૮)

## ૩.૪ કામચરિતં નામ ચતુર્થોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
શ્રુત્વા સૂર્યચરિત્રં તે ગણેશભક્તિસંયુતમ્ ।

હૃષ્ટાસ્તં વાલખિલ્યા વૈ પપ્રચ્છુઃ પુનરાદરાત્ ॥ ૧॥

વાલખિલ્યા ઊચુઃ ।
ભાનો ત્વયા મહચ્ચિત્રં કથિતં ચેષ્ટિતં પ્રભો ।
તવ વાક્યામૃતેનૈવ સન્તૃપ્તા ભૃશમુત્તમમ્ ॥ ૨॥

અધુના બ્રૂહિ દેવેશ મોહપાશનિકૃન્તનમ્ ।
ગણેશચરિતં યેન મોહહીના ભવન્તિ ચ ॥ ૩॥

અહો મોહસ્ય માહાત્મ્યં યેન સઞ્છાદિતો મહાન્ ।
ગણેશસ્તેન સમ્ભ્રાન્તા ન વિદુસ્તં ગજાનનમ્ ॥ ૪॥

મુદ્ગલ ઉવાચ ।
એવં પૃષ્ટો મહાતેજા ભાનુસ્તૈઃ સ મહર્ષિભિઃ ।
ઉવાચ તાન્ પ્રહૃષ્ટાત્મા ગાણપત્યો મહાયશાઃ ॥ ૫॥

ભાનુરુવાચ ।
અત્ર વઃ કથયિષ્યામિ ઇતિહાસં પુરાભવમ્ ।
મોહાસુરચરિત્રં યદ્ગણેશજ્ઞાનસંયુતમ્ ॥ ૬॥

કદાચિત્તારકો નામ દૈત્યોઽભૂદ્દારુણઃ ખલઃ ।
બ્રહ્મણો વરદાનેન ત્રૈલોક્યાધિપતિઃ સ્વયમ્ ॥ ૭॥

સર્વદેવગણાસ્તેન મુનયશ્ચ પ્રપીડિતાઃ ।
વનેષુ ભયસન્ત્રસ્તા અવસન્ દુઃખભાગિનઃ ॥ ૮॥

તતો બહુગતે કાલે દેવાઃ સર્ષિગણાઃ પુરા ।
શિવસ્ય ધ્યાનસંયુક્તાઃ શરણં પાર્વતીં યયુઃ ॥ ૯॥

શિવવીર્યભવો દેવઃ સેનાધીશો હનિષ્યતિ ।
તારકં નાત્ર સન્દેહો જ્ઞાત્વા તાં તુષ્ટુવુઃ પરામ્ ॥ ૧૦॥

મહાદેવો વને ગત્વા તપસે સંસ્થિતોઽભવત્ ।
તત્ર દેવગણૈર્યુક્તા પાર્વતી તં યયૌ દ્વિજાઃ ॥ ૧૧॥

દૃષ્ટ્વા ધ્યાનસ્થિતં શમ્ભું મોહાર્થં તસ્ય સા સતી ।
ભિલ્લીવેષં ચકારૈવ યયૌ તં શઙ્કરાશ્રમમ્ ॥ ૧૨॥

ઇતસ્તતશ્ચ બભ્રામ ભિલ્લીરૂપા ગુણાધિકા ।
પુષ્પાણાં ગ્રહણે સક્તા મહામોહપ્રવર્ધિની ॥ ૧૩॥

એતસ્મિન્નન્તરે તત્ર ત્યક્ત્વા ધ્યાનં શિવઃ સ્થિતઃ ।
તેન દૃષ્ટા મહાભાગા રૂપયૌવનશાલિની ॥ ૧૪॥

તાં દૃષ્ટ્વા સહસા શમ્ભુર્મોહિતો માયયા ભૃશમ્ ।
આદિમાયાં યયૌ તત્ર કામવિહ્વલમાનસઃ ॥ ૧૫॥

હાવભાવયુતાં ભિલ્લીં દૃષ્ટ્વા પરમમોહિતઃ ।
તાં ધર્તું સ મનશ્ચક્રે તજ્જ્ઞાત્વા સાઽપલાયત ॥ ૧૬॥

પૃષ્ઠલગ્નઃ સ્વયં સાક્ષાચ્છઙ્કરો વિહ્વલો ભૃશમ્ ।
તતઃ સા યત્ર તત્રાઽસ્ય સમીપે વિચચાર હ ॥ ૧૭॥

એવં મુહૂર્તમાત્રં વૈ નગ્નઃ શમ્ભુર્મહર્ષયઃ ।
બભ્રામ તાં પ્રધર્તું તુ સાઽસ્ય નો હસ્તગાઽભવત્ ॥ ૧૮॥

તતો વીર્યં પપાતાસ્ય શિવસ્ય પરમાદ્ભુતમ્ ।
ભિલ્લી સાન્તર્દધે વિપ્રાઃ શિવઃ શાન્તો બભૂવ હ ॥ ૧૯॥

તસ્માચ્છિવસ્ય વીર્યાદ્વૈ સમ્ભૂતઃ પુરુષો મહાન્ ।
મોહરૂપો મહોગ્રઃ સ ચતુર્બાહુધરો બભૌ ॥ ૨૦॥

વનેઽભૂત્ સંસ્થિતસ્તત્રૈકાકી તેજસ્વિનાં વરઃ ।
ચારુરૂપો મહામાની સર્વાવયવસંયુતઃ ॥ ૨૧॥

સ તુ કન્દફલાદીનિ ભક્ષયામાસ યત્નતઃ ।
ઇતસ્તતશ્ચ બભ્રામ ગતો નાનાવનેષુ વૈ ॥ ૨૨॥

શિવસ્તત્ર સમાસીનો બભૂવ ભૃશદુઃખિતઃ ।
ધ્યાનેન સકલં જ્ઞાત્વા દેવીકૃતવિચેષ્ટિતમ્ ॥ ૨૩॥

તતો ક્રોધસમાયુક્તઃ કામં સદ્યો દદાહ સઃ ।
સ્વસ્થાનં પ્રયયૌ શમ્ભુઃ પાર્વતીં તાં દદર્શ હ ॥ ૨૪॥

દેવકાર્યાર્થમત્યન્તં પાર્વત્યા પ્રાર્થિતઃ પ્રભુઃ ।
કામં સસ્માર શમ્ભુસ્તં પુરોઽનઙ્ગં દદર્શ સઃ ॥ ૨૫॥

(Page ખં. ૩ અ. ૪ પાન ૯)
પ્રણિપત્ય મહેશાનં સ્તુત્વા રુદ્રં મહાયશાઃ ।
અવદદ્દેહસંયુક્તં માં કુરુષ્વ મહેશ્વર ॥ ૨૬॥

કામસ્ય વચનં શ્રુત્વા દદૌ તસ્મૈ સદાશિવઃ ।

એકાક્ષરં ગણેશસ્ય મન્ત્રં તં વિધિસંયુતમ્ ॥ ૨૭॥

જગાદ શઙ્કરઃ કામમનેનારાધય પ્રભુમ્ ।
ગણેશં તેન તેઽભીષ્ટં ભવિષ્યતિ ન સંશયઃ ॥ ૨૮॥

નાશિકં સ સમાગત્ય સસ્ત્રીકશ્ચ તતાપ હ ।
તપો ગણપતિં ધ્યાયન્ જપન્ મન્ત્રપરાયણઃ ॥ ૨૯॥

ગતેષુ વર્ષસાહસ્રેષુ યયૌ ગણનાયકઃ ।
તં કામં બોધયામાસ વરં વૃણુ હૃદીપ્સિતમ્ ॥ ૩૦॥

દૃષ્ટ્વા કામો ગણેશાનમુત્થાય પ્રણતોઽભવત્ ।
તુષ્ટાવ તં ગણેશાનં ભક્તિનમ્રાત્મકન્ધરઃ ॥ ૩૧॥

કામ ઉવાચ ।
ગણેશાય નમસ્તુભ્યં પાશાઙ્કુશવિધારિણે ।
દન્તાભયધરાયૈવ મૂષકધ્વજ તે નમઃ ॥ ૩૨॥

ગજવક્ત્રાય દેવાય શૂર્પકર્ણાય વૈ નમઃ ।
મહોદરાય પૂર્ણાય પૂર્ણાનન્દાય તે નમઃ ॥ ૩૩॥

સર્વાકારાય સર્વાય સ્થૂલસૂક્ષ્માદિભેદિને ।
ગુણેશાય ગુણાનાં તે ચાલકાય નમો નમઃ ॥ ૩૪॥

દેહદેહિમયાયૈવ પ્રકૃતેર્લયરૂપિણે ।
વિદેહાય સ્વસંવેદ્યપતયે તે નમો નમઃ ॥ ૩૫॥

રજસા સૃષ્ટિકર્ત્રે તે સત્વતઃ પાલકાય ચ ।
તમસા સર્વસંહર્ત્રે કર્માકારાય તે નમઃ ॥ ૩૬॥

જગદ્રૂપાય વૈ તુભ્યં સ્થાવરાય ચરાય ચ ।
અનાકારાય હેરમ્બાય બ્રહ્મપતયે નમઃ ॥ ૩૭॥

વેદાદ્યગમ્યરૂપાય યોગેભ્યો યોગદાયક ।
કિં સ્તૌમિ ત્વાં ગણાધીશ અલ્પજ્ઞોઽહં નમોસ્તુ તે ॥ ૩૮॥

અધુના મે વરં દેહિ ગજાનન દૃઢાં પરામ્ ।
ભક્તિં તે મે સુદેહં વૈ માં કુરુષ્વ મહોદર ॥ ૩૯॥

એવમુક્ત્વા નતોઽભૂત્ સસ્ત્રીકઃ કામઃ સ તં દ્વિજાઃ ।
તતસ્તં પ્રત્યુવાચાથ ગણેશો ભક્તવત્સલઃ ॥ ૪૦॥

ગણેશ ઉવાચ ।
મદીયા ભક્તિરુગ્રા વૈ ભવિષ્યતિ રતેઃ પતે ।
શિવદગ્ધશ્ચ તે દેહસ્તથા કર્તું ન શક્યતે ॥ ૪૧॥

મદીયવરદાનેન શિવઃ સર્વાર્થવાનભૂત્ ।
અતસ્ત્વાં ભિન્નદેહં વૈ હિતાયાઽહં કરોમિ તે ॥ ૪૨॥

યૌવનં સ્ત્રી ચ પુષ્પાણિ સુવાસાનિ મહામતે ।
ગાનં મધુરસશ્ચૈવ મૃદુલાણ્ડજશબ્દકઃ ॥ ૪૩॥

ઉદ્યાનાનિ વસન્તશ્ચ સુવાસાશ્ચન્દનાદયઃ ।
સઙ્ગો વિષયસક્તાનાં નરાણાં ગુહ્યદર્શનમ્ ॥ ૪૪॥

વાયુર્મૃદુઃ સુવાસશ્ચ વસ્ત્રાણ્યપિ નવાનિ વૈ ।
ભૂષણાદિકમેવં તે દેહા નાના કૃતા મયા ॥ ૪૫॥

તૈર્યુતઃ શઙ્કરાદીંશ્ચ જેષ્યસિ ત્વં પુરા યથા ।
મનોભૂઃ સ્મૃતિભૂરેવં ત્વન્નામાનિ ભવન્તુ વૈ ॥ ૪૬॥

ત્વયા કૃતમિદં સ્તોત્રં મદીયં સર્વદં ભવેત્ ।
દગ્ધમૂલે પ્રરોહાણાં કારકં પ્રભવિષ્યતિ ॥ ૪૭॥

એવં ગણેશવાક્યં સ શ્રુત્વા કામસ્તમબ્રવીત્ ।
હિતં સર્વં ત્વયા મે યત્ કૃતં નાથ વિશેષતઃ ॥ ૪૮॥

તથાપિ પૂર્વવદ્દેહં દેહિ ઢુણ્ઢે નમોઽસ્તુ તે ।
દગ્ધોઽહં શઙ્કરેણૈવાનઙ્ગં રક્ષસ્વ વિઘ્નપ ॥ ૪૯॥

મુદ્ગલ ઉવાચ ।
કામસ્ય વચનં શ્રુત્વા ભક્તિભાવેન યન્ત્રિતઃ ।
ગણેશસ્તમથોવાચ તપસા તોષિતં ભૃશમ્ ॥ ૫૦॥

ગણેશ ઉવાચ ।
ત્વયા ત્વઘટિતં પ્રોક્તં તથાપિ ત્વત્સુભક્તિતઃ ।
સન્તુષ્ટોઽહં પ્રિયં સર્વં કરિષ્યામિ મનોભવ ॥ ૫૧॥

યાદવેષુ સ્વયં વિષ્ણુઃ કૃષ્ણો નામ્ના ભવિષ્યતિ ।
લક્ષ્મીર્વેષેણ રુક્મિણ્યાસ્તયોઃ પુત્રો ભવિષ્યસિ ॥ ૫૨॥

પ્રદ્યુમ્ન ઇતિ વિખ્યાતઃ સર્વમાન્યઃ સુદેહભૃત્ ।
ઇયં તે વલ્લભા તત્ર ભાર્યા દેવી ભવિષ્યતિ ॥ ૫૩॥

ઇત્યુક્ત્વા તં ગણેશાનઃ સ્વાનન્દસ્થો બભૂવ હ ।
જગામ કામઃ સસ્ત્રીકો પુનઃ ક્ષેત્રે મયૂરકે ॥ ૫૪॥

તત્ર યાત્રાવિધાનેન પૂજયામાસ વિઘ્નપમ્ ।
વાસાર્થં ગણનાથસ્ય તપસ્તત્ર ચકાર સઃ ॥ ૫૫॥

વર્ષેણૈકેન સન્તુષ્ટસ્તં યયૌ વિઘ્નનાયકઃ ।
પૂજિતશ્ચ સ્તુતસ્તેન પ્રસન્નો વરદોઽભવત્ ॥ ૫૬॥

જગાદ કામસ્તં દેવં ગણપં ભક્તિસંયુતઃ ।
જ્ઞાત્વા નશ્વરરૂપં યદ્દેહાદિકમનુત્તમમ્ ॥ ૫૭॥

કામ ઉવાચ ।
ભૂસ્વાનન્દમિદં ક્ષેત્રં તત્ર વાસં કરોમ્યહમ્ ।
સ્થાનં દેહિ ગણાધીશ તવ સેવાર્થમેવ મે ॥ ૫૮॥

અત્રૈવ મરણેઽનાથ બ્રહ્મભૂતત્વમાદરાત્ ।
દદાસિ ત્વં ગણેશાન અતો માં પાલય પ્રભો ॥ ૫૯॥

તતસ્તં ગણનાથઃ સઃ તથેતિ પ્રત્યુવાચ હ ।
શક્તિં પશ્ચિમદ્વારસ્થાં તદોવાચ ચ વિઘ્નપઃ ॥ ૬૦॥

ત્વદીયે વામભાગે વૈ દક્ષિણાઙ્ગે જગન્મયિ ।
રતિં કામં કુરુષ્વ ત્વં ક્ષેત્રેઽસ્મિન્ વાસકારણાત્ ॥ ૬૧॥

તથેતિ તત્ર સસ્ત્રીકઃ કૃતઃ કામઃ સ માયયા ।
ઉવાસ ક્ષેત્રે સેવાર્થં મયૂરે ગણપસ્ય સઃ ॥ ૬૨॥

તદાદિ સર્વમાન્યોઽયં કામો જાતો મહર્ષયઃ ।
ત્રૈલોક્યવિજયી સર્વં મોહયામાસ નિર્ભયઃ ॥ ૬૩॥

એતત્ કામસ્ય યશ્ચિત્રં ચરિત્રં સંશ‍ૃણોતિ વૈ ।
પઠેદ્વા તસ્ય નૈવં સ્યાત્ કામમોહઃ કદાચન ॥ ૬૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે કામચરિતં નામ ચતુર્થોઽધ્યાયઃ ॥ ૩.૪

## ૩.૫ સ્કન્દમાહાત્મ્યં નામ પઞ્ચમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

તતઃ કામસમાયુક્તઃ શઙ્કરોઽભૂત્તયા સહ ।
પાર્વત્યા પુત્રકામાર્થં રેમે હર્ષસમન્વિતઃ ॥ ૧॥

તતસ્તસ્ય મહેશસ્ય ક્રીડતઃ પ્રગતાનિ વૈ ।
વર્ષાણિ હિ સહસ્રાણાં ષષ્ટિર્દેવર્ષિસત્તમાઃ ॥ ૨॥

મહામાયાયુતઃ શમ્ભુર્ન બુબોધ દિવાનિશમ્ ।
તતસ્તસ્ય મહેશસ્ય રતિભઙ્ગાર્થમાગતાઃ ॥ ૩॥

દેવાસ્તૈઃ પ્રેષિતો વહ્નિર્દ્વિજરૂપધરો યયૌ ।
ભિક્ષાં દેહિ જગાદાસૌ તચ્છ્રુત્વા તૌ સમુત્થિતૌ ॥ ૪॥

પપાત ભૂતલે વીર્યં શિવસ્યૈવોત્થિતસ્ય ચ ।
તદેવ પાર્વતી વિપ્રા દદૌ વૈ ભિક્ષુકાય ચ ॥ ૫॥

શિવવીર્યં તતસ્તેન પ્રાશિતં દહનેન વૈ ।
અભવદ્દાહસંયુક્તો ગઙ્ગાયામક્ષિપત્ સ તત્ ॥ ૬॥

કાર્તિકસ્નાનકાર્યાર્થં કૃત્તિકાભિર્મહાદ્ભુતમ્ ।
ષડ્ભિઃ સમાગતાભિસ્તત્ પીતમાચમનેન વૈ ॥ ૭॥

સ્નાત્વા સ્વસ્વગૃહે તાશ્ચ ગતાઃ સદ્યઃ સમુજ્જ્વલાઃ ।
(Page ખં. ૩ અ. ૫ પાન ૧૧)
પતિભિઃ પરવીર્યેણ યુક્તાઃ સન્ત્યાજિતા યયુઃ ॥ ૮॥

શરસ્તમ્બે મહદ્વીર્યં ત્યક્ત્વા સ્નાત્વા પુનર્ગૃહમ્ ।
યયુસ્તત્ર સમુત્પન્નઃ ષણ્મુખો બાલકો બભૌ ॥ ૯॥

સ દૃષ્ટો ગચ્છતા તત્ર નારદેન શિશુઃ પુરઃ ।
જ્ઞાત્વા ધ્યાનેન કૈલાસે ગતોઽભૂન્ મુનિસત્તમઃ ॥ ૧૦॥

તત્ર શક્ત્યૈ સ વૃત્તાન્તં કથયિત્વા મહામુનિઃ ।
યદૃચ્છાવિચરન્ યાતઃ પાર્વતી બાલમાયયૌ ॥ ૧૧॥

ચકાર બાલમાગૃહ્ય સ્તનપાનં યશસ્વિની ।
વહ્નિગઙ્ગાકૃત્તિકાદ્યા માતરસ્તસ્ય તં યયુઃ ॥ ૧૨॥

શિવેન માતરઃ સર્વાઃ સત્કૃતાઃ સ્વગૃહં યયુઃ ।
બ્રહ્મેશાદ્યૈસ્તતો દેવૈર્મુનિભિઃ સોઽભિષેકિતઃ ॥ ૧૩॥

દેવસેનાપતિત્વે સ પ્રયયૌ સેનયા સહ ।
પ્રાર્થિતસ્તારકસ્યૈવ નાશાય બલવાન્ સ્વયમ્ ॥ ૧૪॥

સ્કન્દસ્ય તારકસ્યૈવ યુદ્ધં પરમદારુણમ્ ।
સઞ્જાતં ચ તતઃ સ્કન્દો ભૃશં શક્ત્યા જઘાન તમ્ ॥ ૧૫॥

સમ્મૂર્ચ્છિતો મહાદૈત્યઃ પુનઃ સંજ્ઞાયુતોઽભવત્ ।
તાડયામાસ તં સ્કન્દં ગદયા ક્રોધસંયુતઃ ॥ ૧૬॥

પતિતં વીક્ષ્ય તે દેવાઃ પલાયનમકુર્વત ।
ગૃહીત્વા કાર્તિકેયં તં દૈત્યઃ સ્વસ્થાનમાયયૌ ॥ ૧૭॥

તત ઓષધિભિર્દેવૈઃ સાવધાનઃ કૃતોઽભવત્ ।
સ્કન્દઃ પરમદુઃખાર્તઃ શઙ્કરં શરણં યયૌ ॥ ૧૮॥

જયોપાયં વદ બ્રહ્મન્ શિવશાન્તિપ્રદં તથા ।
સર્વાર્થસાધકં પૂર્ણં તં ભજામિ વિશેષતઃ ॥ ૧૯॥

તતશ્ચ શમ્ભુના તસ્મૈ ગણેશસ્ય ષડક્ષરઃ ।
મન્ત્રો દત્તો વિશાખાય જ્ઞાનં સઙ્ગુથિતં પરમ્ ॥ ૨૦॥

શમ્ભુરુવાચ ।
શ્ૃણુ સ્કન્દ મહાયોગં યેન શાન્તો ભવિષ્યસિ ।
ચિત્તે ચિન્તામણિં જ્ઞાત્વા શાન્તા જાતા વયં પુરા ॥ ૨૧॥

યદ્યચ્ચિત્તેન વૈ પુત્ર લભ્યતે તત્પ્રણશ્વરમ્ ।
ભવેજ્જાનીહિ ચિત્તં બ્રહ્માકારં યોગસેવયા ॥ ૨૨॥

અન્તર્બાહ્યાદિભેદા યે તે સર્વે ચિત્તસમ્ભવાઃ ।
ઓઙ્કારોઽર્થસમાયુક્તશ્ચિત્તરૂપો ન સંશયઃ ॥ ૨૩॥

સ્વકોત્થાનં બભૌ બ્રહ્મ પરોત્થાનકમેવ ચ ।
ચિત્તરૂપં વિજાનીહિ બુદ્ધ્યા મોહપ્રદં કૃતમ્ ॥ ૨૪॥

સ્વાનન્દશ્ચ નિવૃત્તિશ્ચ ચિત્તરૂપે ન સંશયઃ ।
બહુનાઽત્ર કિમુક્તેન ચિત્તં સર્વાત્મકં બભૌ ॥ ૨૫॥

બ્રહ્માકારં ચ જાનીહિ જગદાકારકં તથા ।

ચિત્તં પઞ્ચવિધં પુત્ર જહિ તદ્ યોગસેવયા ॥ ૨૬॥

ચિત્તે યદ્બિમ્બિતં બ્રહ્મ ભવતિ ભ્રમસંયુતમ્ ।
બિમ્બભાવં પરિત્યજ્ય ભવ ચિન્તામણિઃ સુત ॥ ૨૭॥

ચિત્તં ત્યક્ત્વા મહાભાગ ત્વન્ન ભિન્નો ભવિષ્યસિ ।
એતદેવ પરં જ્ઞાનં શાન્તિરૂપં વદન્તિ ચ ॥ ૨૮॥

રવિરુવાચ ।
શિવસ્ય વચનં શ્રુત્વા તં પ્રણમ્ય યયૌ વનમ્ ।
કાર્તિકેયઃ સ વિઘ્નેશં ધ્યાયંશ્ચ વિધિપૂર્વકમ્ ॥ ૨૯॥

ષડક્ષરવિધાનેન પૂજતિ સ્મ નિરન્તરમ્ ।
મન્ત્રં જજાપ વૈ સ્કન્દસ્તતાપ તપ ઉત્તમમ્ ॥ ૩૦॥

વાયુભક્ષઃ સદા ભૂત્વા જપધ્યાનપરાયણઃ ।
દણ્ડકારણ્યદેશે સ ગજાનનમતોષયત્ ॥ ૩૧॥

તતો વર્ષસહસ્રેણ શાન્તિયોગમવાપ હ ।
કાર્તિકેયઃ સ વિઘ્નેશમભજત્તદપિ દ્વિજાઃ ॥ ૩૨॥

તતસ્તુષ્ટો ગણેશાનો યયૌ તં ભક્તમુત્તમમ્ ।
તં દૃષ્ટ્વા પ્રણનામાથ પૂજયન્ ભક્તિસંયુતઃ ॥ ૩૩॥

(Page ખં. ૩ અ. ૫ પાન ૧૨)
તતસ્તુષ્ટાવ વિઘ્નેશં કાર્તિકેયો મહાદ્યુતિઃ ।
કૃત્વા કરપુટં વિપ્રાઃ સ્વાનુભાવપરાયણઃ ॥ ૩૪॥

સ્કન્દ ઉવાચ ।
નમસ્તે યોગરૂપાય સમ્પ્રજ્ઞાતશરીરિણે ।
અસમ્પ્રજ્ઞાતમૂર્ધ્ને તે તયોર્યોગમયાય ચ ॥ ૩૫॥

વામાઙ્ગે ભ્રાન્તિરૂપા તે સિદ્ધિઃ સર્વપ્રદા પ્રભો ।
ભ્રાન્તિધારકરૂપા વૈ બુદ્ધિસ્તે દક્ષિણાઙ્ગકે ॥ ૩૬॥

માયા સિદ્ધિસ્તથા દેવો માયિકો બુદ્ધિસંજ્ઞિતઃ ।
તયોર્યોગે ગણેશાન ત્વં સ્થિતોઽસિ નમોસ્તુ તે ॥ ૩૭॥

જગદ્રૂપો ગકારશ્ચ ણકારો બ્રહ્મવાચકઃ ।
તયોર્યોગે ગણેશાનનામા તુભ્યં નમો નમઃ ॥ ૩૮॥

ચતુર્વિધં જગત્ સર્વં બ્રહ્મ તન્ત્રં સદાત્મકમ્ ।
હસ્તાશ્ચત્વાર એવં તે ચતુર્ભુજ નમો નમઃ ॥ ૩૯॥

સ્વસંવેદ્યં ચ યદ્બ્રહ્મ તત્ર ખેલકરો ભવાન્ ।
તેન સ્વાનન્દવાસી ત્વં સ્વાનન્દપતયે નમઃ ॥ ૪૦॥

દ્વન્દ્વં ચરસિ ભક્તાનાં હૃદિ તેષાં વ્યવસ્થિતઃ ।
ચૌરવત્તેન તેઽભૂદ્વૈ મૂષકો વાહનં પ્રભો ॥ ૪૧॥

જગતિ બ્રહ્મણિ સ્થિત્વા ભોગાન્ ભુઙ્ક્ષે સુયોગગઃ ।
જગદ્ભિર્બ્રહ્મભિસ્તે તચ્ચેષ્ટિતં જ્ઞાયતે ન ચ ॥ ૪૨॥

ચૌરવદ્ભોગકર્તા ત્વં તેન તે વાહનં પરમ્ ।
મૂષકો મૂષકારુઢ હેરમ્બાય નમો નમઃ ॥ ૪૩॥

કિં સ્તૌમિ ત્વાં ગણાધીશ યોગશાન્તિધરં પરમ્ ।
વેદાદયો યયુઃ શાન્તિમતો દેવં નમામ્યહમ્ ॥ ૪૪॥

ઇતિ સ્તોત્રં સમાકર્ણ્ય ગણેશસ્તમુવાચ હ ।
વરં વૃણુ મહાભાગ ચેદ્ધિ દાસ્યામિ દુર્લભમ્ ॥ ૪૫॥

ત્વયા કૃતમિદં સ્તોત્રં યોગશાન્તિપ્રદં ભવેત્ ।
મયિ ભક્તિકરં સ્કન્દ સર્વસિદ્ધિપ્રદં તથા ॥ ૪૬॥

યદ્યદિચ્છતિ તત્તદ્વૈ દાસ્યામિ સ્તોત્રયન્ત્રિતઃ ।
પઠતે શ઼ૃણ્વતે નિત્યં કાર્તિકેય વિશેષતઃ ॥ ૪૭॥

એવં ગણેશવાક્યં વૈ શ્રુત્વા હર્ષસમન્વિતઃ ।
જગાદ ગણપં વાક્યં કાર્તિકેયઃ સ યોગવિત્ ॥ ૪૮॥

સ્કન્દ ઉવાચ ।
કિં વૃણોમિ ગણેશાન સર્વં ભ્રાન્તિમયં વિભો ।
અતસ્ત્વદીયભક્તિં મે સુદૃઢાં દેહિ વિઘ્નપ ॥ ૪૯॥

જગાદ ગણરાજઃ સ તતસ્તં ભક્તવત્સલઃ ।
મદીયા ભક્તિરુગ્રા તે ભવિષ્યતિ સદાઽનઘ ॥ ૫૦॥

તારકાદ્યાન્ મહાદૈત્યાન્ ત્વમેવ ચ હનિષ્યસિ ।
યદ્યદિચ્છસિ તત્તત્તે સફલં પ્રભવિષ્યતિ ॥ ૫૧॥

એવમુક્ત્વાન્તર્દધેઽસૌ ગણેશો ભક્તમુત્તમમ્ ।

કાર્તિકેયોઽભવત્તત્ર સંસ્થિતો ગણપં સ્મરન્ ॥ ૫૨॥

બ્રાહ્મણૈઃ સ્થાપયામાસ મૂર્તિં ગણપતેઃ પરામ્ ।
લક્ષં વિનાયકં નામ્ના સ ચકાર દ્વિજેરિતઃ ॥ ૫૩॥

તસ્ય દર્શનમાત્રેણ વાઞ્છિતં લભતે નરઃ ।
તત્રૈવ મરણે પ્રાપ્તે બ્રહ્મભૂતઃ સ જાયતે ॥ ૫૪॥

તતો જગામ સ્વગૃહં કાર્તિકેયઃ પ્રતાપવાન્ ।
દેવૈઃ સહ જઘાનાઽસૌ તારકાસુરમુલ્બણમ્ ॥ ૫૫॥

હત્વા તારકદૈત્યં સ ગણેશક્ષેત્રગોઽભવત્ ।
તત્ર વિઘ્નેશમત્યન્તં ભજતે નિત્યમાદરાત્ ॥ ૫૬॥

ઇતિ સ્કન્દસ્ય માહાત્મ્યં કથિતં સર્વદં પરમ્ ।
પઠતે શ‍ૃણ્વતે વાઽપિ બ્રહ્મભૂયકરં ભવેત્ ॥ ૫૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે સ્કન્દમાહાત્મ્યં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૩.૫
(Page ખં. ૩ અ. ૬ પાન ૧૩)

## ૩.૬ મોહાસુરરાજ્યાભિષેકો નામ ષષ્ઠોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

વાલખિલ્યા ઊચુઃ ।
શ્રુતં સર્વં મહાભાગ ભાનો બ્રહ્મપ્રદાયકમ્ ।
તથાપિ ન વયં તૃપ્તા ભવામોઽમૃતપાનવત્ ॥ ૧॥

અધુના બ્રૂહિ માહાત્મ્યં મોહસ્ય જગદીશ્વર ।
શિવવીર્યાત્ સમુત્પન્નઃ કિં ચકાર રવે વદ ॥ ૨॥

મુદ્ગલ ઉવાચ ।
મુનીનાં વચનં શ્રુત્વા તાન્ જગાદ મહામતિઃ ।
સૂર્યઃ સર્વાન્તરાત્મા ચ મોહસ્ય ચરિતં વિધે ॥ ૩॥

સૂર્ય ઉવાચ ।
શિવવીર્યાત્ સમુત્પન્નો મોહઃ પરમશોભનઃ ।
જગામ શરણં તત્ર કાવ્યં વેદવિદાંવરમ્ ॥ ૪॥

તં પ્રણમ્ય જગદાસૌ વૃત્તાન્તં સર્વમઞ્જસા ।
સ્વસ્યોત્પત્તિસ્વરૂપં યદ્વિનીતાત્મા વિશેષતઃ ॥ ૫॥

કથયિત્વા પુનઃ પ્રાહ સ્વામિન્ માં શાધિ શિષ્યકમ્ ।
ત્વદધીનં વિનાથં વૈ કાર્યં વદ મહામુને ॥ ૬॥

ઇતિ તસ્ય વચઃ શ્રુત્વા શુક્રો દયાસમન્વિતઃ ।
ઉપવીતાદિકં સર્વં કારયામાસ દૈત્યપૈઃ ॥ ૭॥

જૃમ્ભાય પુત્રભાવેન દદૌ તં મોહમુલ્બણમ્ ।
તત્ર વેદાદિકં તેનાધીતં સર્વં મહર્ષયઃ ॥ ૮॥

પ્રમાદાસુરનામા વૈ તસ્મૈ પુત્રીં દદૌ સ્વકામ્ ।
રૂપલાવણ્યસંયુક્તાં નામ્ના ચ મદિરાં દ્વિજાઃ ॥ ૯॥

મોહો નત્વા સ્વતાતં સઙ્ગૃહ્ય શુક્રાન્ મહામનુમ્ ।
સૂર્યસ્ય સવને ગત્વા તતાપ પરમં તપઃ ॥ ૧૦॥

ઊર્ધ્વદૃષ્ટિં બબન્ધાઽસૌ સૂર્યં ધ્યાયન્ સ મણ્ડલે ।
મન્ત્રં જજાપ ભાવેન નિરાહારપરાયણઃ ॥ ૧૧॥

દિવ્યવર્ષસહસ્રેણ પ્રસન્નોઽભૂદ્દિવાકરઃ ।
તં યયૌ વરદાનાર્થં સ્વભક્તં ભક્તિભાવિતઃ ॥ ૧૨॥

અસ્થિત્વચાસમાયુક્તં મોહં દૃષ્ટ્વાર્યમા પ્રભુઃ ।
વિસ્મિતોઽભૂન્ મહદ્ધૈર્યં દૈત્યસ્ય પરમાદ્ભુતમ્ ॥ ૧૩॥

બોધયામાસ તં શીઘ્રં રવિર્દેવવરઃ સ્વયમ્ ।
વરં બ્રૂહિ મહામોહ પ્રસન્નોઽહં દદામિ તે ॥ ૧૪॥

શ્રુત્વા મદીયવાક્યં સ પ્રબુદ્ધો સુરનાયકઃ ।
પુરતો માં સ્થિતં વીક્ષ્ય પ્રણનામ કૃતાઞ્જલિઃ ॥ ૧૫॥

ઉત્થાય પૂજયામાસ પરૈર્નાનોપચારકૈઃ ।
કૃતાઞ્જલિઃ પુનર્નત્વા સ તુષ્ટાવ મહર્ષયઃ ॥ ૧૬॥

મોહાસુર ઉવાચ ।
નમઃ સૂર્યાય તપતાં શ્રેષ્ઠ તે સર્વરૂપિણે ।
ભાનવે ભાસ્કરાયૈવ રવયે તે નમો નમઃ ॥ ૧૭॥

કર્મણાં ફલદાત્રે તે કર્મમૂલધરાય ચ ।

કર્માકારાય દેવાય સ્વાત્મને તે નમો નમઃ ॥ ૧૮॥

નાનાભેદધરાયૈવ નાનાભેદવિવર્જિત ।
સદામૃતસ્વરૂપાય પરમાત્મન્નમોઽસ્તુ તે ॥ ૧૯॥

અનન્તાપારરૂપાય જગજ્જીવનમૂર્તયે ।
સત્યાય સત્યપાત્રે તે દિવાકર નમોઽસ્તુ તે ॥ ૨૦॥

ત્રયીબોધાય તે ત્રય્યૈ ત્રયીકર્મપ્રવર્તક ।
સર્વાહઙ્કારમૂલાય સદાહઙ્કારનાશિને ॥ ૨૧॥

જ્ઞાનદાત્રે પ્રકાશાય પ્રકાશાનાં વિશેષતઃ ।
અનાદયે મહેશાય પરેશાય નમો નમઃ ॥ ૨૨॥

વૃષ્ટિબીજાય સર્વેષાં કાલકર્મપ્રવર્તક ।
માયાધારાય માયાયાશ્ચાલકાય નમો નમઃ ॥ ૨૩॥

કિં સ્તૌમિ ત્વાં દિવાનાથ આત્માકારધરં પ્રભો ।
તથાપિ જ્ઞાનપ્રામાણ્યાત્ સંસ્તુતોઽસિ નમામ્યહમ્ ॥ ૨૪॥

યદિ તુષ્ટોઽસિ દેવેશ વરં દાતું સમાગતઃ ।
તદા મે મરણં સ્વામિન્ન ભવેન્માં તથા કુરુ ॥ ૨૫॥

નામરૂપધરં સર્વં તસ્માન્ મૃત્યુર્ન મે ભવેત્ ।
(Page ખં. ૩ અ. ૬ પાન ૧૪)
રાજ્યં ત્રૈલોક્યસંસ્થં યદ્દેહિ તજ્જગદીશ્વર ॥ ૨૬॥

આરોગ્યાદિસમાયુક્તાં દેહસત્તાં મહાપ્રભો ।
સર્વાતિગાં ચ મે દેહિ સઙ્ગ્રામે વિજયં તથા ॥ ૨૭॥

યદ્યદિચ્છામિ દેવેશ તત્તન્મે સુલભં ભવેત્ ।
ત્વદીયપાદપદ્મે તે ભક્તિં દેહિ મહાપ્રભો ॥ ૨૮॥

એવમુક્ત્વા મહાદેવં ભાસ્કરં પ્રણનામ સઃ ।
ઉત્થાય તસ્ય સામીપ્યે સંસ્થિતો વિનયાન્વિતઃ ॥ ૨૯॥

તતઃ સ સવિતા તત્ર વિસ્મિતસ્તમુવાચ હ ।
ત્વયા યત્ પ્રાર્થિતં દૈત્ય તત્ સર્વં લભસે મહત્ ॥ ૩૦॥

ત્વયા કૃતમિદં સ્તોત્રં મમ પ્રીતિવિવર્ધનમ્ ।
સર્વકામપ્રદં ચૈવ ભવિષ્યતિ સુશૃણ્વતે ॥ ૩૧॥

ઇત્યુક્ત્વાન્તર્દધે દેવઃ સવિતા સ્વસ્થલં યયૌ ।
દૈત્યોઽપિ હર્ષિતોભૂત્વા સ્વગૃહં પ્રજગામ હ ॥ ૩૨॥

માતરં પિતરં તત્ર પ્રણનામ મહાસુરઃ ।
સુહૃદો માનયામાસ યથા સમ્બન્ધપૂર્વકમ્ ॥ ૩૩॥

તતઃ શુક્રં જગામાઽસૌ તં પ્રણમ્ય મહાસુરઃ ।
મોહઃ સઙ્કથયામાસ વૃત્તાન્તં તસ્ય સન્નિધૌ ॥ ૩૪॥

ઉપચારૈઃ પ્રપૂજ્યાઽસૌ પ્રણમ્ય સ્વગૃહં પુનઃ ।
આયયૌ હર્ષસંયુક્તો નગરં નિર્મમે તતઃ ॥ ૩૫॥

વિષયાવાસકં નામ મુનિસ્તસ્ય ચકાર વૈ ।
શુક્રઃ પરમતેજસ્વી તત્ર વાસં ચકાર સઃ ॥ ૩૬॥

અસુરાદય એવં વૈ વૃત્તાન્તં યત્ર તત્ર તે ।
શ્રુત્વા સમાગતાસ્તસ્ય નગરે ચક્રિરે સ્થિતિમ્ ॥ ૩૭॥

ચાતુર્વર્ણ્યસમાયુક્તં નગરં શુશુભે દ્વિજાઃ ।
સર્વાતિગં ચાનુપમં પૃથિવ્યાં પૂર્ણભોગદમ્ ॥ ૩૮॥

તતો દૈત્યગણાઃ સર્વે શ્રેષ્ઠાસ્તત્ર સમાગતાઃ ।
શુક્રેણ પ્રેરિતાસ્તં તે પ્રણેમુર્ભાવસંયુતાઃ ॥ ૩૯॥

પ્રચણ્ડશ્ચૈવ ચણ્ડશ્ચ મહાકાલશ્ચ વીર્યવાન્ ।
કાલાન્તકાદયશ્ચાન્યે બહવો દૈત્યનાયકાઃ ॥ ૪૦॥

મિલિતા દૈત્યસંયુક્તાસ્તદાજ્ઞાવશવર્તિનઃ ।
ભૂત્વા તે નગરે તસ્ય સમીપે સંસ્થિતા બભુઃ ॥ ૪૧॥

તતો દ્વિજૈઃ સ્વયં કાવ્યસ્તં ચકાર મહર્ષયઃ ।
દૈત્યાધિપં સ સિષેચ તદર્થં રાજ્યસમ્પદિ ॥ ૪૨॥

તતસ્તે મુદિતાઃ સર્વે દૈત્યાઃ સ્વસ્વસ્થલં યયુઃ ।
મુખ્યાસ્તત્ર સ્થિતા વિપ્રાઃ સેવાર્થં લાલસાયુતાઃ ॥ ૪૩॥

એવં મોહાસુરઃ શ્રેષ્ઠોઽસુરાણાં નાયકોઽભવત્ ।
તમાશ્રિત્ય મહાદૈત્યા હર્ષિતા અચરન્ ધરામ્ ॥ ૪૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે

તૃતીયે ખણ્ડે મહોદરચરિતે મોહાસુરરાજ્યાભિષેકો નામ ષષ્ઠોઽધ્યાયઃ ॥ ૩.૬
(Page  ખં. ૩ અ. ૭ પાન ૧૫)

## ૩.૭ મોહાસુરવિજયવર્ણનં નામ સપ્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

રવિરુવાચ ।
મદિરાયાં સુતાઃ પઞ્ચ તસ્માદ્દૈત્યાન્ મહાબલાઃ ।
તેજસ્વિનશ્ચ પિત્રા તે બભૂવુઃ સમશીલકાઃ ॥ ૧॥

ઉગ્રઃ ક્રૂરશ્ચ મેધાવી શોચનો હરણસ્તથા ।
પઞ્ચૈતે શાસ્ત્રસમ્પન્ના રેજુસ્તન્નગરે દ્વિજાઃ ॥ ૨॥

તતઃ કિઞ્ચિદ્ગતે કાલે રાજા મોહાસુરો દ્વિજાઃ ।
આહ્વયામાસ દૈત્યેશાન્ સકલાન્ સ્વનરૈર્મહાન્ ॥ ૩॥

સમાગતાનુવાચાઽથ વચનં હિતકારકમ્ ।
દૈત્યેશાન્નીતિસંયુક્તં સુખદં પ્રીતિવર્ધનમ્ ॥ ૪॥

મોહાસુર ઉવાચ ।
ભો ભો દૈત્યાધિપાઃ સર્વે પ્રચણ્ડાદ્યા વચો હિતમ્ ।
શ‍ૃણુધ્વં સકલં વિશ્વં જયેયમધુના કિલ ॥ ૫॥

યદિ સ્વમાનસે દૈત્યા હિતં ભવતિ ચેત્તદા ।
સર્વેષાં ભવતાં કાર્યં કુર્વેઽહં નાત્ર સંશયઃ ॥ ૬॥

શુક્રેણ પાલિતા યૂયં તથાઽહમસુરેશ્વરાઃ ।
અજેયાઃ પ્રભવિષ્યામો રવેશ્ચ વરદાનતઃ ॥ ૭॥

તતસ્તે તં નમસ્કૃત્ય સઞ્જગુર્હર્ષસંયુતાઃ ।
મહાત્માનં મહાભાગં તપસ્તેજઃસમન્વિતમ્ ॥ ૮॥

દૈત્યેશા ઊચુઃ ।
સમ્યગ્વિચારિતાઃ સ્વામિંસ્તૃપ્તા વાક્યામૃતેન તે ।
જેષ્યામઃ સકલાન્ લોકાંસ્ત્વદાજ્ઞાવશગા વયમ્ ॥ ૯॥

ન તે પરાક્રમે તુલ્યો વિશ્વસ્મિન્ વિદ્યતે પ્રભો ।
અતો વિષ્ણુમુખાન્ દેવાન્ જેષ્યામોઽન્યાંશ્ચ સામ્પ્રતમ્ ॥ ૧૦॥

રવિરુવાચ ।
ઇતિ મોહાસુરસ્તેષાં વચઃ શ્રુત્વા પ્રતાપવાન્ ।
આજ્ઞાપયચ્ચ દૈત્યેશાન્ મુદા ભવત દંશિતાઃ ॥ ૧૧॥

તે સર્વે યુદ્ધમાર્ગજ્ઞા યયુસ્તસ્ય પ્રસન્નિધૌ ।
નાનાશસ્ત્રધરા ભૂત્વા યમમત્તુમિવોદ્યતાઃ ॥ ૧૨॥

તાન્ દૃષ્ટ્વા હર્ષિતો દૈત્યો વીર્યવાંશ્ચ મહાસુરઃ ।
રથસંસ્થઃ સ્વયં દૈત્યૈર્નિર્જગામ સ દંશિતઃ ॥ ૧૩॥

ચતુરઙ્ગચમૂમધ્યે રરાજ રથસંસ્થિતઃ ।
કાલરુદ્ર ઇવાધ્યક્ષઃ સર્વેભ્યો ભયદાયકઃ ॥ ૧૪॥

સ્વયં શુક્રેણ સંયુક્તઃ પૃથિવીજયનોદ્યતઃ ।
અસુરૈઃ સહિતઃ પૂર્વં બભ્રામ વસુધાતલે ॥ ૧૫॥

અપારા તસ્ય સેના સા છાદયામાસ વૈ ધરામ્ ।
ચલનોત્થરજસ્કેન ચ્છાદિતો ભાસ્કરોઽભવત્ ॥ ૧૬॥

કાલરૂપૈર્મહાદૈત્યૈઃ પ્રયોદ્ધું ભૂમિમણ્ડલે ।
કઃ સમર્થો ભવેદ્વિપ્રા જિતં તૈઃ સ્વેન તેજસા ॥ ૧૭॥

સપ્તદ્વીપવતીં પૃથ્વીં જિત્વા તેઽસુરસત્તમાઃ ।
યયુઃ સર્વે જયાર્થાય દેવાન્ વિષ્ણુપુરોગમાન્ ॥ ૧૮॥

દેવાઃ સર્વે સમાશ્રુત્ય સસૈન્યં ચાગતં દ્વિજાઃ ।
મોહાસુરં ભયોદ્વિગ્ના ઇન્દ્રં તે શરણં યયુઃ ॥ ૧૯॥

ઇન્દ્રેણ સહિતાઃ સર્વે બ્રહ્માણં પ્રયયુસ્તતઃ ।
તેન સાર્ધં ચ કૈલાસે શઙ્કરં શરણં યયુઃ ॥ ૨૦॥

શઙ્કરેણ યુતા દેવા વૈકુણ્ઠે કેશવં યયુઃ ।
કેશવેન યુતાઃ સર્વે ભાસ્કરં પ્રયયુસ્તતઃ ॥ ૨૧॥

ભાસ્કરસ્તાનુવાચાઽથ ભયયુક્તાન્ સુરેશ્વરાન્ ।
નિઃશ્વસ્ય ભયસંયુક્તો વચનં હિતકારકમ્ ॥ ૨૨॥

ભાસ્કર ઉવાચ ।
મદીયવરદાનેન સમર્થો દૈત્યપુઙ્ગવઃ ।
મોહાસુરશ્ચ દેવેન્દ્રાસ્તં જેતું કઃ ક્ષમો ભવેત્ ॥ ૨૩॥

કર્મણાં ફલમુગ્રં યચ્ચ્યવતે કેનચિન્ન તત્ ।
અતો વયં વનેષ્વદ્ય વસામો ભયસંયુતાઃ ॥ ૨૪॥

ત્યક્ત્વા રાજ્યાદિકં સર્વં દેહં રક્ષામહે વયમ્ ।
પુણ્યાન્તે તસ્ય મૃત્યુર્વૈ ભવિષ્યતિ ન સંશયઃ ॥ ૨૫॥

(Page ખં. ૩ અ. ૭ પાન ૧૬)
અન્યથા દૈત્યભૂપેન્દ્રો મોહદૈત્યઃ પ્રતાપવાન્ ।
હનિષ્યતિ સ દેવેન્દ્રં તસ્માત્ કુર્વન્તુ મે વચઃ ॥ ૨૬॥

એવં મદીયં વાક્યં વૈ શ્રુત્વા પ્રાહ બૃહસ્પતિઃ ।
સર્વનીતિવિશેષજ્ઞો દેવાચાર્યો મહાયશાઃ ॥ ૨૭॥

બૃહસ્પતિરુવાચ ।
શ‍ૃણુધ્વં દેવરાજાનો વચનં હિતકારકમ્ ।
ભાનુના ભાષિતં વાક્યં તન્નો ભવતિ વૈ હિતમ્ ॥ ૨૮॥

તતઃ સર્વેઽબ્રુવન્ દેવાઃ સાધુ સાધુ ત્વયેરિતમ્ ।
ભાનુના ચ ગુરોર્વાક્યં કરિષ્યામો વયં તથા ॥ ૨૯॥

એવં નિશ્ચિત્ય દેવેન્દ્રા દેવૈઃ સર્વે યયુર્વનમ્ ।
ગુહાસુ પર્વતોદ્દેશે સંસ્થિતા ભયસંયુતાઃ ॥ ૩૦॥

મોહાસુરોઽસુરૈઃ સર્વૈર્દેવાનાં નગરેષુ ચ ।
આયયૌ તત્ર દેવેન્દ્રાન્ સ નાપશ્યત્ સુહર્ષિતઃ ॥ ૩૧॥

તેષુ દૈત્યાન્ સમાસ્થાપ્ય સ્વયમૈન્દ્રપદે સ્થિતઃ ।
દૈત્યૈઃ સંસેવ્યમાનશ્ચ બુભુજે ભોગમુત્તમમ્ ॥ ૩૨॥

ગન્ધર્વાપ્સરસસ્તસ્ય સેવાં ચક્રુર્ભયાકુલાઃ ।
સ્વર્લોકવાસિનો નાના તથૈવ ચ મહર્ષયઃ ॥ ૩૩॥

તતોઽગાદ્દૈત્યપૈઃ સર્વૈઃ સત્યલોકં મહાબલઃ ।
મોહાસુરો દ્વિજાસ્તત્ર ન દદર્શ પિતામહમ્ ॥ ૩૪॥

શૂન્યં નગરમેવં તત્ દૃષ્ટ્વા હર્ષસમન્વિતઃ ।
યયૌ વૈકુણ્ઠમુગ્રોઽસાવદર્શત્તત્ર તાદૃશમ્ ॥ ૩૫॥

તતઃ કૈલાસમાગત્ય શઙ્કરેણ વિવર્જિતમ્ ।
પુરં વીક્ષ્ય યયૌ સોઽપિ સૌરલોકં મહાસુરઃ ॥ ૩૬॥

તત્રાદિત્યવિહીનં ચ શક્તિલોકં તથા યયૌ ।
દૃષ્ટ્વા શક્તિવિહીનં તં મુમુદે દૈત્યનાયકમ્ ॥ ૩૭॥

તતો દૈત્યેન્દ્રમુખ્યોઽસૌ સ્વસુતાન્ બલગર્વિતાન્ ।
સ્થાપયામાસ દેવાનાં નગરેષુ વિશેષતઃ ॥ ૩૮॥

કૈલાસેઽધિપતિં ચક્રે હ્યુગ્રં પુત્રં મહાસુરઃ ।
વિકુણ્ઠાધિપતિં તદ્વત્ ક્રૂરં દૈત્યસમન્વિતમ્ ॥ ૩૯॥

સૌરલોકાધિપં મેધાવિનં ચક્રે ચ ગર્વિતમ્ ।
શક્તિલોકે તથા સોઽપિ શોચનં યુદ્ધલાલસમ્ ॥ ૪૦॥

સત્યલોકેઽધિપં ચક્રે હરણં સર્વહારકમ્ ।
પ્રચણ્ડમુખ્યકાન્ ચક્રે ઇન્દ્રલોકાદિકાધિપાન્ ॥ ૪૧॥

કાલાન્તકશ્ચ પાતાલદેશેષુ પ્રેષિતસ્તતઃ ।
મોહાસુરેણ નાગેન્દ્રં યયૌ શેષં સ સૈનિકઃ ॥ ૪૨॥

કાલાન્તકં દૈત્યરાજમાગતં ચ હિ નાગરાટ્ ।
વિનયેન યયૌ તં સ સામ ચક્રે સુરેણ વૈ ॥ ૪૩॥

એવં જિગાય બ્રહ્માણ્ડં સ ઉગ્રો દૈત્યનાયકઃ ।
મોહાસુરો મહાવીર્યો મુમુદે દૈત્યપૈર્દ્વિજાઃ ॥ ૪૪॥

તતઃ સ્વનગરે દૈત્યો યયૌ સર્વૈઃ સમન્વિતઃ ।
વિષયાવાસકે તત્ર પુરે સ શુશુભે તતઃ ॥ ૪૫॥

તત્રસ્થઃ પ્રશશાસાઽસૌ બ્રહ્માણ્ડં લોકસઙ્કુલમ્ ।
રાજ્યં ચકાર દૈત્યેન્દ્રો દૈત્યેન્દ્રૈશ્ચ સમન્વિતઃ ॥ ૪૬॥

ભોગાન્ સ બુભુજે નાના હ્યતુલાન્ વિષયપ્રિયઃ ।
દૈત્યૈઃ સહ પ્રગર્વેણ કૃતકૃત્યમમન્યત ॥ ૪૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે મોહાસુરવિજયવર્ણનં નામ સપ્તમોઽધ્યાયઃ ॥ ૩.૭
(Page ખં. ૩ અ. ૮ પાન ૧૭)

## ૩.૮ દેવર્ષિવરપ્રદાનં નામાષ્ટમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

રવિરુવાચ ।
તતોઽતિગર્વિતો મોહાસુરો દૈત્યઃ પ્રતાપવાન્ ।
દેવાનાં જીવઘાતાર્થં પ્રયત્નં સ ચકાર હ ॥ ૧॥

તદર્થં પ્રેષયામાસ દૈત્યાન્ પરમદારુણાન્ ।
કર્મમાર્ગસ્ય તે સર્વે ચક્રુઃ ખણ્ડનમાદરાત્ ॥ ૨॥

સ્વલ્પકાલેન ભો વિપ્રાઃ કર્મહીનં મહીતલમ્ ।
કૃતં દૈત્યૈશ્ચ સર્વત્ર ત્રાસિતાઃ કર્મકારકાઃ ॥ ૩॥

વર્ણાશ્રમવિહીનં તૈઃ કૃતં સર્વત્ર ભૂતલમ્ ।
ધર્મમૂલં તથા નષ્ટં બભૂવ ક્રમતઃ કિલ ॥ ૪॥

ન સ્વાહા ન સ્વધા કુત્ર પ્રબભૂવ મહર્ષયઃ ।
મોહાસુરસ્ય મૂર્તિં તે સ્થાપયામાસુરાદરાત્ ॥ ૫॥

દૈત્યપાસ્તત્ર લોકૈર્વા પૂજાં સર્વત્ર સમ્મતામ્ ।
કારયામાસુરુગ્રૈશ્ચ દણ્ડૈઃ સન્તાડ્ય માનવાન્ ॥ ૬॥

તતો મુનિગણાઃ સર્વે ભ્રષ્ટા જાતા વિશેષતઃ ।
મૃતાઃ કેચિત્તથાઽરણ્યે ગતાઃ પરમદારુણે ॥ ૭॥

તત્ર તે ભયસંયુક્તાઃ ક્રિયાં ચક્રુર્મહર્ષયઃ ।
એવં ધર્મસ્ય વિચ્છેદઃ કૃતસ્તેન સુરારિણા ॥ ૮॥

તતો દેવગણાઃ સર્વે ભયયુક્તા વિશેષતઃ ।
ઉપોષણસમાયુક્તા વિચારં ચક્રિરે દ્વિજાઃ ॥ ૯॥

મિલિતા મુનિભિઃ સાર્ધં મોહાસુરવિનાશને ।
ન પ્રાપુર્દેવવિપ્રેન્દ્રા ઉપાયં સુખદં પરમ્ ॥ ૧૦॥

તતસ્તાનર્યમા પ્રાહ શૃણુધ્વં સુરસત્તમાઃ ।
મુનયશ્ચ મહાભાગા વચો મે હિતકારકમ્ ॥ ૧૧॥

નામરૂપધરં સર્વં તસ્માન્ મૃત્યુર્ન વૈ ભવેત્ ।
મોહાસુરસ્ય દેવેન્દ્રાસ્તત્રોપાયં વદામ્યહમ્ ॥ ૧૨॥

ગણેશ્વરસ્ય હસ્તેન દૈત્યોઽયં પ્રમરિષ્યતિ ।
સ્વયં યોગમયઃ પ્રોક્તસ્તસ્માત્તં પ્રભજામહે ॥ ૧૩॥

સ એવ નિજલોકસ્થો નિજબોધેન દૈત્યપમ્ ।
હનિષ્યતિ ન સન્દેહઃ સ્તૂયતાં સ સુરેશ્વરાઃ ॥ ૧૪॥

સૂર્યસ્ય વચનં શ્રુત્વા દેવા હર્ષસમન્વિતાઃ ।
વિષ્ણ્વાદ્યાશ્ચ પુનસ્તં તે જગુર્વચનમુત્તમમ્ ॥ ૧૫॥

દેવા ઊચુઃ ।
સમ્યગુક્તં ત્વયા ભાનો બુદ્ધ્યા ત્વમધિકો મતઃ ।
સર્વેભ્યો જીવદાતા ભો જાતોઽસ્યત્ર ન સંશયઃ ॥ ૧૬॥

તતો દેવાશ્ચ વિપ્રાશ્ચ તપસા ગણનાયકમ્ ।
આરાધયન્ પ્રયત્નેન વિઘ્નવારણકારણમ્ ॥ ૧૭॥

એકાક્ષરવિધાનેનાપૂજયંસ્તં નિરન્તરમ્ ।
અજપન્ મન્ત્રમાદ્યં તુ ધ્યાયન્તો ગણપં હૃદિ ॥ ૧૮॥

નાનાતપઃસમાયુક્તા ઉપોષણપરાયણાઃ ।
ઋષયો દેવદેવેશા વિઘ્નેશ્વરમતોષયન્ ॥ ૧૯॥

વર્ષાણાં શતકેષ્વેવં ગતેષુ ગણનાયકઃ ।
આયયૌ તાન્ વરં દાતું ભૃશં ભાવેન તોષિતઃ ॥ ૨૦॥

સૌમ્યતેજોયુતશ્ચૈવાખુગઃ પૂર્ણો ગજાનનઃ ।
ચતુર્બાહુર્દયાપૂર્ણો મહોદરવિરાજિતઃ ॥ ૨૧॥

એકદન્તો વિશાલાક્ષઃ શૂર્પકર્ણધરઃ પ્રભુઃ ।
સિદ્ધિબુદ્ધિસમાયુક્તો નાભિશેષવિરાજિતઃ ॥ ૨૨॥

ચિન્તામણિં ગલે બદ્ધ્વા નાગયજ્ઞોપવીતવાન્ ।
એવં સમાયયૌ દેવો દેવર્ષીણાં પુરો વિભુઃ ॥ ૨૩॥

તં દૃષ્ટ્વા દેવવિપ્રાસ્તે હર્ષિતા ભક્તિસંયુતાઃ ।
પ્રણેમુઃ પૂજયામાસુર્યથાશાસ્ત્રવિધાનતઃ ॥ ૨૪॥

તતસ્તં તુષ્ટુવુઃ સર્વે કૃતાઞ્જલય આદરાત્ ।
તદ્દર્શનમહોત્સાહા યથામતય ભો દ્વિજાઃ ॥ ૨૫॥

દેવર્ષય ઊચુઃ ।

નમસ્તે ગણનાથાય મહોદરસ્વરૂપિણે ।
અનાથાય ચ નાથાય સર્વેષાં તે નમો નમઃ ॥ ૨૬॥

(Page ખં. ૩ અ. ૮ પાન ૧૮)
અનાદિસિદ્ધિનાથાય બુદ્ધિનાથાય ઢુણ્ઢયે ।
હેરમ્બાય સ્વભક્તેભ્યઃ સર્વદાય નમો નમઃ ॥ ૨૭॥

ચતુર્બાહુધરાયૈવ શૂર્પકર્ણાય તે નમઃ ।
લમ્બોદરાય વિઘ્નેશ વિઘ્નવારણ તે નમઃ ॥ ૨૮॥

ગજાનનાય દેવાયાઽખુવાહાય મહાત્મને ।
શેષનાભિસ્થિતાયૈવૈકદન્તાય નમો નમઃ ॥ ૨૯॥

મહાગણપતે તુભ્યં સર્વકારણકારણ ।
ભક્તવાઞ્છાવિધાતાનાં હરાય તુ નમો નમઃ ॥ ૩૦॥

માયાશ્રયાય માયાયાધારકાય મહાભુજ ।
અભક્તકામદહનરૂપાય ચ નમો નમઃ ॥ ૩૧॥

યોગાનાં પતયે તુભ્યં યોગદાત્રેઽવ્યયાય તે ।
સ્વાનન્દવાસિને ચૈવ યોગાકારાય તે નમઃ ॥ ૩૨॥

સર્વેષાં જઠરેષુ ત્વં સ્થિત્વા ભોગાન્ કરોષિ વૈ ।
ભોક્તા ત્વદુદરે વૈ ન કોઽપિ તેન મહોદરઃ ॥ ૩૩॥

દેહદેહિસમાયોગે બોધબ્રહ્મણિ સંસ્થિતમ્ ।
કો જાનાતિ ચ તં દેવં સોઽપિ દર્શનતાં ગતઃ ॥ ૩૪॥

ભક્તવત્સલભાવેન પ્રકટસ્ત્વં સમાગતઃ ।
વયં તેન કૃતાર્થાશ્ચ દેવદેવેશ નિશ્ચિતમ્ ॥ ૩૫॥

વયં ધન્યા યતો દૃષ્ટઃ સર્વોદરવિલાસકૃત્ ।
મહોદરઃ પ્રસન્નાત્મા સાક્ષાદ્બ્રહ્મપતિઃ પ્રભુઃ ॥ ૩૬॥

કિં સ્તૌમિ ત્વાં ગણાધીશ વેદાદીનાં તથોદરે ।
સંસ્થિતં પ્રણમામસ્તં યોગગમ્યં સનાતનમ્ ॥ ૩૭॥

રવિરુવાચ ।
એવં સ્તુતિં સમાકર્ણ્ય પ્રણયેન સુતોષિતઃ ।
જગાદ તાન્ ગણેશાનો ભક્તિભાવનિયન્ત્રિતઃ ॥ ૩૮॥

મહોદર ઉવાચ ।
વૃણુધ્વં સર્વદેવેશા મુનયશ્ચ યથેપ્સિતમ્ ।
દાસ્યામિ સકલં તદ્વો ભક્ત્યા સ્તોત્રેણ તોષિતઃ ॥ ૩૯॥

ભવત્કૃતમિદં સ્તોત્રં ભવેન્ મત્પ્રીતિવર્ધનમ્ ।
પઠતાં શ‍ૃણ્વતાં દેવાઃ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૪૦॥

ઇતિ તસ્ય વચઃ શ્રુત્વા દેવા મુનિગણૈઃ સહ ।
હર્ષયુક્તાઃ પ્રણમ્યૈનં જગુસ્તે તં ગણેશ્વરમ્ ॥ ૪૧॥

દેવર્ષય ઊચુઃ ।
યદિ પ્રસન્નતાં યાતો દેવદેવેશ વિઘ્નપ ।
તદા તે પાદપદ્મે નો ભક્તિં દેહિ વિશેષતઃ ॥ ૪૨॥

મોહાસુરેણ દુષ્ટેન સ્થાનભ્રષ્ટાઃ કૃતા વયમ્ ।
મુનયઃ કર્મહીનાશ્ચ જહિ તં ગર્વસંયુતમ્ ॥ ૪૩॥

બ્રહ્માણ્ડં વિજિતં તેન તત્ર લોકાઃ સુદુઃખિતાઃ ।
કૃતાસ્તાન્ સુખદાતા વૈ ભવ સ્વામિન્નમોઽસ્તુ તે ॥ ૪૪॥

તેષાં વચનમાકર્ણ્ય તાનુવાચ તથેતિ હ ।
મહોદરઃ પ્રસન્નાત્મા ભક્તવત્સલભાવતઃ ॥ ૪૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે દેવર્ષિવરપ્રદાનં નામાષ્ટમોઽધ્યાયઃ ॥ ૩.૮
(Page ખં. ૩ અ. ૯ પાન ૧૯)

## ૩.૯ મોહાસુરજ્ઞાનપ્રદાનં નામ નવમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

રવિરુવાચ ।
તતો મહોદરઃ ક્રોધસમાયુક્તઃ પ્રતાપવાન્ ।
પરશ્વાદિ સ્વાયુધાનિ દધાનો પ્રબભૌ દ્વિજાઃ ॥ ૧॥

મૂષકોપરિ સંસ્થાય દેવર્ષિગણસંયુતઃ ।
મોહાસુરં નિહન્તું સ યયૌ તન્નગરે પ્રભુઃ ॥ ૨॥

એતસ્મિન્નન્તરે તત્ર સમાસીનો મહાસુરઃ ।

મોહો દૈત્યાધિપૈઃ સર્વૈર્વેષ્ટિતઃ પ્રબભૌ દ્વિજાઃ ॥ ૩॥

અકસ્માન્નારદો દૈત્યં યયૌ ગાનપરાયણઃ ।
તં દૃષ્ટ્વા પ્રણનામાઽથ મોહઃ સર્વસમન્વિતઃ ॥ ૪॥

સમાસીનં મહાદૈત્યઃ પપ્રચ્છ વિનયાન્વિતઃ ।
વદ ચિત્રં મુને કિઞ્ચિત્ ભ્રમસિ ત્વં ચ સર્વગઃ ॥ ૫॥

દૈત્યસ્ય વચનં શ્રુત્વા નારદસ્તમુવાચ હ ।
હર્ષયુક્તઃ કથાં પુણ્યાં દૈત્યસ્ય વિષરૂપિણીમ્ ॥ ૬॥

નારદ ઉવાચ ।
મોહાસુર મહાભાગ શ‍ૃણુ મે વચનં હિતમ્ ।
ચિત્રં વદામિ યદ્ દૃષ્ટં ભાવપૂર્વેણ ચેતસા ॥ ૭॥

દેવૈઃ સમ્પ્રાર્થિતો દેવો મુનિભિર્વનસંસ્થિતૈઃ ।
મહોદરવધાર્થાય તવ દૈત્યપતેઽધુના ॥ ૮॥

સ દેવો મૂષકારૂઢો વધાર્થં તે સમાગતઃ ।
દશયોજનદૂરસ્થો બભૂવાસુર ચાધુના ॥ ૯॥

ઇત્યુક્ત્વા નારદસ્તં સ મૌનભાવપરાયણઃ ।
બભૂવ દૈત્યરાજસ્તુ ભયોદ્વિગ્નસ્તદાઽભવત્ ॥ ૧૦॥

નિયમ્ય દુઃખમુગ્રં સ ઉવાચ નારદં પુનઃ ।
મોહાસુરો ભયોદ્વિગ્નો હૃદયેન વિદૂયતા ॥ ૧૧॥

મોહાસુર ઉવાચ ।
શ‍ૃણુ નારદ મે વાક્યં ન મૃત્યુર્મે પ્રવર્તતે ।
નામરૂપાત્મકેભ્યશ્ચ કિં કરિષ્યતિ દેવપઃ ॥ ૧૨॥

મહોદરાત્મકો નામ રૂપધારી સમાગતઃ ।
સ દેવં તં હનિષ્યામિ નાત્ર કાર્યા વિચારણા ॥ ૧૩॥

તસ્ય દૈત્યાધિપસ્યૈતદ્વચનં નારદો મુનિઃ ।
શ્રુત્વોવાચ મહાયોગી મોહાસુરં વિચારતઃ ॥ ૧૪॥

શ‍ૃણુ મોહાસુર ત્વં મે વચનં હિતકારકમ્ ।
મહોદરો નરો નૈવ ન દેવો ન ચ રાક્ષસઃ ॥ ૧૫॥

નામરૂપવિહીનં યદ્બ્રહ્મ વેદેષુ કથ્યતે ।

નામરૂપમયં પૂર્ણં સ એવાયં સમાગતઃ ॥ ૧૬॥

હનિષ્યતિ યદા ક્રુદ્ધસ્ત્વાં તસ્માચ્છરણં વ્રજ ।
મહોદરં મહાભાગં તેન ત્વં સુખમેષ્યસિ ॥ ૧૭॥

તતસ્તં દૈત્યરાજઃ સ જગાદ ભયસઙ્કુલઃ ।
વદ નારદ યોગજ્ઞ ભ્રમનાશાય મે વચઃ ॥ ૧૮॥

નામરૂપવિહીનોઽયં કથ્યસે ચ મહોદરઃ ।
સમાગતઃ કથં દેહી નામરૂપસમન્વિતઃ ॥ ૧૯॥

નામરૂપમયં બ્રહ્મ નામરૂપવિવર્જિતમ્ ।
સર્વત્રયોગભાવેન તિષ્ઠત્યત્ર ન સંશયઃ ॥ ૨૦॥

સ્વપરભ્રાન્તિજો મોહો ન કદા તત્ર વર્તતે ।
દેવદૈત્યાદિભેદેષુ સમભાવયુતં સદા ॥ ૨૧॥

અયં મહોદરશ્ચૈવ દેવપક્ષવિવર્ધનઃ ।
દૈત્યાનાં પ્રવધાર્થાય કિમર્થં કુરુતે મતિમ્ ॥ ૨૨॥

વિપરીતમિદં વિપ્ર વચનં તે ચ સામ્પ્રતમ્ ।
ભાસતે પશ્ય યોગીન્દ્ર નુદ મે સંશયં પ્રભો ॥ ૨૩॥

મહોદરસ્ય મામન્યત્ બ્રહ્મર્ષે વદ ચેષ્ટિતમ્ ।
કિંરૂપઃ કિંસ્વભાવશ્ચ કસ્યાંશઃ કિમ્પરાક્રમઃ ॥ ૨૪॥

કુત્ર વાસકરઃ સોઽપિ કીદૃશં બ્રહ્મ તસ્ય યત્ ।
એતત્ સર્વં સુવિસ્તાર્ય જ્ઞાનં મે કરુણાનિધે ॥ ૨૫॥

ભાનુરુવાચ ।
એવં પૃષ્ટો મહાયોગી ગાણપત્યઃ પ્રતાપવાન્ ।
મોહાસુરં યથાપૂર્વં તં જગાદ મહાસુરમ્ ॥ ૨૬॥

(Page  ખં. ૩ અ. ૯ પાન ૨૦)
નારદ ઉવાચ ।
મોહાસુર મહાભાગ મતિસ્તે યોગિસમ્મતા ।
યોગરૂપં ત્વયા પૃષ્ટં તેનાઽહં તોષિતો ભૃશમ્ ॥ ૨૭॥

અતસ્ત્વાં સકલં દૈત્ય કથયામિ વિશેષતઃ ।
શ‍ૃણુષ્વૈકમના ઢુણ્ઢેશ્ચેષ્ટિતં યોગદં પરમ્ ॥ ૨૮॥

નામરૂપમયં વિદ્ધિ જગત્સર્વં ચતુર્વિધમ્ ।
નામરૂપવિહીનં યદ્દેહિરૂપં જગદ્ધિતમ્ ॥ ૨૯॥

તયોર્યોગે ચ દૈત્યેન્દ્ર બોધઃ સર્વત્ર સમ્મતઃ ।
બ્રહ્મ યદ્વેદવાદેષુ કથ્યતે વિદ્ધિ ચેતસા ॥ ૩૦॥

તદેવ નામરૂપાદિયુક્તં ભવતિ સર્વદા ।
તદેવ નામરૂપાદિ હીનં ભવતિ સર્વદા ॥ ૩૧॥

તદ્બ્રહ્મ પૂર્ણભાવેન સંસ્થિતં યોગવાચકમ્ ।
દૈત્યપુઙ્ગવ જાનીહિ તદેવાઽસૌ મહોદરઃ ॥ ૩૨॥

દેહદેહિકૃતો ભોગઃ સ્વસ્વસ્વાનન્દદઃ પરઃ ।
સર્વત્રગઃ સ ઉદરે ભુક્તભોગશ્ચ કથ્યતે ॥ ૩૩॥

ઉદરેન કૃતો ભોગો યદિ બાહ્યપરાયણૈઃ ।
તદા તે મરણૈર્યુક્તા ભવન્તિ સ્વલ્પકાલતઃ ॥ ૩૪॥

સ્વસ્વાનન્દમયો ભોગો ભુજ્યતે સર્વભાવતઃ ।
સર્વૈર્બ્રહ્મભિરત્યન્તં જગદ્ભિશ્ચૈવ નિશ્ચિતમ્ ॥ ૩૫॥

ભિન્નભોગશ્ચ વિશ્વસ્મિન્નાત્મનિ હ્યમૃતાત્મકઃ ।
એકભાવમયો ભોગો ભોગયુક્તાનુભૌ મતૌ ॥ ૩૬॥

દેહેષુ જઠરં ભિન્નં જઠરં મતમાત્મનિ ।
એકભાવાત્મકં દૈત્ય જાનીહિ યોગસેવયા ॥ ૩૭॥

યદિ ભોગવિહીનૌ તૌ વિશ્વાત્માનૌ મહામતે ।
વિશેષતો યત્નવન્તૌ કિમર્થં વૈ બભૂવતુઃ ॥ ૩૮॥

નામરૂપધરં વિશ્વં જાતં ભોગાર્થમેવ ચ ।
નામરૂપવિહીનં યદ્દેહી જાતસ્તદર્થતઃ ॥ ૩૯॥

નાસ્તિ ભોગસ્ય ચેચ્છા ચેત્ કિમર્થં દ્વિવિધં ભવેત્ ।
અતો જાનીહિ દૈત્યેન્દ્ર ભોગયુક્તૌ વિશેષતઃ ॥ ૪૦॥

વિશ્વાત્મનોશ્ચ સંસ્થોઽયં જઠરે ગણનાયકઃ ।
મહોદરાખ્યા સઞ્જાતા તેન તસ્ય મહાત્મનઃ ॥ ૪૧॥

દ્વિવિધસ્ય ચ દૈત્યેન્દ્ર જઠરં સ્વલ્પવાચકમ્ ।
સ્વસ્વભોગપરત્વાદ્વૈ વિચારય મહામતે ॥ ૪૨॥

સકલાનાં વિશેષેણોદરેષુ સ સદા સ્થિતઃ ।
મહોદરશ્ચ તેનાઽયં કથિતો વેદવાદિભિઃ ॥ ૪૩॥

વિશ્વં દેહમયં તસ્ય મસ્તકં ચાત્મવાચકમ્ ।
તયોર્યોગે ગણેશોઽયં કથ્યતે સ ગજાનનઃ ॥ ૪૪॥

જાયતે સકલં યસ્માદન્તે ગચ્છતિ યત્ર ચ ।
દૈત્યનાયક જાનીહિ ગજરૂપં તદેવ વૈ ॥ ૪૫॥

વિશ્વાત્માનૌ ચ સંસૃષ્ટૌ તાભ્યાં જ્ઞાનાર્થમેવ સઃ ।
તપસાઽઽરાધિતો દેવો દેહધારી બભૂવ હ ॥ ૪૬॥

ન તસ્ય પ્રાકૃતો દેહઃ સર્વવત્પશ્ય દૈત્યપ ।
ભુક્તિમુક્ત્યર્થમેવં સ સ્વેચ્છયા દેહભોગવત્ ॥ ૪૭॥

સ્વસંવેદ્યેન યોગેન લભ્યતે ગણનાયકઃ ।
તદેવ નગરં તસ્માત્તસ્ય જાનીહિ સર્વગમ્ ॥ ૪૮॥

સિદ્ધિર્ભ્રાન્તિપ્રદા માયા તતો ભ્રમતિ વૈ જનઃ ।
બુદ્ધિર્ભ્રાન્તિધરા પ્રોક્તા ચિત્તરૂપા વિશેષતઃ ॥ ૪૯॥

ચિત્તં પઞ્ચવિધં પ્રોક્તં તદૈશ્વર્યં ભ્રમાત્મકમ્ ।
ત્યક્ત્વા શાન્તિમવાપ્નોતિ યોગીશો યોગસેવયા ॥ ૫૦॥

તસ્માત્સિદ્ધેશ્ચ બુદ્ધેશ્ચ સ્વામી પ્રોક્તો મહોદરઃ ।
તં ભજસ્વ મહાદૈત્ય નોચેત્ત્વાં સ હનિષ્યતિ ॥ ૫૧॥

સુરાસુરમયં તેન સૃષ્ટં વિશ્વં વિશેષતઃ ।
સ્વસ્વધર્મસમાયુક્તં તેન ખેલતિ વિઘ્નપઃ ॥ ૫૨॥

દેવા દૈત્યવિનાશાર્થં યતન્તે સ્મ યદા પ્રભો ।
(Page  ખં. ૩ અ. ૧૦ પાન ૨૧)
તદા દૈત્યાય ભવતિ સિદ્ધીશઃ સિદ્ધિદાયકઃ ॥ ૫૩॥

દેહધારી સ્વયં ભૂત્વા વરદો ભવતિ પ્રભુઃ ।
અસુરેભ્યો ન સન્દેહસ્તં જાનીહિ મહોદરમ્ ॥ ૫૪॥

દૈત્યા દેવવિનાશાર્થં યતન્તે સર્વભાવતઃ ।
તદા દેહધરશ્ચાઽયં હન્તિ દૈત્યાન્ન સંશયઃ ॥ ૫૫॥

દેવાઃ સઙ્ખ્યાયુતા વેદે વર્તન્તે દૈત્યનાયક ।
વૃદ્ધિક્ષયવિહીનત્વાદ્ હન્તિ તાન્ન વિશેષતઃ ॥ ૫૬॥

દૈત્યા અપારરૂપાશ્ચ વૃદ્ધિક્ષયયુતા મતાઃ ।
તસ્માત્તાન્ હન્તિ વેગેન ગણેશો બ્રહ્મનાયકઃ ॥ ૫૭॥

સ્વસ્વધર્મરતા એતે યદા ખલુ સુરાસુરાઃ ।
તદા તિષ્ઠત્યયં યોગરૂપશ્ચ જઠરે વિભુઃ ॥ ૫૮॥

સર્વં તે કથિતં દૈત્ય બ્રહ્મભૂતોઽયમુચ્યતે ।
તસ્યાંશૈઃ સર્વમુત્પન્નં જગદ્બ્રહ્મ ચ કથ્યતે ॥ ૫૯॥

તસ્માત્તં શરણં ગચ્છ યદિ જીવિતુમિચ્છસિ ।
ભોગાર્થં દૈત્યરાજ ત્વં મોક્ષાર્થં લાલસા યદિ ॥ ૬૦॥

એવમુક્ત્વાન્તર્દધેઽસૌ નારદઃ કરુણાનિધિઃ ।
ગણેશગાનસંયુક્તો વીણાવાદે પ્રલાલસઃ ॥ ૬૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે મોહાસુરજ્ઞાનપ્રદાનં નામ નવમોઽધ્યાયઃ ॥ ૩.૯

## ૩.૧૦ મોહાસુરશાન્તિવર્ણનં નામ દશમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

રવિરુવાચ ।
ગતે મુનૌ મહાભાગા મોહો જાતઃ સુહર્ષિતઃ ।
વિચારમકરોચ્ચિત્તે નારદોક્તવિચારવિત્ ॥ ૧॥

એકાન્તે સંસ્થિતો દૈત્યો ગણેશધ્યાનતત્પરઃ ।
મહોદરસ્ય માહાત્મ્યં જ્ઞાત્વા મનસિ હર્ષિતઃ ॥ ૨॥

સ શુક્રમુપસઙ્ગમ્યાકથયત્ પ્રકથાનકમ્ ।
નારદોક્તં ચ કાવ્યેન તેનૈવં બોધિતો દ્વિજાઃ ॥ ૩॥

તતઃ સ્વગૃહમાગત્ય ગણેશે મોહિતોઽભવત્ ।
મોહાસુરશ્ચ મોહેન વર્જિતઃ પ્રબભૌ સ્વયમ્ ॥ ૪॥

એતસ્મિન્નન્તરે તત્ર વિષ્ણુઃ સ્વયમુપાયયૌ ।
પ્રેષિતો ગણરાજેન સામાર્થં દૈત્યસન્નિધૌ ॥ ૫॥

કેશવં માનયામાસ મોહાસુરઃ પ્રતાપવાન્ ।
અપૂજયન્ મહાદૈત્યો નિવેશ્ય શુભ આસને ॥ ૬॥

પપ્રચ્છ તં મહાવિષ્ણું કિમર્થં ત્વમિહાગતઃ ।
વદ વિષ્ણો મહાભાગ કારણં તે કરોમ્યહમ્ ॥ ૭॥

વિષ્ણુરુવાચ ।
મહોદરઃ સમાયાતો ધર્મરક્ષણતત્પરઃ ।
દેવૈશ્ચ મુનિભિઃ સાર્ધં તેનાઽહં પ્રેષિતોઽસુર ॥ ૮॥

સામાર્થં તે મહાભાગાઽસિ ધન્યો દૈત્યનાયક ।
મિત્રભાવં ત્વયા સાર્ધં સ ઇચ્છતિ મહોદરઃ ॥ ૯॥

દેહદેહિમયં બ્રહ્મ તદેવ ગણનાયકઃ ।
મહોદરઃ સમાખ્યાતો મુનિભિસ્તત્ત્વદર્શિભિઃ ॥ ૧૦॥

સર્વેષામુદરે સ્થિત્વા ભોગાન્ સર્વાન્ ભુનક્તિ સઃ ।
મહોદરશ્ચ તેનાઽસૌ વયં સ્વલ્પોદરાઃ સ્મૃતાઃ ॥ ૧૧॥

નગરસ્ય પુરો રાજન્ દશયોજનદૂરગઃ ।
સંસ્થિતો દેવવિપ્રાદ્યૈઃ સંસ્તુતઃ પ્રબભૌ વિભુઃ ॥ ૧૨॥

સ ઉવાચ તદેવાઽહં કથયામિ શૃણુષ્વ તત્ ।
વચનં સર્વભાવજ્ઞ સર્વેભ્યઃ સુખદાયકમ્ ॥ ૧૩॥

(Page ખં. ૩ અ. ૧૦ પાન ૨૨)
વિરુદ્ધં ત્યજ દૈત્યેન્દ્ર તિષ્ઠ સ્થાને સ્વકે સુખમ્ ।
દેવા હવિર્ભુજઃ સન્તુ બ્રાહ્મણાઃ કર્મકારકાઃ ॥ ૧૪॥

તિષ્ઠન્તુ લોકા વર્ણાશ્રમયુતા દુઃખવર્જિતાઃ ।
એતત્ કુરુ મહાદૈત્ય નોચેદ્યુદ્ધ્યસ્વ દૈત્યપૈઃ ॥ ૧૫॥

એતત્તે કથિતં વાક્યં ગણેશેન વિશેષતઃ ।
તત્ કુરુષ્વ મહાભાગ ભવ મિત્રં મહાત્મનઃ ॥ ૧૬॥

રવિરુવાચ ।
શ્રુત્વા વિષ્ણુવચો રમ્યં તમુવાચ મહાબલઃ ।
મોહાસુરઃ પ્રસન્નાત્મા સર્વેષાં મોહકારકમ્ ॥ ૧૭॥

મોહાસુર ઉવાચ ।

સમ્યગ્ બ્રવીષિ વિષ્ણો ત્વં મદીયહિતકારકમ્ ।
કરિષ્યામિ તથા દેવં માનયિષ્યે મહોદરમ્ ॥ ૧૮॥

એવમુક્ત્વા સ દૈત્યેન્દ્રાનાહ્વયામાસ સત્વરમ્ ।
સમાગતાનુવાચાથ વિષ્ણુના કથિતં વચઃ ॥ ૧૯॥

મોહાસુરસ્ય વાક્યં તચ્છ્રુત્વા તે દૈત્યસત્તમાઃ ।
ક્રોધયુક્તાશ્ચ પાતાલં વિવિશુર્ભયસઙ્કુલાઃ ॥ ૨૦॥

શુક્રેણ સહિતો મોહાસુરો દૈત્યઃ પ્રતાપવાન્ ।
વિષ્ણુના ચ તથા વિપ્રા ગણેશં શરણં યયૌ ॥ ૨૧॥

સમાગત્ય સ દૈત્યેન્દ્રો નનામ સ મહોદરમ્ ।
ભક્તિભાવસમાયુક્તઃ પૂજયામાસ યત્નતઃ ॥ ૨૨॥

પૂજયિત્વા યથાન્યાયં પુનસ્તં પ્રણનામ સઃ ।
કૃત્વા કરપુટં મોહસ્તુષ્ટાવ ચ મહોદરમ્ ॥ ૨૩॥

મોહાસુર ઉવાચ ।
નમસ્તે બ્રહ્મરૂપાય મહોદર સુરૂપિણે ।
સર્વેષાં ભોગભોક્ત્રે વૈ દેહદેહિમયાય તે ॥ ૨૪॥

મૂષકારૂઢદેવાય ત્રિનેત્રાય નમો નમઃ ।
ચતુર્ભુજાય દેવાનાં પતયે તે નમો નમઃ ॥ ૨૫॥

અનાદયે ચ સર્વેષામાદિરૂપાય તે નમઃ ।
વિનાયકાય હેરમ્બ દીનપાલાય વૈ નમઃ ॥ ૨૬॥

ગણેશાય નિજાનન્દપતયે બ્રહ્મનાયક ।
સિદ્ધિબુદ્ધિપ્રદાત્રે વૈ બ્રહ્મભૂતાય વૈ નમઃ ॥ ૨૭॥

બ્રહ્મભ્યો બ્રહ્મદાત્રે વૈ યોગશાન્તિમયાય ચ ।
યોગિનાં પતયે તુભ્યં યોગિભ્યો યોગદાયક ॥ ૨૮॥

સિદ્ધિબુદ્ધિપતે નાથ એકદન્તાય તે નમઃ ।
શૂર્પકર્ણાય શૂરાય વીરાય ચ નમો નમઃ ॥ ૨૯॥

સર્વેષાં મોહકર્ત્રે વૈ ભક્તેભ્યઃ સુખદાયિને ।
અભક્તાનાં વિશેષેણ વિઘ્નકર્ત્રે નમો નમઃ ॥ ૩૦॥

માયાવિને ચ માયાયા આધારાય નમો નમઃ ।

માયિભ્યો માયયા ચૈવ ભ્રાન્તિદાય નમો નમઃ ॥ ૩૧॥

કિં સ્તૌમિ ત્વાં ગણાધ્યક્ષ યત્ર વેદાઃ સહાઙ્ગકાઃ ।
શાન્તિં પ્રાપ્તાસ્તથાપિ ત્વં સંસ્તુતોઽસિ દયાપરઃ ॥ ૩૨॥

ધન્યૌ મે પિતરૌ જ્ઞાનં તપઃ સ્વાધ્યાય એવ ચ ।
ધન્યં વપુશ્ચ દેવેશ યેન દૃષ્ટં પદામ્બુજમ્ ॥ ૩૩॥

ઇત્યુક્ત્વા પ્રણનામાથ તમુવાચ મહોદરઃ ।
ભક્તં ભાવયુતં દૃષ્ટ્વા વચઃ પરમશોભનમ્ ॥ ૩૪॥

મહોદર ઉવાચ ।
મોહાસુર વૃણુષ્વ ત્વં વરં યં મનસીપ્સિતમ્ ।
દાસ્યામિ ભક્તિમોહેન મોહિતોઽહં ત્વયાઽધુના ॥ ૩૫॥

ત્વાં હન્તું ક્રોધસંયુક્ત આગતોઽહં ન સંશયઃ ।
શરણાગતમેવં ત્વાં હન્મિ નો ભક્તિસંયુતમ્ ॥ ૩૬॥

મદીયં સ્તોત્રમેતદ્વૈ સર્વદં યત્ત્વયા કૃતમ્ ।
ભવિષ્યતિ જનાયૈવ પઠતે શ‍ૃણ્વતેઽસુર ॥ ૩૭॥

મોહનાશકરં ચૈવ ભુક્તિમુક્તિપ્રદં ભવેત્ ।
ધનધાન્યાદિદં સર્વં પુત્રપૌત્રસુખપ્રદમ્ ॥ ૩૮॥

(Page ખં. ૩ અ. ૧૧ પાન ૨૩)
રવિરુવાચ ।
એવં ગણેશવાક્યં સ શ્રુત્વા હર્ષસમન્વિતઃ ।
મોહાસુર ઉવાચાઽથ નિબદ્ધકરસમ્પુટઃ ॥ ૩૯॥

મોહાસુર ઉવાચ ।
મહોદર નમસ્તુભ્યં યદિ દાસ્યસિ મે વરમ્ ।
તદા તે પાદપદ્મે વૈ ભક્તિં દેહિ દૃઢાં પ્રભો ॥ ૪૦॥

ત્વદીયભક્તમિત્રત્વં સ્થાનં ભક્ષ્યાદિકં તથા ।
દેહિ મે દેવદેવેશ તત્ર સ્થાસ્યામિ નિશ્ચલઃ ॥ ૪૧॥

મોહાસુરસ્ય તદ્વાક્યં શ્રુત્વા તં પ્રત્યુવાચ હ ।
મહોદરઃ પ્રસન્નાત્મા ભક્તિભાવેન તોષિતઃ ॥ ૪૨॥

મહોદર ઉવાચ ।

મદીયા ભક્તિરુગ્રા તે ભવિષ્યતિ મહામતે ।
મદીયભક્તમિત્રત્વં પ્રાપ્સ્યસિ ત્વં ન સંશયઃ ॥ ૪૩॥

કર્મજ્ઞાનાદિભાવેષુ મદીયં પૂજનં ન હિ ।
સ્મરણં તત્ર દૈત્ય ત્વં ભોગભોક્તા ભવિષ્યસિ ॥ ૪૪॥

સ્વસ્થાને તિષ્ઠ દૈત્યેન્દ્ર સ્વધર્મસ્થિતમાદરાત્ ।
નરં મોહવિહીનં ચ તં કુરુષ્વ ભજસ્વ મામ્ ॥ ૪૫॥

તથેતિ ગણપં મોહાસુરો નત્વા પ્રતાપવાન્ ।
સ્વસ્થાને સંસ્થિતો ગત્વા શાન્તિયુક્તો બભૂવ હ ॥ ૪૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે મોહાસુરશાન્તિવર્ણનં નામ દશમોઽધ્યાયઃ ॥ ૩.૧૦

## ૩.૧૧ મહોદરાંડતર્ધાનં નામૈકાદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

રવિરુવાચ ।
ગતે મોહાસુરે તત્ર શાન્તરૂપે સુરેશ્વરાઃ ।
સુરૈશ્ચ મુનિભિઃ સાર્ધં મહોદરમપૂજયન્ ॥ ૧॥

પૂજયિત્વા ગણેશાનં પ્રણતા ભક્તિસંયુતાઃ ।
તુષ્ટુવુસ્તે વિશેષેણ હર્ષયુક્તાઃ સુરર્ષયઃ ॥ ૨॥

સુરર્ષય ઊચુઃ ।
અમેયમાયામિતવિક્રમાય નિરઞ્જનાયાઽથ ગણેશ્વરાય ।
અમાયિને માયિકમોહનાય નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૩॥

મનોવચોહીનતયા સ્થિતાય મનોવચોયુક્તગજાનનાય ।
અયોગસંયોગમયાય ઢુણ્ઢે નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૪॥

વિદેહરૂપાય ચ બોધકાય તથાહિ સોઽહમ્પદભોગકાય ।
સદા સુબિન્દ્વાત્મકદેહગાય નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૫॥

ગુણેશરૂપાય સુષુપ્તિકાય તથા સુસૂક્ષ્માય ચ જાગૃતે તે ।
હરીશ બ્રહ્માદિષુ સંસ્થિતાય નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૬॥

શુભાશુભાકારધરાય ભૂમ્ને શુભાશુભાદૌ ચ સુપૂજિતાય ।

શુભાશુભે કર્મણિ સિદ્ધિદાય નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૭॥

કર્ત્રે સુપાત્રે હરણાય કાલપ્રકાશરૂપાય ચ ભાનવે તે ।
ક્રિયાસ્વરૂપાય ચ શક્તિદાય નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૮॥

યમાય ચન્દ્રાય ચ વાયવે વૈ કુબેરરૂપાય પુરન્દરાય ।
શિવાય વન્હ્યાત્મકનૈરૃતાય નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૯॥

અનન્તરૂપાય જલેશકાય પ્રજાપતે રૂપધરાય પાશિન્ ।
દિગીશપાલાય દિશામયાય નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૧૦॥

સુરાસુરાણાં ચ સમાય નિત્યં સુરાસુરાકારધરાય ધાત્રે ।
(Page ખં. ૩ અ. ૧૧ પાન ૨૪)
પિશાચગન્ધર્વમયાય યક્ષ નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૧૧॥

ધરાસ્વરૂપાય જલપ્રકાશ જલસ્વરૂપાય ચ તેજસે તે ।
વાતાય ચાકાશમયાય ધામ્ને નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૧૨॥

અનાદિમધ્યાન્તવિહારકાય સદાદિમધ્યાન્તમયાય ચિત્રમ્ ।
તત્ત્વપ્રકાશાય ચ તત્ત્વમૂર્તે નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૧૩॥

નરાય વર્ણાશ્રમસંસ્થિતાય દ્વિજસ્વરૂપાય નરાધિપાય ।
વૈશ્યાય શૂદ્રાય તથાંઽતિમાય નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૧૪॥

ગુરોરધીનાય ગૃહસ્થરૂપવનસ્થિતાયાઽથ પરિવ્રજાય ।
વર્ણાશ્રમૈર્હીનમયાય યોગિન્ નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૧૫॥

વૃક્ષાદિવીરુત્તૃણસંસ્થિતાય ધરાધરાકારમયાય દેવ ।
પશુસ્વરૂપાય ચ પક્ષિણે તે નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૧૬॥

રસસ્વરૂપાય રસાધિપાય તથાઽન્નરૂપાય ચ જીવનાય ।
ચરાચરાકારમયાય નાગ નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૧૭॥

વરાઙ્કુશાદ્યૈશ્ચ સુચિહ્નિતાયોન્દુરુધ્વજાયાઽઽખુસુવાહનાય ।
ત્રિનેત્રધારાય ચ શૂર્પકર્ણ નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૧૮॥

સ્વાનન્દલોકાધિપ દેવદેવ સુસિદ્ધિબુદ્ધિપ્રભવે પરાત્મન્ ।
સદૈકદન્તાય ચતુર્ભુજાય નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૧૯॥

મહોદરાયાદિસુપૂજિતાય સુવસ્ત્રસમ્ભૂષણભૂષિતાય ।
પ્રમોદમોદાદિગણૈઃ સ્તુતાય નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૨૦॥

સદામૃતાભેદમયેક્ષુનીરસમુદ્રલીલાકરકઞ્જપાણે ।
ગણેશ હેરમ્બ ચ ભક્તપોષ નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૨૧॥

પ્રવિશ્ય વિશ્વોદરમેવ ભોગવિહારિણે વિશ્વમયાય પૂર્ણ ।
વિકારહીનાય સુબોધદાય નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૨૨॥

અલ્પોદરા દેવમુખાશ્ચ સર્વે સ્વસ્વપ્રભોગે કુશલાશ્ચ તેન ।
તેષુ ત્વમેવં સુખભોગકારિન્ નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૨૩॥

ભાનુરુવાચ ।
એવં સંસ્તુવતાં તેષાં સુરર્ષીણાં મહર્ષયઃ ।
સમુત્પન્નો ભક્તિરસસ્તેન તે નનૃતુઃ પુરઃ ॥ ૨૪॥

સાશ્રુનેત્રાન્ સ રોમાઞ્ચાન્ રુદ્ધકણ્ઠાન્ વિશેષતઃ ।
તાનુવાચ સ્વયં દેવો ભક્તાન્ વૈ ભક્તવત્સલઃ ॥ ૨૫॥

ગણેશ ઉવાચ ।
વરાન્ વૃણુત દેવેશા દેવા મુનિગણાસ્તથા ।
ભક્ત્યા સ્તોત્રેણ તુષ્ટોઽહં દાસ્યામિ મનસીપ્સિતાન્ ॥ ૨૬॥

ગણેશવચનં શ્રુત્વા હર્ષયુક્તાઃ સુરર્ષયઃ ।
તં પ્રણમ્ય મહાત્માનં દ્વિજા ઊચુર્મહોદરમ્ ॥ ૨૭॥

દેવર્ષય ઊચુઃ ।
યદિ તુષ્ટોઽસિ દેવેશ તદા તે ભક્તિમુત્તમામ્ ।
દેહિ નો ગણનાથ ત્વં તયા તૃપ્તાઃ સ્મ સામ્પ્રતમ્ ॥ ૨૮॥

ત્વયા શાન્તિધરો દુષ્ટઃ કૃતો મોહાસુરઃ પ્રભો ।
તેન સર્વં જગત્ પૂર્ણં વરૈશ્ચાપિ પ્રપાલિતમ્ ॥ ૨૯॥

અધુના તાપસંહીનાઃ કૃતા ગણપતે વયમ્ ।
ત્વં નાથોઽસિ જગન્નાથ અનાથાનાં કરોષિ તત્ ॥ ૩૦॥

એવમુક્ત્વા ગણેશાનં પ્રણેમુસ્તે સુરર્ષયઃ ।
તથેતિ તાનુવાચૈવ ગણેશોંઽતર્દધે દ્વિજાઃ ॥ ૩૧॥

દેવાશ્ચ મુનયઃ સર્વે સ્વસ્વસ્થાનં યયુસ્તતઃ ।
સ્વસ્વધર્મરતા લોકા બભૂવુર્વિગતજ્વરાઃ ॥ ૩૨॥

એવં મોહાસુરં વિપ્રાઃ શાન્તિરૂપધરં પ્રભુઃ ।
ચકાર ગણનાથો વૈ મોહહીનં જગત્તથા ॥ ૩૩॥

(Page ખં. ૩ અ. ૧૨ પાન ૨૫)
મહોદરસ્ય તસ્યૈવાવતારા વિવિધાઃ સ્મૃતાઃ ।
ચરિત્રમખિલં તેષાં ગદિતું ન પ્રશક્યતે ॥ ૩૪॥

રામઃ સીતાવિયોગાર્તઃ શરણં તં મહોદરમ્ ।
યયૌ તેન સ શાન્તોઽભૂત્ સસીતો ભજને રતઃ ॥ ૩૫॥

દક્ષિણસ્યાં દિશિ પ્રાન્તે સ્થાપિતોઽસૌ મહોદરઃ ।
દેવર્ષિભિશ્ચ ભો વિપ્રાઃ સ્થાનં તદ્ભુવિ પપ્રથે ॥ ૩૬॥

ઇદં મહોદરસ્યૈવ ચરિતં મોહનાશનમ્ ।
મોહશાન્તિપ્રદં પૂર્ણં કથિતં વો મયા દ્વિજાઃ ॥ ૩૭॥

યઃ પઠેચ્છૃણુયાદ્યશ્ચ તસ્મૈ શાન્તિપ્રદાયકમ્ ।
ભુક્તિમુક્તિપ્રદં ચૈવ ભવિષ્યતિ ન સંશયઃ ॥ ૩૮॥

મોહેન મોહિતા વિપ્રા માં વદન્તિ પરાત્પરમ્ ।
સ્વલ્પયોગધરાસ્તે યે જ્ઞાતવ્યાશ્ચ ન સંશયઃ ॥ ૩૯॥

એતદ્વઃ કથિતં સર્વં મદીયં સુચરિત્રકમ્ ।
ગણેશભક્તિસંયુક્તં તસ્માત્તં પ્રભજામ્યહમ્ ॥ ૪૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે મહોદરાંઽતર્ધાનં નામૈકાદશોઽધ્યાયઃ ॥ ૩.૧૧

## ૩.૧૨ નરનારાયણવિષ્ણુસંવાદો નામ દ્વાદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
સૂર્યેણ કથિતં ચિત્રં મહોદરકથાનકમ્ ।
શ્રુત્વા વિસ્મયસંયુક્તા બભૂવુર્વાલખિલ્યકાઃ ॥ ૧॥

માનસે ધારયામાસુર્ગણેશોઽયં સુશાન્તિદઃ ।
યોગરૂપો ન સન્દેહો ભાનુના બોધિતા વયમ્ ॥ ૨॥

હર્ષયુક્તાઃ પુનસ્તં તે વાલખિલ્યાઃ પ્રજાપતે ।

મહોદરસ્ય પપ્રચ્છુશ્ચેષ્ટિતં તસ્ય શાન્તિદમ્ ॥ ૩॥

વાલખિલ્યા ઊચુઃ ।
ધન્યોઽસિ ચ રવે ત્વં વૈ યોગશાન્તિપ્રકાશકઃ ।
વયં બોધેન સંયુક્તા સંશયો ન ત્વયા કૃતઃ ॥ ૪॥

ધન્યં જન્મ ગણેશસ્ય કથાં તસ્ય મહાપ્રભોઃ ।
શ્રુત્વા મનસિ સન્તુષ્ટા ભવામસ્ત્વદનુગ્રહાત્ ॥ ૫॥

સર્વજ્ઞોઽસિ મહાભાગ સાક્ષાદ્ગણપતિઃ સ્વયમ્ ।
આત્માકારેણ સૂર્યસ્ત્વં તન્ન ચિત્રં કિમપ્યુત ॥ ૬॥

અધુના બ્રૂહિ દેવેશ રામો ગણપતિં કથમ્ ।
અભજદ્ભક્તિસંયુક્તઃ શાન્તિરૂપો બભૂવ હ ॥ ૭॥

ધન્યાસ્તે પુરુષા લોકે ગણેશસ્ય કથાં રવે ।
પૃચ્છન્તિ પ્રપઠન્ત્યન્યે શ‍ૃણ્વતે યોગશાન્તિદામ્ ॥ ૮॥

મુદ્ગલ ઉવાચ ।
ઇતિ પૃષ્ટો મહાતેજા વાલખિલ્યૈઃ પ્રજાપતે ।
રવિસ્તાન્ હર્ષિતો ભૂત્વા ભો જગાદ શ‍ૃણુષ્વ તત્ ॥ ૯॥

રવિરુવાચ ।
અત્રાઽહં કથયિષ્યામિ ચેતિહાસં પુરાતનમ્ ।
નારાયણસ્ય સંવાદં માર્કણ્ડેયસ્ય સિદ્ધિદમ્ ॥ ૧૦॥

મૃકણ્ડાચ્ચ સમુત્પન્નો માર્કણ્ડેયો મહામુનિઃ ।
કૃતોપવીતકો ભૂત્વા તતાપ પરમં તપઃ ॥ ૧૧॥

બ્રહ્મચર્યસમાયુક્તો વેદશાસ્ત્રજ્ઞસત્તમઃ ।
નિત્યં જજાપ ગાયત્રીં મોક્ષેપ્સુઃ સ વિશેષતઃ ॥ ૧૨॥

અયુતે પ્રગતે વિપ્રા વર્ષાણાં ચ તદાઽઽશ્રમે ।
આયયૌ શઙ્કરસ્તત્ર પાર્વત્યા ગણસંવૃતઃ ॥ ૧૩॥

ધ્યાને વિષ્ણું સમાધૃત્વા સંસ્થિતો ન બુબોધ તમ્ ।
(Page ખં. ૩ અ. ૧૨ પાન ૨૬)
સમાગતં મહેશાનં શિવશ્ચિત્રં તદાઽકરોત્ ॥ ૧૪॥

યોગમાયાબલેનાઽસૌ હૃદિ તસ્ય ગતઃ શિવઃ ।

લોપયામાસ વિષ્ણું તં હૃદિ સંસ્થં મુનેઃ કિલ ॥ ૧૫॥

હૃદયે શઙ્કરં દૃષ્ટ્વા વિસ્મિતોઽસૌ મહામુનિઃ ।
ત્યક્ત્વા ધ્યાનં બહિર્વીક્ષ્ય શઙ્કરં પ્રણનામ સઃ ॥ ૧૬॥

અથર્વશિરસા શમ્ભું સ્તુત્વા હર્ષસમન્વિતઃ ।
પુનઃ પુનર્મહેશાનં પ્રણમ્ય પુરતઃ સ્થિતઃ ॥ ૧૭॥

તમુવાચ મહાદેવો વરં વૃણુ હૃદીપ્સિતમ્ ।
દાસ્યામિ તપસા તુષ્ટો ગાયત્ર્યાશ્ચ જપેન તે ॥ ૧૮॥

ગાયત્રી વેદમાતા વૈ પિતા ઓઙ્કાર ઉચ્યતે ।
ઓઙ્કારાચ્ચ વયં જાતા જાનીહિ તાપસોત્તમ ॥ ૧૯॥

અતો જપેન ગાયત્ર્યાઃ સન્તુષ્ટોઽહં ન સંશયઃ ।
સ્તુત્યા ગમ્ભીરયા વિપ્ર દાસ્યામિ હૃદિ વાઞ્છિતમ્ ॥ ૨૦॥

શિવસ્ય વચનં શ્રુત્વા તં જગાદ મહામુનિઃ ।
ભક્તિં દેહિ ત્વદીયાં મે મુક્તિં સંસારસાગરાત્ ॥ ૨૧॥

તતસ્તં પ્રત્યુવાચેદં વાક્યં વાક્યવિશારદઃ ।
શિવઃ સન્તોષદઃ પૂર્ણઃ સ્વભક્તેભ્યો વિશેષતઃ ॥ ૨૨॥

શિવ ઉવાચ ।
મદીયા ભક્તિરુગ્રા તે ભવિષ્યતિ મહામુને ।
મુક્તિશ્ચ શાશ્વતી પૂર્ણા પુરાણાચાર્યતા તથા ॥ ૨૩॥

આયુશ્ચ સપ્તકલ્પાખ્યં ભવિષ્યતિ મહામુને ।
યદ્યદિચ્છસિ તત્તત્તે સફલં નાત્ર સંશયઃ ॥ ૨૪॥

એવમુક્ત્વાન્તર્દધે સશક્તિકોઽસૌ શિવઃ સ્વયમ્ ।
માર્કણ્ડેયશ્ચ સઙ્ખિન્નઃ સંસ્થિતોઽભૂન્ મહર્ષયઃ ॥ ૨૫॥

પ્રકીર્તિતા મન્ત્રશક્તિર્ગાયત્રી રૂપધારિણી ।
દેવતા શમ્ભુરૂપા ચ કલ્પિતાઽભૂન્ મહાત્મના ॥ ૨૬॥

શૈવમાર્ગેણ શમ્ભું સોઽભજચ્ચાનન્યચેતસા ।
કાલાત્મકં મહેશાનં મોહહીનં વિશેષવિત્ ॥ ૨૭॥

તત્ર તેન સમાખ્યાતં પુરાણં સર્વસિદ્ધિદમ્ ।
માર્કણ્ડેયં શિવસ્યૈવ શક્તેર્માહાત્મ્યસંયુતમ્ ॥ ૨૮॥

તતો બહુગતે કાલે નરનારાયણાવુભૌ ।
આશ્રમે તસ્ય દેવર્ષેર્જગ્મતુઃ પરમેશ્વરૌ ॥ ૨૯॥

વાલખિલ્યા ઊચુઃ ।
વદ ભાનો મહાભાગ ચરિત્રં ચ તયોઃ શુભમ્ ।
પરમેશ્વરસંજ્ઞૌ તૌ ભવતઃ કથમાદરાત્ ॥ ૩૦॥

ભાનુરુવાચ ।
મમ પુત્રશ્ચ ધર્માત્મા ધર્મઃ સર્વસમાનગઃ ।
તેન વિષ્ણોસ્તપસ્તમં કીર્ત્યા સહ મહર્ષયઃ ॥ ૩૧॥

ગતે વર્ષશતે પૂર્ણે વિષ્ણુશ્ચ વરદોઽભવત્ ।
તાભ્યાં પુત્રસ્ત્વમેવં નૌ ભવ સોઽપિ તથાઽકરોત્ ॥ ૩૨॥

નરનારાયણાવેવં તયોઃ પુત્રૌ બભૂવતુઃ ।
નરો જીવમયઃ પ્રોક્તો પરો નારાયણઃ શિવઃ ॥ ૩૩॥

તયોર્યોગે ચ યદ્બ્રહ્મ વૈષ્ણવં કથ્યતે બુધૈઃ ।
અતસ્તૌ પ્રસમાખ્યાતૌ મયા વઃ પરમેશ્વરૌ ॥ ૩૪॥

ધર્મસ્યાજ્ઞાં ગૃહીત્વા વૈ નિમિષારણ્યગૌ દ્વિજાઃ ।
ભવતઃ સ્મ તતો દેવૌ તેપાતે પરમં તપઃ ॥ ૩૫॥

સમાયયૌ તત્ર સાક્ષાત્ સ્વયં વિષ્ણુર્યદૃચ્છયા ।
તં દૃષ્ટા સન્નતૌ તુષ્ટુવતુર્દેવૌ ચ કેશવમ્ ॥ ૩૬॥

નાનાસ્તોત્રૈઃ પ્રસાદ્યૈનં નેમતુર્ભક્તિતત્પરૌ ।
તાવુવાચ મહાવિષ્ણુરિચ્છથઃ કિં મહામુની ॥ ૩૭॥

તતસ્તૌ કેશવં ચૈવોચતુઃ પરમધાર્મિકૌ ।
વદ યોગં મહાભાગ સર્વશાન્તિકરં પરમ્ ॥ ૩૮॥

એવમુક્તો મહાયોગી તાવુવાચ પ્રહર્ષિતઃ ।
(Page ખં. ૩ અ. ૧૩ પાન ૨૭)
યોગં શાન્તિપ્રદં પૂર્ણં ગાણપત્યપ્રિયઃ સદા ॥ ૩૯॥

વિષ્ણુરુવાચ ।
ચિત્તં પઞ્ચવિધં પ્રોક્તં તદૈશ્વર્યં ચ યત્ સ્મૃતમ્ ।

માયારૂપં તદેવાશુ ત્યક્ત્વા યોગં સમાપ્સ્યથઃ ॥ ૪૦॥

યદ્યચ્ચિત્તેન સમ્પ્રાપ્તં તત્તદ્યોગેન માનદૌ ।
યોગરૂપં પ્રકર્તવ્યં તદાકારસમાધિના ॥ ૪૧॥

યદ્યચ્ચિત્તેન ન જ્ઞાતં તત્તન્નિર્વૃત્તિવાચકમ્ ।
તદેવ યોગરૂપં વૈ કર્તવ્યં યોગસેવયા ॥ ૪૨॥

ચિત્તે ચિન્તામણિર્નિત્યં તિષ્ઠેદ્વૈ ચિત્તચાલકઃ ।
ભજતં તં મહાભાગૌ તેન શાન્તિમવાપ્સ્યથઃ ॥ ૪૩॥

માયામોહયુતં ચિત્તં નાનાભાવેષુ લાલસમ્ ।
માયાહીનં સદા ચિત્તં શાન્તિરૂપં ભવિષ્યતિ ॥ ૪૪॥

ચિત્તમિચ્છતિ ધર્મં વૈ તથાર્થં કામમાદરાત્ ।
મોક્ષં ચ બ્રહ્મભૂતત્વં ભ્રમયુક્તં ન સંશયઃ ॥ ૪૫॥

અહં ચિન્તામણિઃ સાક્ષાન્ન મે ભિન્નં પ્રવિદ્યતે ।
તદિચ્છેયં ભ્રામયતિ કિમર્થં માં ભ્રમાત્મિકા ॥ ૪૬॥

અનેન યોગમાર્ગેણ ચિત્તં ત્યક્ત્વા મહામુની ।
શાન્તિયોગસ્વરૂપૌ વૈ સંશયો ન ભવિષ્યથઃ ॥ ૪૭॥

એવમુક્ત્વાંઽતર્દધેઽસૌ વિષ્ણુર્વૈકુણ્ઠગોઽભવત્ ।
નરનારાયણૌ તત્ર યોગયુક્તૌ બભૂવતુઃ ॥ ૪૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે નરનારાયણવિષ્ણુસંવાદો નામ દ્વાદશોઽધ્યાયઃ ॥ ૩.૧૨

## ૩.૧૩ નરનારાયણમાર્કણ્ડેયસમાગમો નામ ત્રયોદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

વાલખિલ્યા ઊચુઃ ।
વદ ભાનો મહાયોગિન્નરનારાયણાવૃષી ।
કિં ચક્રતુસ્તતઃ સર્વં બ્રહ્મભૂતૌ વિશેષતઃ ॥ ૧॥

રવિરુવાચ ।
સ્વાશ્રમે તૌ સ્થિતૌ દેવૌ નરનારાયણાવૃષી ।
વિષ્ણુના કથિતો યોગઃ સાધયામાસતુઃ પરમ્ ॥ ૨॥

ક્રમેણ શાન્તિમાપન્નૌ ગાણપત્યૌ બભૂવતુઃ ।
ગણપસ્ય મહામન્ત્રં શિવાત્ સઙ્ગૃહ્ય જેપતુઃ ॥ ૩॥

ચતુરક્ષરકં મન્ત્રં હેરમ્બસ્ય વિશેષતઃ ।
મૂર્તિં રત્નમયીં કૃત્વા પૂજયેતાં મહામુની ॥ ૪॥

હેરમ્બસ્ય હૃદિ ધ્યાનં ચક્રતુઃ પરમાદૃતૌ ।
શાન્તિં પ્રાપ્તૌ તતો વિપ્રા ન મુઞ્ચન્તૌ ગજાનનમ્ ॥ ૫॥

એવં વર્ષશતે પૂર્ણે તયોરાશ્રમગોઽભવત્ ।
હેરમ્બઃ સિંહગો ભૂત્વા નાગયજ્ઞોપવીતવાન્ ॥ ૬॥

ચતુર્બાહુધરશ્ચૈવ ત્રિનેત્રો ભૂષણૈર્વરૈઃ ।
ભૂષિતઃ સિદ્ધિબુદ્ધિભ્યાં યુતો લમ્બોદરઃ પ્રભુઃ ॥ ૭॥

નાનાપુષ્પમયીં માલાં ત્રિશૂલં મુદ્ગરં તથા ।
અઙ્કુશં ચ કરૈર્વિપ્રા દધાનસ્તેજસા યુતઃ ॥ ૮॥

એતાદૃશં ચ હેરમ્બં દૃષ્ટ્વા તૌ મુનિસત્તમૌ ।
પ્રણેમતુર્દણ્ડવત્તુ પાદયોસ્તસ્ય યોગિનૌ ॥ ૯॥

હેરમ્બં તત ઉત્થાયાપૂજયેતાં યથાવિધિ ।
પુનસ્તુષ્ટુવતુસ્તત્ર તૌ પ્રણમ્ય ગજાનનમ્ ॥ ૧૦॥

નરનારાયણાવૂચતુઃ ।
નમસ્તે ગણનાથાય ભક્તસંરક્ષકાય તે ।
ભક્તેભ્યો ભક્તિદાત્રે વૈ હેરમ્બાય નમો નમઃ ॥ ૧૧॥

અનાથાનાં વિશેષેણ નાથાય ગજવક્ત્રિણે ।
(Page ખં. ૩ અ. ૧૩ પાન ૨૮)
ચતુર્બાહુધરાયૈવ લમ્બોદર નમોઽસ્તુ તે ॥ ૧૨॥

ઢુણ્ઢયે સર્વસારાય નાનાભેદપ્રચારિણે ।
ભેદહીનાય દેવાય નમશ્ચિન્તામણે નમઃ ॥ ૧૩॥

સિદ્ધિબુદ્ધિપતે તુભ્યં સિદ્ધિબુદ્ધિસ્વરૂપિણે ।
યોગાય યોગનાથાય શૂર્પકર્ણાય તે નમઃ ॥ ૧૪॥

સગુણાય નમસ્તુભ્યં નિર્ગુણાય પરાત્મને ।
સર્વપૂજ્યાય સર્વાય દેવદેવાય તે નમઃ ॥ ૧૫॥

બ્રહ્મણાં બ્રહ્મણે તુભ્યં સદા શાન્તિપ્રદાયક ।
સુખશાન્તિધરાયૈવ નાભિશેષાય તે નમઃ ॥ ૧૬॥

પૂર્ણાય પૂર્ણનાથાય પૂર્ણાનન્દાય તે નમઃ ।
યોગમાયાપ્રચાલાય ખેલકાય નમો નમઃ ॥ ૧૭॥

અનાદયે નમસ્તુભ્યમાદિમધ્યાન્તમૂર્તયે ।
સ્રષ્ટ્રે પાત્રે ચ સંહર્ત્રે સિંહવાહાય તે નમઃ ॥ ૧૮॥

ગતાભિમાનિનાં નાથસ્ત્વમેવાત્ર ન સંશયઃ ।
તેન હેરમ્બનામાઽસિ વિનાયક નમોઽસ્તુ તે ॥ ૧૯॥

કિં સ્તુવસ્ત્વાં ગણાધીશ યોગાભેદમયં પરમ્ ।
અતસ્ત્વાં પ્રણમાવો વૈ તેન તુષ્ટો ભવ પ્રભો ॥ ૨૦॥

એવમુક્ત્વા નતૌ તત્ર નરનારાયણાવૃષી ।
તાવુત્થાપ્ય ગણેશાન ઉવાચ ઘનનિસ્વનઃ ॥ ૨૧॥

હેરમ્બ ઉવાચ ।
વરં ચિત્તેપ્સિતં દાસ્યામિ બ્રૂતં ભક્તિયન્ત્રિતઃ ।
મહાભાગાવાદિમુની યોગમાર્ગપ્રકાશકૌ ॥ ૨૨॥

ભવત્કૃતમિદં સ્તોત્રં મમ પ્રીતિકરં ભવેત્ ।
પઠતે શૃણ્વતે ચૈવ ભુક્તિમુક્તિપ્રદં તથા ॥ ૨૩॥

યદ્યદિચ્છતિ તત્તદ્વૈ દાસ્યામિ સ્તોત્રપાઠતઃ ।
મમ ભક્તિપ્રદં ચૈવ ભવિષ્યતિ સુસિદ્ધિદમ્ ॥ ૨૪॥

ભાનુરુવાચ ।
હેરમ્બવચનં શ્રુત્વા હર્ષિતૌ મુનિપુઙ્ગવૌ ।
કૃતાઞ્જલિપુટૌ ચોભાવૂચતુસ્તં ગજાનનમ્ ॥ ૨૫॥

યદિ પ્રસન્નભાવેન વરં દાસ્યસિ વિઘ્નપ ।
તદા તે ભક્તિમુગ્રાં નૌ દેહિ ચાવ્યભિચારિણીમ્ ॥ ૨૬॥

તથેતિ ગણનાથસ્તૌ જગાદ ભક્તિભાવિતઃ ।
અન્તર્ધાનં ચકારાઽસૌ સ્વાનન્દસ્થો બભૂવ હ ॥ ૨૭॥

તતસ્તૌ નિત્યમત્યન્તં ગણેશભજને રતૌ ।
હેરમ્બેતિ સદા મન્ત્રં વાણ્યા પ્રોચતુરાદરાત્ ॥ ૨૮॥

તતો બહુગતે કાલે માર્કણ્ડેયાશ્રમે દ્વિજાઃ ।
જગ્મતુર્જ્ઞાનદાનાર્થં કરુણાયુક્તમાનસૌ ॥ ૨૯॥

નરનારાયણૌ દૃષ્ટ્વા માર્કણ્ડેયો મહામુનિઃ ।
પ્રણનામ સ સાષ્ટાઙ્ગં પૂજયન્ ભક્તિસંયુતઃ ॥ ૩૦॥

પૂજયિત્વા સ્વયં તત્ર પાદસંવાહને સ્થિતઃ ।
ઉવાચ તૌ વિનીતાત્મા માર્કણ્ડેયો મહામુનિઃ ॥ ૩૧॥

માર્કણ્ડેય ઉવાચ ।
ધન્યં મે જન્મ વિદ્યા ચ તપો જ્ઞાનાદિકં તથા ।
ધન્યૌ મે જનકૌ ચૈવ યુવયોઃ પાદદર્શનાત્ ॥ ૩૨॥

એવં નાનાવિધૈર્વાક્યૈઃ સંસ્તુતૌ મુનિપુઙ્ગવૌ ।
ઊચતુસ્તં વિનીતં તૌ ભક્તિભાવેન તોષિતૌ ॥ ૩૩॥

નરનારાયણાવૂચતુઃ ।
માર્કણ્ડેય વૃણુષ્વ ત્વં વરં સ્વમનસીપ્સિતમ્ ।
તવાતિથ્યકૃતેનૈવ સન્તુષ્ટૌ નાત્ર સંશયઃ ॥ ૩૪॥

તયોર્વચનમાકર્ણ્ય માર્કણ્ડેયઃ પ્રતાપવાન્ ।
પ્રણમ્ય તાવુવાચાઽથ ભક્તિનમ્રાત્મકન્ધરઃ ॥ ૩૫॥

માર્કણ્ડેય ઉવાચ ।
જ્ઞાનં શાન્તિપ્રદં પૂર્ણં વદતં મુનિસત્તમૌ ।
તેન તૃપ્તો ભવિષ્યામિ શાન્તિયોગપરાયણઃ ॥ ૩૬॥

દર્શયેથાં મહામાયાં તાં જ્ઞાત્વા સન્ત્યજામ્યહમ્ ।
(Page ખં. ૩ અ. ૧૪ પાન ૨૯)
ભક્તિરેવ ગુરોઃ પાદે દીયતાં મે વરસ્ત્વયમ્ ॥ ૩૭॥

રવિરુવાચ ।
તથેતિ તં મહાત્માનાવૂચતુર્જ્ઞાનમુત્તમમ્ ।
શાન્તિયોગપ્રદં પૂર્ણં ગાણેશં મુનિપુઙ્ગવૌ ॥ ૩૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે નરનારાયણમાર્કણ્ડેયસમાગમો નામ ત્રયોદશોઽધ્યાયઃ ॥ ૩.૧૩

## ૩.૧૪ માયાવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

નરનારાયણાવૂચતુઃ ।
જ્ઞાનં શાન્તિપ્રદં પૂર્ણં શ‍ૃણુ ત્વં મુનિસત્તમ ।
તપસા બ્રહ્મચર્યેણ સિદ્ધોઽસ્યત્ર ન સંશયઃ ॥ ૧॥

શિવેન રામચન્દ્રાય કથિતં યોગદાયકમ્ ।
તેન શાન્તિસમાયુક્તો બભૂવે લક્ષ્મણાગ્રજઃ ॥ ૨॥

રાજ્યસઙ્ગસમાયુક્તસ્તેનાભૂત્તચ્ચ વિસ્મૃતમ્ ।
પુનર્વસિષ્ઠવાક્યેન તજ્જ્ઞાનં સમપદ્યત ॥ ૩॥

માર્કણ્ડેય ઉવાચ ।
કોઽસૌ રામો મહાભાગઃ કસ્મિન્ વંશે સમુદ્ભવઃ ।
કસ્ય પુત્રશ્ચ તત્સર્વં વદતં માં મહામુની ॥ ૪॥

રવિરુવાચ ।
એવં પૃષ્ટૌ મહાત્માનૌ માર્કણ્ડેયેન ધીમતા ।
ઊચતુઃ પરમપ્રીતૌ ચેષ્ટિતં રાઘવસ્ય ચ ॥ ૫॥

નરનારાયણાવૂચતુઃ ।
મરીચિર્બ્રહ્મણઃ પુત્રસ્તસ્માજ્જાતશ્ચ કશ્યપઃ ।
અદિત્યાં કશ્યપાજ્જજ્ઞે સૂર્ય આત્મા શરીરિણામ્ ॥ ૬॥

સૂર્યાચ્ચ મનુનામા યો વૈવસ્વત ઇતિ શ્રુતઃ ।
તસ્ય મન્વન્તરં પ્રોક્તં સપ્તમં ભૂમિમણ્ડલે ॥ ૭॥

બ્રહ્મણો દિવસઃ પ્રોક્તો મુનિભિઃ કાલવાદિભિઃ ।
ચતુર્યુગસહસ્રાખ્યસ્તાવતી રાત્રિરુચ્યતે ॥ ૮॥

એકસ્મિન્ દિવસે વિપ્ર મનવશ્ચ ચતુર્દશ ।
ભવન્તિ સ્વસ્વકાલેન પ્રેરિતાઃ ક્ષત્રકર્મણિ ॥ ૯॥

એકસપ્તતિરેષૈવાધિકા કિઞ્ચિન્ મહામુને ।
મન્વન્તરં ચતુર્ણાં ચ યુગાનાં વૈ પ્રકથ્યતે ॥ ૧૦॥

સ્વાયમ્ભુવાદયશ્ચૈવ મનવઃ કથિતા બુધૈઃ ।
તેષુ ષટ્કં તથા ભિન્નં ભવતિ સ્વાધિકારતઃ ॥ ૧૧॥

મનુર્દેવાશ્ચ વિપ્રા વૈ સપ્ત ચૈવ પુરન્દરઃ ।
મનુપુત્રાશ્ચ વિષ્ણોર્યત્રાવતારઃ પ્રકીર્તિતઃ ॥ ૧૨॥

વિભાગતશ્ચ મનુના સર્વધર્મઃ પ્રકાશ્યતે ।
ભૂમિપાલનકં કાર્યં વર્ણાશ્રમવિધાનતઃ ॥ ૧૩॥

ઋષિભિસ્તત્ત્વમાર્ગેણ કર્મજ્ઞાનાદિકં મુને ।
સુબોધેન નરાણાં તત્ પ્રકાશ્યં સર્વમાદરાત્ ॥ ૧૪॥

યજમાનસ્ય યજ્ઞાદિ કર્મ સર્વં તથા મુને ।
કારણીયં પ્રકર્તવ્યં સ્વસ્વમન્વન્તરેષુ તૈઃ ॥ ૧૫॥

વૃષ્ટ્યાદિના ત્રિભુવનં મહેન્દ્રેણ વિશેષતઃ ।
કર્માનુસારભોગેન પાલનીયં યથાતથમ્ ॥ ૧૬॥

દેવૈઃ સ્વયજ્ઞભાગસ્થં ભોગં ભુક્ત્વા સ્વલોકદમ્ ।
કર્મકર્ત્રે તથા સ્વર્ગે ફલં દાતવ્યમાદરાત્ ॥ ૧૭॥

ઇન્દ્રસ્ય દૈત્યજં ઘોરં ભયં પ્રાપ્તં યદા મુને ।
તદા વિષ્ણુઃ કલાંશેન તં રક્ષતિ બિડૌજસમ્ ॥ ૧૮॥

મનોઃ પુત્રૈશ્ચ પૌત્રૈશ્ચ તેષાં સન્તતિભિઃ સદા ।
પ્રજાપાલનકં કાર્યં ક્ષાત્રધર્મપરાયણૈઃ ॥ ૧૯॥

એવં ષટ્કં સમાખ્યાતં મન્વન્તરમયં મુને ।
મન્વન્તરે સમાપ્તે વૈ દ્વિતીયસ્ય સમુદ્ભવઃ ॥ ૨૦॥

જ્ઞાનનિષ્ઠં તદા ષટ્કં ભવેદ્વૈ નિત્યમાદરાત્ ।
તપસા દેહમુત્સૃજ્ય સ્વસ્વધામ્નિ ગતં ભવેત્ ॥ ૨૧॥

લયસ્તત્ર સમાખ્યાતો મન્વન્તરલયાત્મકઃ ।
તત્ર સર્વે લયં પ્રાપ્તા જનાઃ સ્થાવરજઙ્ગમાઃ ॥ ૨૨॥

દ્વિતીયે મનુમુખ્યે સમુદ્ભતે વૈ મહામુને ।
ભૃગ્વાદયઃ સ્વમાત્માનં સસૃજુર્યોગસેવયા ॥ ૨૩॥

પુનઃ સૃષ્ટિં પ્રચક્રુસ્તે ચરાચરમયીં મુને ।
એવં સર્વાન્તરે પ્રોક્તં જ્ઞાતવ્યં વિબુધૈઃ સદા ॥ ૨૪॥

બ્રહ્મણો દિવસાન્તે યો લયો નૈમિત્તિકાહ્વયઃ ।
ભવતિ તત્ર ત્રૈલોક્યં નાશમેતિ ન સંશયઃ ॥ ૨૫॥

એવં દિનક્રમેણૈવ શતવર્ષમયં મુને ।
બ્રહ્મણઃ પૂર્ણમાયુષ્યં ભવિષ્યતિ ન સંશયઃ ॥ ૨૬॥

તદા સ્વયં લયેનૈવ મરિષ્યતિ પિતામહઃ ।
એવં ક્રમેણ ત્રૈગુણ્યં નાશરૂપં વદન્તિ ચ ॥ ૨૭॥

જન્મમૃત્યુમયી પૂર્ણા નાનાદ્વન્દ્વપ્રકાશિની ।
માયા તે કથિતા વિપ્ર દ્વન્દ્વભાવેષુ ભ્રાન્તિદા ॥ ૨૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે માયાવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૩.૧૪

## ૩.૧૫ કાલગતિવર્ણનં નામ પઞ્ચદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

માર્કણ્ડેય ઉવાચ ।
ભવદ્ભ્યાં કથિતં ચિત્રં માયારૂપં વિશેષતઃ ।
શ્રુત્વાઽહં તૃપ્તિસંયુક્તો ભવામિ ભૃશહર્ષિતઃ ॥ ૧॥

માયારૂપં મયા નાથૌ ન જ્ઞાતં પૂર્ણભાવતઃ ।
અતો માં વિસ્તરેણૈવ વદતં યોગિનાં વરૌ ॥ ૨॥

વર્ણાશ્રમવિભાગં વૈ સ્વસ્વાચારસમન્વિતમ્ ।
યુગમાનં તથા વિપ્રો યુગધર્માન્ વિશેષતઃ ॥ ૩॥

પિતૃદેવાસુરાણાં વૈ કર્મમાર્ગં સુતૃપ્તિદમ્ ।
સૂર્યચન્દ્રપ્રસૂતાનાં રાજ્ઞાં સર્વં ચરિત્રકમ્ ॥ ૪॥

એતાનિ પ્રશ્નપીઠાનિ વદતં ચર્ષિસત્તમૌ ।
તત્ર દ્વન્દ્વાદિકસ્યૈવ જ્ઞાનં મે પ્રભવિષ્યતિ ॥ ૫॥

ભાનુરુવાચ ।
એવં પૃષ્ટૌ મહાભાગૌ નરનારાયણાવૃષી ।
ઊચતુસ્તં દયાયુક્તો માર્કણ્ડેયં તુ તાપસમ્ ॥ ૬॥

નરનારાયણાવૂચતુઃ ।
સમ્યક્ પૃષ્ટં મહાભાગ વદિષ્યાવોઽખિલં ચ તે ।

યેન માયાચરિત્રાણાં જ્ઞાનં ભવતિ નિશ્ચલમ્ ॥ ૭॥

નિમેષમાત્રઃ કાલો યો લઘ્વક્ષરસમન્વિતઃ ।
દશપઞ્ચનિમેષૈશ્ચ કાષ્ઠાકાલઃ પ્રકીર્તિતઃ ॥ ૮॥

ત્રિંશત્કાષ્ઠાભિરેવં યઃ કલાકાલઃ પ્રજાયતે ।
ત્રિંશત્કલાભિરેકં વૈ મુહૂર્તં પરિકીર્તિતમ્ ॥ ૯॥

ત્રિંશન્મુહૂર્તમાનેન દિવાનક્તમયો મતઃ ।
તૈસ્ત્રિંશદ્ભિસ્તથા કાલો માસાખ્યો વિપ્ર જાયતે ॥ ૧૦॥

માસપક્ષદ્વયાકારઃ શુક્લકૃષ્ણવિભાગતઃ ।
માસૈર્દ્વાદશભિઃ સંવત્સરઃ પૂર્ણશ્ચ જાયતે ॥ ૧૧॥

દ્વાભ્યામાભ્યામૃતુઃ પ્રોક્તઃ સ ષડૃતુભિરુચ્યતે ।
સંવત્સરપ્રમાણાખ્યઃ કથિતઃ કાલવેદિભિઃ ॥ ૧૨॥

નિમેષાદિભિરેવં સ કાલઃ સંવત્સરાન્તગઃ ।
(Page ખં. ૩ અ. ૧૫ પાન ૩૧)
નાનાભાવસમાયુક્તઃ કાલધર્મં પ્રકાશતે ॥ ૧૩॥

સંવત્સરાત્મકઃ કાલઃ પઞ્ચધા પરિકીર્તિતઃ ।
આદ્યઃ સંવત્સરઃ પ્રોક્તો દ્વિતીયઃ પરિવત્સરઃ ॥ ૧૪॥

ઇડાવત્સર એવાઽસૌ ચતુર્થશ્ચાનુવત્સરઃ ।
વત્સરશ્ચૈવ પઞ્ચૈતે શ‍ૃણુ તેષાં ગતિં મુને ॥ ૧૫॥

અઙ્ગપ્રત્યઙ્ગસંયોગઃ કાલેનૈવ પ્રજાયતે ।
અગ્નિર્જઠરસંસ્થશ્ચ કુરુતે સર્વમઞ્જસા ॥ ૧૬॥

દેહોત્પત્તિઃ સ્થિતિશ્ચૈવ નાશસ્તસ્ય પ્રકીર્તિતઃ ।
કાલેન જાયતે સર્વં સોઽગ્નિઃ સંવત્સરઃ સ્મૃતઃ ॥ ૧૭॥

પઞ્ચાનાં મુખ્યરૂપોઽયં કાલકર્મપ્રવર્તકઃ ।
દેહસંસ્થો મહાયોગી બુધૈઃ કાલઃ પ્રકથ્યતે ॥ ૧૮॥

પરિવત્સરનામાઽયં સૂર્યઃ કાલમયો મુને ।
અયનાદિસ્વભાવેન સ્મૃતઃ કાલસ્ય ચાલકઃ ॥ ૧૯॥

વર્ષાશીતોષ્ણકાલેષુ ઋતુમાસક્રમાદિષુ ।
કાલધર્મં સ ચરતિ પ્રકાશયતિ નિત્યશઃ ॥ ૨૦॥

ઇડાવત્સરનામાઽયં ચન્દ્રઃ પ્રોક્તો મનીષિભિઃ ।
તારાનક્ષત્રકાદીનાં ચાલકશ્ચ પ્રજાયતે ॥ ૨૧॥

પિતૃણાં જ્ઞાનકારી ચ કાલસ્યાત્ર ન સંશયઃ ।
કાલક્રમેણ સોમોઽયં દધાત્યમૃતમંશુભિઃ ॥ ૨૨॥

ઓષધીનામંશુભિર્વૈ કાલે ભાવં પ્રકાશતે ।
કાલે દેવજનાનામમૃતપાનં દદાતિ સઃ ॥ ૨૩॥

અનુવત્સરનામાઽસૌ વાયુઃ સર્વત્ર પઠ્યતે ।
પ્રાણાપાનાદિભિર્ભાવૈશ્ચાલકઃ કામકારકઃ ॥ ૨૪॥

આવહપ્રવહાદ્યૈઃ સ નેમિભિર્જ્યોતિષાં ગણમ્ ।
સઞ્ચાલયતિ કાલેન કાલજ્ઞઃ કાલરૂપધૃક્ ॥ ૨૫॥

વત્સરો રુદ્રરૂપોઽયં તથા કાલઃ પ્રકાશતે ।
મહાલયે સમુત્પન્ને લયમોષધયો ગતાઃ ॥ ૨૬॥

તત્ર કાલપ્રમાણેન ત્ર્યમ્બકઃ પુનરેવ ચ ।
સ ઓષધીનાં પ્રસ્રષ્ટા જાયતે કાલસંસ્થિતઃ ॥ ૨૭॥

ગાયત્રી જગતી ત્રિષ્ટુબમ્બિકા નામતઃ સ્મૃતાઃ ।
તાભિરેકત્વભૂતાભિસ્ત્રિવિધાભિઃ સ્વવીર્યતઃ ॥ ૨૮॥

પુનશ્ચૌષધયઃ સૃષ્ટાસ્તત્ર રુદ્રેણ કાલતઃ ।
તેનાઽયં કાલભાવેન જગદ્ભાવયતિ પ્રભુઃ ॥ ૨૯॥

એવં પઞ્ચવિધં કાલં યો જાનાતિ સ્વભાવતઃ ।
ન તસ્ય કાલભાવસ્ય દુઃખં ભવતિ કર્હિચિત્ ॥ ૩૦॥

અધુના શ‍ૃણુ વિપ્રર્ષે કાલમાનં વિશેષતઃ ।
અયનં દ્વિવિધં પ્રોક્તં ષણ્માસાત્મકમુચ્યતે ॥ ૩૧॥

તદેવ દેવતાનાં વૈ દિનમેકં પ્રકથ્યતે ।
ઉત્તરાયણરૂપશ્ચ દિવસઃ પરિકીર્તિતઃ ॥ ૩૨॥

દક્ષિણાયનરૂપા વૈ રાત્રિસ્તેષાં પ્રકીર્તિતા ।
એવં ત્રિંશદ્ભિરાખ્યાતો માસશ્ચૈવ મહામુને ॥ ૩૩॥

માસૈર્દ્વાદશભિશ્ચૈવ વર્ષસ્તેષાં પ્રકીર્તિતઃ ।

એવં સર્વત્ર વિપ્રાગ્ર્ય જ્ઞાતવ્યં કાલજં વપુઃ ॥ ૩૪॥

શુક્લપક્ષમયી રાત્રિઃ કૃષ્ણપક્ષોઽહરેવ ચ ।
પિતૃણાં સુખદઃ કાલો માસેન દિવસો ભવેત્ ॥ ૩૫॥

માસૌ ચ દ્વિવિધૌ પ્રોક્તૌ સૌરચાન્દ્રૌ વિધાનતઃ ।
સઙ્ક્રમેણ રવેર્માસો જાયતે રવિજઃ સ્મૃતઃ ॥ ૩૬॥

પૂર્ણિમાયાં સ સમ્પૂર્ણશ્ચન્દ્રો લોકૈઃ પ્રદૃશ્યતે ।
તદાધારેણ માસો વૈ જ્ઞાતવ્યશ્ચન્દ્રમાનતઃ ॥ ૩૭॥

અથવા ક્ષીણચન્દ્રાયામમાયાં જ્ઞાયતે બુધૈઃ ।
માસશ્ચાન્દ્રમસો વિપ્ર દ્વિવિધઃ પરિકીર્તિતઃ ॥ ૩૮॥

તત્રૈવ કારણં બ્રૂવઃ શૃણુ તત્ત્વાર્થસિદ્ધયે ।
(Page ખં. ૩ અ. ૧૬ પાન ૩૨)
અધિમાસસ્તથા લોકૈઃ ક્ષયમાસો મલાત્મકઃ ॥ ૩૯॥

અમાયાં ચન્દ્રચિહ્નેન જ્ઞાયતે નાન્યથા ક્વચિત્ ।
સ્નાનાર્થં માસમાહાત્મ્યં પૂર્ણિમાયાં વિશેષતઃ ॥ ૪૦॥

ચન્દ્રચિહ્નેન વિપ્રર્ષે જ્ઞાતવ્યં વિબુધૈઃ સદા ।
અન્યચ્ચ પિતૃણાં કાલશ્ચન્દ્રમાસેન જાયતે ॥ ૪૧॥

દેવાનાં પિતૃણાં સ્વર્ગે સુધાપાનં પ્રકીર્તિતમ્ ।
પૂર્ણં સોમકલાભૂતં ચાન્દ્રમાસે ન જાયતે ॥ ૪૨॥

દેવાનાં દિવસે કાલઃ સૂર્યચિહ્નેન જાયતે ।
શુક્લકૃષ્ણગતિશ્ચૈવ કારણં પરિકીર્તિતમ્ ॥ ૪૩॥

ત્રીણિ વર્ષસહસ્રાણિ માનુષેણ પ્રમાણતઃ ।
ત્રિંશતાધિકરૂપાણિ મતઃ સપ્તર્ષિવત્સરઃ ॥ ૪૪॥

નવ વર્ષસહસ્રાણિ માનુષેણ પ્રમાણતઃ ।
અન્યાનિ નવતિશ્ચૈવ ધ્રૌવ્યઃ સંવત્સરઃ સ્મૃતઃ ॥ ૪૫॥

એવં કાલપ્રમાણં યત્ કથિતં તે દ્વિજોત્તમ ।
મૃત્યુયુક્તં સદા ભ્રાન્તં જ્ઞાતવ્યં દ્વન્દ્વસંયુતમ્ ॥ ૪૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે કાલગતિવર્ણનં નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૩.૧૫

# ૩.૧૬ યુગધર્મવર્ણનં નામ ષોડશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

નરનારાયણાવૂચતુઃ ।
દિવ્યવર્ષસહસ્રાણિ દ્વાદશાઽથ મહામુને ।
ચતુર્યુગમયઃ કાલો જ્ઞાતવ્યો વિબુધૈઃ સદા ॥ ૧॥

ચત્વારિ ચ સહસ્રાણિ વર્ષાણિ કૃતનામકમ્ ।
યુગં પ્રકીર્તિતં તત્રાષ્ટશતૈઃ સન્ધિરુચ્યતે ॥ ૨॥

ત્રીણિ વર્ષસહસ્રાણિ યુગં ત્રેતા પ્રકીર્તિતમ્ ।
સન્ધ્યાંશો દ્વિગુણૈસ્તત્ર જ્ઞાતવ્યો વિબુધૈઃ શતૈઃ ॥ ૩॥

સહસ્રે દ્વે ચ વર્ષાણિ દ્વાપરઃ પરિકીર્તિતઃ ।
સન્ધ્યાંશો દ્વિગુણૈસ્તસ્માચ્છતૈસ્તુ પરિકીર્તિતઃ ॥ ૪॥

એકવર્ષસહસ્રં વૈ કલિઃ પરમદારુણઃ ।
તસ્યાઽપિ સન્ધિર્દ્વિગુણો જ્ઞાતવ્યો વિબુધૈસ્તથા ॥ ૫॥

શતાનિ સન્ધિરૂપાણિ જ્ઞાતવ્યાનિ વિશેષતઃ ।
સર્વત્ર યુગમાનેષ્વાદ્યં તયોર્ભોગદાનિ વૈ ॥ ૬॥

એવં દ્વાદશસાહસ્રદેવવર્ષાણિ તાનિ વૈ ।
ચતુર્યુગાનાં માનં ચ કથિતં કાલવેદિભિઃ ॥ ૭॥

આદ્યં કૃતયુગં પ્રોક્તં તતસ્ત્રેતા પ્રકીર્તિતા ।
તતો દ્વાપરનામાઽપિ કલિસ્તસ્માત્ પ્રકીર્તિતઃ ॥ ૮॥

ધ્યાનં કૃતયુગે મુખ્યં ત્રેતાયામધ્વરસ્તપઃ ।
દ્વાપરે પૂજનાચારઃ કલૌ સ્તવનમુચ્યતે ॥ ૯॥

બ્રાહ્મઃ કૃતયુગે ધર્મશ્ચતુષ્પાદઃ સનાતનઃ ।
ત્રેતાયાં ત્રિપદઃ પ્રોક્તો ધર્મો ધર્મવિદાં વરૈઃ ॥ ૧૦॥

દ્વાપરે દ્વિપદો ધર્મઃ સર્વશાસ્ત્રેષુ સમ્મતઃ ।
કલાવેકપદઃ પ્રોક્તઃ સોપ્યંઽતે નાશમેષ્યતિ ॥ ૧૧॥

કૃતે જ્ઞાનં સદા પૂજ્યં ત્રેતાયાં રવિરુચ્યતે ।
દ્વાપરે દૈવતં વિષ્ણું કલૌ શમ્ભું વદન્તિ ચ ॥ ૧૨॥

ચતુર્યુગાનાં માનેષુ ગણેશો મુખ્યભાવતઃ ।
પૂજ્યતે માનવૈઃ સર્વૈઃ સ્વસ્વસિદ્ધ્યર્થમાદરાત્ ॥ ૧૩॥

કૃતે વિનાયકઃ પ્રોક્તઃ કશ્યપાત્મજ એવ સઃ ।
સિંહારૂઢશ્ચ દિગ્બાહુસ્તેજોરૂપી પ્રકથ્યતે ॥ ૧૪॥

(Page ખં. ૩ અ. ૧૬ પાન ૩૩)
ત્રેતાયાં પૂજ્યતે દેવો મયૂરેશશ્ચ ષડ્ભુજઃ ।
મયૂરવાહનઃ પુત્રઃ શશિવર્ણઃ શિવસ્ય વૈ ॥ ૧૫॥

દ્વાપરે મૂષકારૂઢઃ પૂજ્યતે ચ ચતુર્ભુજઃ ।
ગજાનનો વરેણ્યસ્ય રક્તવર્ણઃ સુતઃ સ્મૃતઃ ॥ ૧૬॥

કલાવશ્વસ્થિતશ્ચૈવ ધૂમ્રવર્ણો દ્વિબાહુભૃત્ ।
તારકઃ સર્વભાવજ્ઞો ગણેશઃ પૂજ્યતે જનૈઃ ॥ ૧૭॥

બ્રહ્માકારમયશ્ચૈવ તેન ભેદો ન વિદ્યતે ।
ચતુર્યુગેષુ ધર્મેષુ સિદ્ધિદાતા વિશેષતઃ ॥ ૧૮॥

કૃતે નરાણામાયુષ્યં લક્ષવર્ષાણિ સમ્મતમ્ ।
ત્રેતાયાં દશસાહસ્રં દ્વાપરે તુ સહસ્રકમ્ ॥ ૧૯॥

કલૌ તુ શતવર્ષાણ્યન્તે તન્ન્યૂનં ભવિષ્યતિ ।
વર્ષાણિ પઞ્ચદશ વૈ ક્રમેણ પરમં મતમ્ ॥ ૨૦॥

કૃતે સ્વધર્મસન્નિષ્ઠા જનાઃ સર્વે હિતે રતાઃ ।
પરસ્પરં ભાવયન્તો ભેદહીના વિશેષતઃ ॥ ૨૧॥

ન માત્સર્યાદિ સંયુક્તાઃ કલહાદિવિવર્જિતાઃ ।
બાલ્યાદ્ ધર્મધરા વિપ્ર સદાનન્દયુતાસ્તથા ॥ ૨૨॥

વિષયાત્મસુખં તુચ્છં મન્યન્તે સતતં નરાઃ ।
સુખે સન્તિ સદા જ્ઞાનયુક્તા ધ્યાનપરાયણાઃ ॥ ૨૩॥

વર્ણાશ્રમવિભાગસ્થાઃ સ્વસ્વાચારસમન્વિતાઃ ।
બ્રહ્મણિ શ્રદ્ધયા યુક્તા યોગાભ્યાસપરાયણાઃ ॥ ૨૪॥

ઋતુગામિન એવં તે નાનાધર્મકરાઃ સદા ।
અન્તર્બાહ્યૈકભાવાશ્ચ ભવન્તિ સુખભોગિનઃ ॥ ૨૫॥

ત્રેતાયાં પાદહીનેન નરા ધર્મેણ સંયુતાઃ ।
તત્રાન્તર્બાહ્યભાવેષુ ભિન્નભાવધરા મતાઃ ॥ ૨૬॥

તથા સ્વાર્થં પરાર્થં તે ન સમાના વિશેષતઃ ।
વિષયેચ્છાયુતા વિપ્ર કિઞ્ચિત્ કિઞ્ચિત્ ક્રમેણ વૈ ॥ ૨૭॥

તત્ર સન્ધ્યાંશમાર્ગં ત્વં શ‍ૃણુષ્વૈતં મહામુને ।
અષ્ટૌ શતાનિ વર્ષાણિ કૃતે સન્ધ્યાંશ ઉચ્યતે ॥ ૨૮॥

ચતુઃશતાનિ તત્રૈવ કૃતાન્તે વર્ષકાણિ ચ ।
શતાનિ ત્રીણિ ત્રેતાયા અર્ધાંશેન યુતાનિ ચ ॥ ૨૯॥

શતસપ્તકવર્ષાણિ સન્ધ્યાંશઃ પરિકીર્તિતઃ ।
દિને દિને ક્રમેણૈવ કૃતધર્મો વિનશ્યતિ ॥ ૩૦॥

ત્રેતાધર્મોઽધિકત્વેન તત્ર તિષ્ઠતિ નિશ્ચિતમ્ ।
શતસપ્તકવર્ષેષુ ગતેષુ મુનિસત્તમ ॥ ૩૧॥

કેવલં પ્રભવે ત્રેતાયુગં સર્વસ્વભાવતઃ ।
જ્ઞાતવ્યમેવં સર્વત્ર સન્ધ્યાંશેષુ યુગક્રમૈઃ ॥ ૩૨॥

દ્વાપરે દ્વિપદો ધર્મસ્તત્ર સ્વાર્થપરાયણાઃ ।
કલહાદિસમાયુક્તા ભવન્તિ કિલ માનવાઃ ॥ ૩૩॥

બાહ્યભાવેષુ સાધૂનાં ધર્માણાં સેવકા મતાઃ ।
લજ્જાયુક્તતયા વિપ્ર અન્તરે વિષયપ્રિયાઃ ॥ ૩૪॥

પરેષાં લજ્જયા ધર્મં ચરન્તિ દ્વાપરે નરાઃ ।
વિષયેચ્છાયુતાઃ સર્વે સ્વગૃહે ધર્મલોપકાઃ ॥ ૩૫॥

એતાદૃશાસ્તે ભવન્તિ દ્વાપરે મલસંયુતાઃ ।
નરાઃ સર્વત્ર ભાવેષુ જાનીહિ મુનિસત્તમ ॥ ૩૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે યુગધર્મવર્ણનં નામ ષોડશોઽધ્યાયઃ ॥ ૩.૧૬
(Page ખં. ૩ અ. ૧૭ પાન ૩૪)

## ૩.૧૭ કલિયુગવર્ણનં નામ સપ્તદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

નરનારાયણાવૂચતુઃ ।
સાત્ત્વિકં ચ યુગં પ્રોક્તં કૃતં ત્રેતા ચ રાજસી ।
દ્વાપરસ્તમસા યુક્તઃ સ્વયં રાજસ ઉચ્યતે ॥ ૧॥

કલિસ્તમોમયઃ પૂર્ણસ્તત્ર સર્વં વિનશ્યતિ ।
પાપરૂપધરઃ સાક્ષાદ્વિપ્રધર્મઃ કુતો ભવેત્ ॥ ૨॥

કલૌ પ્રમારકો રોગઃ સતતં ક્ષુદ્ભયં મુને ।
અનાવૃષ્ટિભવં દુઃખં દેશાનાં ચ વિપર્યયઃ ॥ ૩॥

અધાર્મિકા અનાચારા મહાકોપાઽલ્પચેતસઃ ।
વદિષ્યન્ત્યનૃતં લુબ્ધાઃ કલૌ જાતાઃ સુદુઃપ્રજાઃ ॥ ૪॥

અરિષ્ટૈર્દુરધીતૈશ્ચ દુરાચારૈર્દુરાગમૈઃ ।
વિપ્રાણાં કર્મદોષૈશ્ચ પ્રજાનાં જાયતે ભયમ્ ॥ ૫॥

નાધીયતે કલૌ વેદાન્ન યજન્તિ દ્વિજાતયઃ ।
પઠન્તિ ન્યાયતો વેદાન્ શૂદ્રાગ્રે ચાલ્પબુદ્ધયઃ ॥ ૬॥

શૂદ્રાણાં મન્ત્રયોગૈશ્ચ સમ્બન્ધો બ્રાહ્મણૈઃ સહ ।
ભવિષ્યતિ કલૌ વિપ્ર શયનાસનભોજનૈઃ ॥ ૭॥

શૂદ્રા ભવન્તિ રાજાનો બ્રાહ્મણાન્ બાધયન્તિ તે ।
બ્રહ્મહત્યાં પશોર્હત્યાં કુર્વન્તે વૈ નરેશ્વરાઃ ॥ ૮॥

સ્નાનં હોમં જપં દાનં દેવતાનાં તથાઽર્ચનમ્ ।
અન્યાનિ ચૈવ કર્માણિ ન કુર્વન્તિ દ્વિજાતયઃ ॥ ૯॥

વિનિન્દન્તિ ગણેશાનં બ્રાહ્મણાન્ દૈવતાન્યપિ ।
વેદાન્ શાસ્ત્રાણિ સર્વાણિ પુરાણાનિ કલૌ યુગે ॥ ૧૦॥

કુર્વન્ત્યવેદકર્માણિ હ્યનાધારાણિ ભો મુને ।
સ્વધર્મેષુ રુચિર્નૈવ દ્વિજાદીનાં પ્રજાયતે ॥ ૧૧॥

કુશીલચર્યાપાખણ્ડો વૃથાઽનૃતભયં ભવેત્ ।
યાચકાઃ સર્વવર્ણાશ્ચ ભવિષ્યન્તિ કલૌ યુગે ॥ ૧૨॥

અટ્ટશૂલા જનપદાઃ શિવશૂલાશ્ચતુષ્પથાઃ ।
પ્રમદાઃ કેશશૂલાશ્ચ ભવિષ્યન્તિ કલૌ યુગે ॥ ૧૩॥

શુક્લદન્તા અક્ષજિતા મુણ્ડાઃ કાષાયવાસસઃ ।
શૂદ્રા ધર્મં ચરિષ્યન્તિ બ્રાહ્મણાનાં કલૌ યુગે ॥ ૧૪॥

અન્નચૌરા ભવિષ્યન્તિ તથા વેલાભિમર્ષિણઃ ।
ચૌરા ચૌરસ્ય હર્તારો હર્તુર્હર્તાર એવ ચ ॥ ૧૫॥

દુઃખપ્રચુરતાઽલ્પાયુઃ શિશ્નોદરપરાયણાઃ ।
દ્યૂતમદ્યાદિસંસક્તાઃ પરસ્ત્રીલમ્પટા મુને ॥ ૧૬॥

કાપાલિકાસ્તથા ચાન્યે યતયો ગૃહમેધિનઃ ।
વેદવિક્રયિણો વિપ્રાસ્તીર્થવિક્રયિણસ્તથા ॥ ૧૭॥

આસનસ્થા દ્વિજાન્ દૃષ્ટ્વા ન ચલન્ત્યલ્પબુદ્ધયઃ ।
તાડયન્તિ દ્વિજાન્ શૂદ્રા રાજાનો રાજજીવિનઃ ॥ ૧૮॥

ઉચ્ચાસનસમાસીના બ્રાહ્મણાનાં ચ પૂજકાઃ ।
ભવિષ્યન્તિ કલૌ શૂદ્રા વેદાધ્યયનતત્પરાઃ ॥ ૧૯॥

સેવાવસરમાલોક્ય દ્વારિ તિષ્ઠન્તિ વૈ દ્વિજાઃ ।
ઉપાયનાદિ સઙ્ગૃહ્ય શૂદ્રાણાં રાજજીવિનામ્ ॥ ૨૦॥

બુદ્ધિશાલિન એવં વૈ શૂદ્રા ધર્માન્ વદન્તિ વૈ ।
વેદવાદવિચારજ્ઞા બ્રાહ્મણાન્ શિક્ષયન્તિ તે ॥ ૨૧॥

તપો યજ્ઞફલાનાં વૈ વેદાનાં ચ સુકર્મણામ્ ।
વિક્રેતારો ભવિષ્યન્તિ બ્રાહ્મણાશ્ચ કલૌ યુગે ॥ ૨૨॥

પતિં ત્યક્ત્વા સ્ત્રિયશ્ચૈવ પરે પુંસિ નિરન્તરમ્ ।
સંસક્તાશ્ચ ભવિષ્યન્તિ પતિદ્રોહપરાયણાઃ ॥ ૨૩॥

યતયશ્ચ ભવિષ્યન્તિ શતશોઽથ સહસ્રશઃ ।
મદ્યસ્ત્રીસઙ્ગસંસક્તાશ્ચરન્તિ ચ કલૌ યુગે ॥ ૨૪॥

વામમાર્ગાઃ પાશુપતાઃ સાઙ્ખ્યા વૈ પઞ્ચવાહકાઃ ।
ભવિષ્યન્તિ કલૌ તસ્મિન્ બ્રાહ્મણાઃ ક્ષત્રિયાસ્તથા ॥ ૨૫॥

(Page ખં. ૩ અ. ૧૭ પાન ૩૫)
જ્ઞાનમાર્ગેષુ નષ્ટેષુ લોકે નિષ્ક્રિયતાં ગતે ।

કીટમૂષકસર્પાશ્ચ ધર્ષયિષ્યન્તિ માનવાન્ ॥ ૨૬॥

કરિષ્યન્ત્યવતારાંશ્ચ બ્રાહ્મણાનાં કુલેષુ તે ।
દધીચિશાપનિર્દગ્ધા પુરા દક્ષાધ્વરે દ્વિજ ॥ ૨૭॥

શાપયુક્તા ગૌતમસ્ય ભવિષ્યન્તિ વિશેષતઃ ।
વામાદિમાર્ગસંસક્તા જનાન્ ભ્રષ્ટાંશ્ચ કુર્વતે ॥ ૨૮॥

અન્યજાતિષુ સર્વત્ર ભવિષ્યન્તિ તથા નરાઃ ।
દક્ષાધ્વરે સર્વવર્ણાઃ શાપિતાસ્તે દુરાગ્રહાઃ ॥ ૨૯॥

મોહયિષ્યન્તિ ચ જનાન્ દર્શયિત્વા ફલાનિ વૈ ।
તમસાઽઽવિષ્ટહૃદયા બિડાલવ્રતિકાઽધમાઃ ॥ ૩૦॥

બૌદ્ધમાયાધરસ્તત્ર વિષ્ણુઃ પાખણ્ડપોષકઃ ।
સહાયસ્તાન્ સદા દેવો દધીચેઃ શાપકારણાત્ ॥ ૩૧॥

કર્મમાર્ગસ્ય સઞ્છેત્તા ભ્રષ્ટાચારયુતાન્નરાન્ ।
કરિષ્યતિ સ્વયં વિષ્ણુર્યુગધર્મપ્રવર્તકઃ ॥ ૩૨॥

અતજ્જ્ઞાસ્તં ભવિષ્યન્તિ શરણાગતવત્સલમ્ ।
બૌદ્ધમાયાશ્રિતં સર્વે ભ્રષ્ટાચારયુતા નરાઃ ॥ ૩૩॥

કલૌ દશસહસ્રં વૈ વર્ષાણાં ચ યદા ભવેત્ ।
વિષ્ણુસ્ત્યક્ત્વા તદા પૃથ્વીમાલયં સ્વં ગમિષ્યતિ ॥ ૩૪॥

વર્ષપઞ્ચસહસ્રાણિ સ્થિરા ભાગીરથી નદી ।
ગ્રામદેવાસ્તદર્ધેન ગતાઃ સ્વર્ગં મહામુને ॥ ૩૫॥

સ્વધર્મવિધિસંયુક્તં કર્મ યત્ ક્રિયતે નરૈઃ ।
તદેવ દેવભોગ્યં વૈ ભવતિ દ્વિજ સર્વદા ॥ ૩૬॥

વિપરીતં કૃતં કર્મ ત્વાસુરં તત્ પ્રજાયતે ।
કલાવાસુરભાવેન ગતા દેવા નિજાલયમ્ ॥ ૩૭॥

આસુરેણ સ્વભાવેન તીર્થાયતનકાદિષુ ।
સમાગતં નરં દૃષ્ટ્વા ગચ્છન્તિ તીર્થદેવતાઃ ॥ ૩૮॥

તેષુ તીર્થેષુ દેવાનાં મૂર્ત્યાદિષુ તદાઽસુરાઃ ।
પ્રવિશ્ય કર્મભોક્તારો ભવિષ્યન્તિ કલૌ યુગે ॥ ૩૯॥

તીર્થાનિ ગુપ્તભાવેન દેવતાયતનાનિ વૈ ।
સંસ્થિતાનિ કલૌ તસ્મિન્નુપવાસયુતાનિ ચ ॥ ૪૦॥

દૈવેન સંયુતં દૃષ્ટ્વા સ્વભાવેન મહાસુરાઃ ।
ગચ્છન્તિ માનવં તીર્થદેવાઃ સ્વસ્થાનગાઃ પુનઃ ॥ ૪૧॥

તત્ર વૈ કર્મકર્તારો નરા આસુરભાવતઃ ।
ભવિષ્યન્તિ સદા વિપ્ર ભ્રષ્ટા વૈ દોષસંયુતાઃ ॥ ૪૨॥

ક્રિયારૂપા મહાશક્તિઃ સંસ્થિતા જગતીતલે ।
ક્રિયાફલપ્રદાતા વૈ ગણેશઃ સંસ્થિતો ભવેત્ ॥ ૪૩॥

અસુરાણાં સુરાણાં ચ સિદ્ધિદાતા ગજાનનઃ ।
મહિમાનં સ્વકીયં સ કલૌ સઙ્ગોપ્ય સંસ્થિતઃ ॥ ૪૪॥

ધર્મપાદાશ્ચ ચત્વારસ્તપઃ શૌચં દયા તથા ।
સત્યં તત્ર ક્રમેણૈવ સર્વે નશ્યન્તિ ધર્મજાઃ ॥ ૪૫॥

ત્રેતાયાં ચ દયા નષ્ટા નષ્ટં ચ દ્વાપરે તપઃ ।
આચારશ્ચ કલૌ પ્રાપ્તે નષ્ટરૂપો ભવિષ્યતિ ॥ ૪૬॥

સત્યરૂપમયઃ પાદઃ કલૌ તિષ્ઠતિ માનદ ।
તેન સર્વે જના ભૂમૌ વ્યવહારં પ્રકુર્વતે ॥ ૪૭॥

દ્વાપરસ્ય તુ સન્ધ્યાંશે ગતે પૃથુબલઃ કલિઃ ।
બહુલાનૃતભાવેનાદરાત્ સત્યં છિનત્તિ ચ ॥ ૪૮॥

તતઃ ક્રમેણ સત્યસ્ય વિનાશશ્ચ ભવિષ્યતિ ।
તદા કોલાહલો વિપ્ર દેવાનાં સદને ભવેત્ ॥ ૪૯॥

કલૌ દુઃખયુતા લોકા અન્નાદિકવિવર્જિતાઃ ।
ગ્રામાદિ સકલં ત્યક્ત્વા વસન્તિ વનગોચરાઃ ॥ ૫૦॥

પરસ્પરં ક્ષુધાવિષ્ટા ભક્ષયન્તિ વિચેતસઃ ।
સત્યહીના ધરિત્રી વૈ ભવિષ્યતિ મહામતે ॥ ૫૧॥

(Page ખં. ૩ અ. ૧૮ પાન ૩૬)
ષોડશાબ્દં પરં ચાયુઃ પઞ્ચવર્ષસમન્વિતા ।
અન્તર્વત્ની ભવેન્નારી કલૌ તસ્મિન્ વિશેષતઃ ॥ ૫૨॥

એવમાસુરભાવેન જિતં સર્વં મહામુને ।

દેવતા મુનયઃ સર્વે ગણેશાનં સ્તુવન્તિ તે ॥ ૫૩॥

તદા ઢુણ્ઢિઃ સુરાણાં સ હિતાયાઽવતરિષ્યતિ ।
ધૂમ્રવર્ણો હ્યધર્મં તં હત્વા ધર્મં કરિષ્યતિ ॥ ૫૪॥

ધર્મં પ્રવર્તયિત્વા સ અન્તર્ધાનં ગમિષ્યતિ ।
તદા પુનઃ કૃતં પ્રાપ્તં સન્ધ્યાંશેન યુગક્રમૈઃ ॥ ૫૫॥

એવં યુગપ્રમાણં ચ યુગધર્મઃ પ્રકીર્તિતઃ ।
માયામયમિદં સર્વં ત્વં જાનીહિ ભ્રમાત્મકમ્ ॥ ૫૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે કલિયુગવર્ણનં નામ સપ્તદશોઽધ્યાયઃ ॥ ૩.૧૭

## ૩.૧૮ બ્રહ્મચર્યાશ્રમવર્ણનં નામાષ્ટાદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

નરનારાયણાવૂચતુઃ ।
વર્ણાશ્રમાશ્ચ ચત્વારસ્તાઞ્છૃણુષ્વ મહામુને ।
બ્રાહ્મણઃ ક્ષત્રિયો વૈશ્યઃ શૂદ્રો વર્ણાઃ પ્રકીર્તિતાઃ ॥ ૧॥

બ્રહ્મચર્યં ચ ગાર્હસ્થ્યં વાનપ્રસ્થ્યં તથૈવ ચ ।
પ્રોક્તા વેદેષુ સંન્યાસ આશ્રમા વેદવાદિભિઃ ॥ ૨॥

બ્રાહ્મણાનાં ક્રમેણૈતે મતાશ્ચત્વાર આશ્રમાઃ ।
ક્ષત્રિયાણાં ચ વૈશ્યાનાં સંન્યાસો ન પ્રવિદ્યતે ॥ ૩॥

ગાર્હસ્થ્યમેવ શૂદ્રાણામાશ્રમઃ પરિકીર્તિતઃ ।
અન્ત્યજાનાં તદેવાપિ જ્ઞાતવ્યં વિબુધૈઃ સદા ॥ ૪॥

બ્રાહ્મણશ્ચ સમુત્પન્નો બાલભાવપરાયણઃ ।
પઞ્ચમે સપ્તમે ચૈવાઽષ્ટમે મૌઞ્જીં સમાચરેત્ ॥ ૫॥

કૃતોપવીતકો વિપ્રઃ પ્રગચ્છેદ્ગુરુસન્નિધૌ ।
તત્ર વેદાદિકં સર્વમભ્યસેદ્ વિનયાન્વિતઃ ॥ ૬॥

તત્રૈવ બ્રહ્મચર્યાન્તં બ્રાહ્મણઃ પ્રસમાચરેત્ ।
સાયં પ્રાતશ્ચરેદ્ભિક્ષાં ગાયત્રીમભ્યસેત્તતઃ ॥ ૭॥

પ્રાતઃકાલે બ્રહ્મરૂપાં મધ્યાહ્ને રુદ્રરૂપિણીમ્ ।

ગાયત્રીં વિષ્ણુરૂપાં તાં ધ્યાયેત્ સાયાહ્ન આદરાત્ ॥ ૮॥

ભૂર્ભુવઃસ્વસ્ત્રિભિશ્ચૈવાચામેન્નિયમસંયુતઃ ।
સ્વાહાન્તાભિર્મહાતેજાઃ સ્પૃશેન્ન્યાસેષુ ચેન્દ્રિયમ્ ॥ ૯॥

તર્જન્યાદ્યઙ્ગુલીભિશ્ચ તિસૃભિઃ સંસ્પૃશેન્ મુખમ્ ।
તર્જન્યઙ્ગુષ્ઠયોગેન નાસિકાં સંસ્પૃશેદ્ બુધઃ ॥ ૧૦॥

અઙ્ગુષ્ઠાનામિકાભ્યાં વૈ તથા ચક્ષૂંષિ સંસ્પૃશેત્ ।
કનિષ્ઠયા ચ કર્ણૌ વૈ સંસ્પૃશેન્નાત્ર સંશયઃ ॥ ૧૧॥

અઙ્ગુષ્ઠાભ્યાં સ્પૃશેન્નાભિમુરઃ કરતલેન ચ ।
સર્વાઙ્ગુલીભિર્ભ્રૂમધ્યમઙ્ગુષ્ઠાગ્રેણ વૈ શિખામ્ ॥ ૧૨॥

સર્વાઙ્ગુલીભિર્બાહું સ્વં સ્પૃશેન્ન્યાસાદિકર્મસુ ।
એવમાચમનં પ્રોક્તં સ્વસ્વશાખોક્તનામભિઃ ॥ ૧૩॥

મન્ત્રૈર્વૈદિકસમ્ભૂતૈઃ સન્ધ્યા કાર્યા વિશેષતઃ ।
ન્યાસાંશ્ચ કારયેત્તત્ર પ્રણવસ્ય મહામુને ॥ ૧૪॥

વ્યાહૃતીનાં ચ ગાયત્ર્યાઃ ષડઙ્ગેષ્વક્ષરોદ્ભવાન્ ।
ગાયત્રીશિરસો ન્યાસાંસ્તત આચમનં ચરેત્ ॥ ૧૫॥

સૂર્યશ્ચેતિ ચ મન્ત્રેણ પ્રાતઃકાલે વિશેષતઃ ।
આપઃ પુનન્તુ મધ્યાહ્ને સાયાહ્નેઽગ્નિશ્ચ મન્ત્રતઃ ॥ ૧૬॥

તતો માર્જનકં કુર્યાન્નવવિંશતિસઙ્ખ્યયા ।
(Page ખં. ૩ અ. ૧૮ પાન ૩૭)
તતોઽર્ઘ્યદાનકં કુર્યાદુપસ્થાનં તતશ્ચરેત્ ॥ ૧૭॥

ગાયત્ર્યાઃ શાપમોક્ષં વૈ તતો ધ્યાનં જપં ચરેત્ ।
બ્રહ્મચારી શતાન્યેવ પઞ્ચકાલેષુ વૈ પૃથક્ ॥ ૧૮॥

ગાયત્ર્યાશ્ચ જપં કુર્યાદ્વાગ્યતો માનસૈક્યતઃ ।
અષ્ટોત્તરશતં કાલે ગૃહસ્થો જપમાચરેત્ ॥ ૧૯॥

વાનપ્રસ્થશ્ચ કાલે વૈ સહસ્રં જપમાચરેત્ ।
એવં સન્ધ્યા ત્રિકાલેષુ બ્રાહ્મણૈઃ ક્રિયતે સદા ॥ ૨૦॥

ત્રિપદાં ચૈવ ગાયત્રીં જપેદોઙ્કારસંયુતામ્ ।
તત્ર ક્રમં પ્રવક્ષ્યામિ શ ૃણુ તં મુનિસત્તમ ॥ ૨૧॥

આદૌ પ્રણવમુચ્ચાર્ય પશ્ચાદ્વ્યાહૃતિરુચ્યતે ।
ભૂર્ભુવઃ સ્વરિતિ પ્રોક્તા તતઃ પ્રણવ ઉચ્યતે ॥ ૨૨॥

તતઃ સા ત્રિપદા વિપ્ર ગાયત્રી ચ તતઃ પુનઃ ।
ઓઙ્કારો વિધિના નિત્યં જપઃ સઙ્ક્રિયતે દ્વિજૈઃ ॥ ૨૩॥

સંન્યાસિભિશ્ચ વિપ્રેન્દ્ર ચતુષ્પાદા વિશેષતઃ ।
જપ્તવ્યા સૈવ ગાયત્રી સ્વસ્વાશ્રમવિભાગતઃ ॥ ૨૪॥

બ્રહ્મચારી સ્વગોત્રાદિગૃહસ્થેષુ મહામુને ।
ભિક્ષાં ચરેદ્વિધાનેન ગુરવે તાં નિવેદયેત્ ॥ ૨૫॥

ભવત્ પૂર્વં વ્રતી વિપ્રો ભવન્ મધ્યં તુ ક્ષત્રિયઃ ।
ભવદન્તં તથા વૈશ્યઃ સદા ભિક્ષાર્થમુચ્ચરેત્ ॥ ૨૬॥

ગૃહીતા ગુરુણા ભિક્ષા સમ્પૂર્ણા યદિ માનદ ।
તદોપવાસસંયુક્તો વસેદ્વૈ બ્રહ્મચર્યવાન્ ॥ ૨૭॥

સ્વલ્પા વા પરિપૂર્ણા વા દત્તા ભિક્ષા મહાત્મના ।
ગુરુણા તાવતીં ભુક્ત્વા સન્તિષ્ઠેત્તસ્ય સન્નિધૌ ॥ ૨૮॥

પાલાશદણ્ડસંયુક્તઃ સાયં પ્રાતઃ સ વહ્નિષુ ।
જુહુયાત્ સમિધં ચૈવ નખલોમધરો ભવેત્ ॥ ૨૯॥

ગુરુદેવપરં તસ્ય દૈવતં સર્વભાવતઃ ।
ગુરુસ્ત્રીપુત્રસેવાં સ ગુરુવત્તાં સમાચરેત્ ॥ ૩૦॥

એકાન્તે ગુરુપત્નીભિર્ન વસેચ્ચ કદાચન ।
ન સ્ત્રીભિઃ સહ સમ્ભાષાં સ કુર્યાત્ કાર્યહીનકઃ ॥ ૩૧॥

સ્ત્રીગાનાદિકભાવાન્ વૈ શ‍ૃણુયાન્ન સુયન્ત્રિતઃ ।
ન શુક્રં સન્ત્યજેતાપિ બ્રહ્મચારી વિશેષતઃ ॥ ૩૨॥

સ્વપ્ને શુક્રં ગતં ચેદ્વૈ તદા સ્નાનં સમાચરેત્ ।
અષ્ટોત્તરશતં તત્ર ગાયત્રી જપ ઉચ્યતે ॥ ૩૩॥

ગુરુણાઽધ્યાપિતશ્ચૈવ કુર્યાદધ્યયનં મુને ।
ન સ્વયં સંવદેત્ પ્રાજ્ઞો ગુરું વિદ્યાપરાયણઃ ॥ ૩૪॥

એવં નાનાવિધૈઃ પ્રોક્તૈર્લક્ષણૈઃ સંયુતો ભવેત્ ।

બ્રહ્મચારી મહાભાગો વેદાધ્યયનતત્પરઃ ॥ ૩૫॥

વર્ષાણિ દ્વાદશૈવાઽયં ષોડશાઽપ્યથ વા દ્વિજઃ ।
અથ વેચ્છાપ્રમાણેન બ્રહ્મચર્યં સમાચરેત્ ॥ ૩૬॥

વેદાદિકં સમભ્યસ્ય કૃત્વા કણ્ઠગમાદરાત્ ।
પશ્ચાદ્ગુરું સમભ્યર્ચ્ય દદ્યાત્તસ્મૈ સ દક્ષિણામ્ ॥ ૩૭॥

મનોવિષયસંયુક્તં યદા તત્ર ગૃહી ભવેત્ ।
નોચેત્ સંન્યાસકં કુર્યાદથવા વનગો ભવેત્ ॥ ૩૮॥

અથવા બ્રહ્મચર્યસ્થઃ સદા તિષ્ઠેદ્ દ્વિજોત્તમઃ ।
યાદૃશી ચિત્તશુદ્ધિર્વૈ તાદૃશં સર્વમાચરેત્ ॥ ૩૯॥

કૃતમધ્યયનં યેન તદધીનં મહામુને ।
જ્ઞાનં યોગાદિકં કર્મ તસ્માત્તચ્ચ સમાચરેત્ ॥ ૪૦॥

બ્રહ્મચર્યમિદં પ્રોક્તં સઙ્ક્ષેપેણ મહામુને ।
શ્રવણાત્ પુણ્યદં પૂર્ણં લોકોપકૃતયે ભવેત્ ॥ ૪૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે બ્રહ્મચર્યાશ્રમવર્ણનં નામાષ્ટાદશોઽધ્યાયઃ ॥ ૩.૧૮
(Page ખં. ૩ અ. ૧૯ પાન ૩૮)

## ૩.૧૯ આશ્રમધર્મવર્ણનં નામ એકોનવિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

નરનારાયણાવૂચતુઃ ।
તતઃ ક્ષૌરં દ્વિજઃ કૃત્વા પિતૃમાતૃપરાયણઃ ।
સ્વગૃહે વાસમાતિષ્ઠેત્ દ્વિજદેવપરાયણઃ ॥ ૧॥

ઊનેન વયસા યુક્તાં કુલશીલાદિસંયુતામ્ ।
સર્વાવયવસમ્પૂર્ણાં વધૂં સ વરયેત્તતઃ ॥ ૨॥

ઋતુગામી ભવેચ્ચૈવ સન્તાનાર્થં કલત્રવાન્ ।
દેવવિપ્રાતિથિપ્રેપ્સુઃ સન્તિષ્ઠેત્ સ ગૃહાશ્રમી ॥ ૩॥

યજનં યાજનં ચૈવ દાનમધ્યયનં તથા ।
પ્રતિગ્રહોઽધ્યાપનં ચ ષટ્ કર્માણિ સમાચરેત્ ॥ ૪॥

સ્નાનં સન્ધ્યાં જપં હોમમાતિથ્યં દેવતાર્ચનમ્ ।
સ્વાધ્યાયં વૈશ્વદેવં વૈ ગૃહી નિત્યં સમાચરેત્ ॥ ૫॥

ચતુર્થીવ્રતમાદ્યં ચ કર્તવ્યં ત્વાશ્રમસ્થિતૈઃ ।
તથાઽન્યાનિ વ્રતાદીનિ કર્તવ્યાનિ વિશેષતઃ ॥ ૬॥

ચતુર્થી વ્રતહીનસ્ય નાધિકારો વ્રતેષુ વૈ ।
સદા શૌચી ભવેન્નૂનં ચતુઃપદવિવર્જિતઃ ॥ ૭॥

શુક્લે ચતુર્થિકાયાં વૈ યોઽન્નં ભુઙ્ક્તે મહામુને ।
માંસાહારી મતો નૂનં તથા ભવતિ નારકી ॥ ૮॥

અગ્નિહોત્રં ચરેન્નિત્યં તથા શ્રાદ્ધાદિકં મુને ।
સદા દયાપરો ભૂત્વા સન્તિષ્ઠેદ્ ગૃહસંસ્થિતઃ ॥ ૯॥

અભક્ષભક્ષણં ક્વાપિ ન કુર્યાત્ સ ગૃહાશ્રમી ।
શૌચાચારસમાયુક્તો ભવેન્નિયમસંયુતઃ ॥ ૧૦॥

તર્પણં પિતૃદેવાનાં મુનીનાં ચ સમાચરેત્ ।
પઞ્ચયજ્ઞાદિકં સર્વં નિત્યં શાસ્ત્રે પ્રકીર્તિતમ્ ॥ ૧૧॥

સ્વસ્વસત્તાપ્રમાણેન કર્તવ્યં ગૃહમેધિના ।
તત્ર ધર્મમનુપ્રોક્તં તં શ‍ૃણુષ્વ મહામુને ॥ ૧૨॥

અર્ધેન પુત્રદારાદીંશ્ચતુર્થાંશેન સૌહૃદમ્ ।
ચતુર્થાંશેન દેવાદીન્ તોષયેચ્ચ ગૃહાશ્રમી ॥ ૧૩॥

એવં નાનાવિધં ધર્મં ગૃહસ્થશ્ચ સમાચરેત્ ।
તૃતીયભાગ આયુષ્યયુક્તઃ સોઽપિ વની ભવેત્ ॥ ૧૪॥

સંસ્થાપ્ય દારાન્ પુત્રાદિસમીપે વા સહ સ્ત્રિયા ।
વનં ગચ્છેત્ સ ધર્માર્થં તપસ્વી કર્મસિદ્ધયે ॥ ૧૫॥

પુત્રા જાતાશ્ચ નોત્પન્ના અપિ તદ્ વનગો ભવેત્ ।
તપસ્તત્ર પ્રકુર્યાત્ સ ફલકન્દાદિ ભક્ષયન્ ॥ ૧૬॥

વન્યેન ચાગ્નિહોત્રાદ્યતિથીનાં પૂજનાદિકમ્ ।
સમાચરેદ્વનસ્થશ્ચ નાનાતપસિ સંસ્થિતઃ ॥ ૧૭॥

સમીપે સંસ્થિતા પત્ની મૈથુનં ન સમાચરેત્ ।
મનસાઽપિ મહાભાગ વાનપ્રસ્થઃ કદાચન ॥ ૧૮॥

વાયુભક્ષાદિકં કુર્યાદ્વાયુસાધનમેવ સઃ ।
પ્રાણાયામૈશ્ચ વિપ્રેશ આચરેદ્વનસંસ્થિતઃ ॥ ૧૯॥

પઞ્ચાગ્નિસાધનં ગ્રીષ્મે હેમન્તે જલવાસનમ્ ।
વર્ષાસ્વાકાશવાસી સ વાનપ્રસ્થો ભવેત્તથા ॥ ૨૦॥

સઙ્કટે ચ વનસ્થઃ સ ગ્રામે નૈવ વસેત્ કદા ।
પ્રવેશોઽપિ ન કર્તવ્યો ગ્રામે તેન મહાત્મના ॥ ૨૧॥

એવં નાનાવિધાન્ ધર્માન્ વાનપ્રસ્થગ આચરેત્ ।
ચતુર્થાંશં યદા તસ્યાયુષ્યં વિદ્યેત ભો મુને ॥ ૨૨॥

ચતુર્થાંશાયુષિ સ્થાતા સંન્યાસં સ સમાચરેત્ ।
તદા સ્ત્રિયાઽપિ તસ્યૈવાશાં ત્યક્ત્વા જ્ઞાપિતો ભવેત્ ॥ ૨૩॥

આજ્ઞા તસ્મૈ પ્રદાતવ્યા સ્ત્રિયા ચૈવ વિશેષતઃ ।
સ્વયં તપસિ દેહં સ્ત્રી શોષયેન્ મરણાવધિ ॥ ૨૪॥

અગ્નિહોત્રં સ્વદેહેઽસાવાત્મન્યેકસ્વભાવતઃ ।
કૃત્વા ચ નિઃસ્પૃહો ભૂત્વા વિચરેત્ પૃથિવીમિમામ્ ॥ ૨૫॥

અહં બ્રહ્મેતિ ભાવેન યોગભૂમિક્રમેણ ચ ।
(Page  ખં. ૩ અ. ૧૯ પાન ૩૯)
યોગી ભવતિ સંન્યાસી ચિત્તભૂમિવિવર્જિતઃ ॥ ૨૬॥

કર્માદિન્યાસસંયુક્તો વિચરેદ્યત્ર તત્ર વૈ ।
ગ્રામૈકરાત્રવાસી સ ભવેન્ન્યાસપરાયણઃ ॥ ૨૭॥

દ્વન્દ્વભાવવિહીનઃ સ ભિક્ષાં નિત્યં સમાચરેત્ ।
કરપાત્રી ભવેદ્વાઽપિ સંન્યાસી ચ સદા મુને ॥ ૨૮॥

કરપાત્રી સ સંન્યાસી ગ્રાસે ગ્રાસે મહામુને ।
અશ્વમેધાદિકં પુણ્યં પ્રાપ્નોત્યત્ર ન સંશયઃ ॥ ૨૯॥

ચાતુર્માસ્યે વસેચ્ચૈવ તીર્થક્ષેત્રાદિભૂમિષુ ।
જિતેન્દ્રિયો જિતપ્રાણો નિઃસઙ્ગઃ સર્વકર્મસુ ॥ ૩૦॥

અહિંસા પરમો ધર્મઃ સંન્યાસાનાં વિશેષતઃ ।
તૃણાદિકં ચ વિપ્રેશ ચ્છેદયેન્ન કદા ન ચ ॥ ૩૧॥

ત્રિદણ્ડી યસ્તુ સંન્યાસી કુટીચક ઉદાહૃતઃ ।
વિધિં તત્ર પ્રવક્ષ્યામિ શૃણુ ત્વં મુનિસત્તમ ॥ ૩૨॥

સ્વધર્માચરણં નિત્યં દેહદણ્ડઃ સ ઉચ્યતે ।
મૌનં વાચામયં દણ્ડો દ્વિતીયશ્ચ પ્રકીર્તિતઃ ॥ ૩૩॥

સર્વત્ર રસહીનં ચ માનસં વર્તતે યથા ।
કર્તવ્યં તત્તથા તેન મનોદણ્ડઃ પ્રકીર્તિતઃ ॥ ૩૪॥

કુટીં દેહમયીં યોગી ચાલયેત્ બિમ્બભાવતઃ ।
બ્રહ્મણિ બ્રહ્મભૂતશ્ચ સ કુટીચક ઉચ્યતે ॥ ૩૫॥

તતો બહૂદકો યોગી દ્વિદણ્ડી સ ભવેન્ મુને ।
દેહદણ્ડવિહીનત્વાત્ સ્વેચ્છાચારી વિશેષતઃ ॥ ૩૬॥

એકગર્તસ્થમુદકં સર્વૈઃ સઙ્ગૃહ્યતે યથા ।
ગર્તે દોષો નરાણાં વૈ વિદ્યતે ન કદાચન ॥ ૩૭॥

તથાત્મા દેહસંસ્થશ્ચ ચતુર્દેહી વિકારતઃ ।
ભિન્નઃ સદા ન તદ્દોષૈર્લિપ્યતે ક્વાપિ નિશ્ચિતમ્ ॥ ૩૮॥

સોઽહં બ્રહ્મણિ સંસ્થશ્ચ ભેદહીનો મહામુનિઃ ।
બહૂદકઃ સ નિઃસઙ્ગો દેહાદિભ્યઃ પ્રકીર્તિતઃ ॥ ૩૯॥

તતો હંસાશ્રમઃ પ્રોક્તો માનસે દણ્ડધારકઃ ।
દેહવાણીદણ્ડહીનઃ સ્વેચ્છાચારી મતો મુને ॥ ૪૦॥

દેહદેહિસમાયોગે બ્રહ્મ બોધાત્મકં મતમ્ ।
તત્ર સંસ્થઃ સ્વયં યોગી દ્વિવિધે તન્મયો ભવેત્ ॥ ૪૧॥

દ્વન્દ્વં જલમયં પ્રોક્તં દેહદેહિસ્વરૂપકમ્ ।
તત્ર દુગ્ધં ભવેદ્બ્રહ્મ હંસસ્તદ્ ગ્રાહકો ભવેત્ ॥ ૪૨॥

તતઃ પરમહંસશ્ચ જ્ઞાનદણ્ડપરાયણઃ ।
દેહવાણીમનોભૂતૈર્દણ્ડૈર્હીનઃ પ્રકીર્તિતઃ ॥ ૪૩॥

દેહદેહિમયં બ્રહ્મ ભ્રાન્તિયુક્તં વિશેષતઃ ।
તચ્ચ પ્રોક્તં સવિષયં હંસકર્મ પરાયણમ્ ॥ ૪૪॥

સદા સાક્ષિસ્વરૂપં યત્પરં બ્રહ્મ મહામુને ।
તત્ર સંસ્થો મહાયોગી ત્રિવિધેષુ વિભાગતઃ ॥ ૪૫॥

નાહં દેહો ન દેહસ્થો દેહદેહિમયો ન વૈ ।
સદા સાક્ષિસ્વરૂપસ્થો જ્ઞાનાનન્દમયો ભવેત્ ॥ ૪૬॥

યદ્યજ્ઞાનં ભવેત્તસ્ય તત્તત્ સર્વં વિકારજમ્ ।
તત્ત્યક્ત્વા દ્વન્દ્વહીનશ્ચ સ્વેચ્છાચારી ભવેત્ સ્વયમ્ ॥ ૪૭॥

ચતુર્વિધોઽયં સંન્યાસસ્તત્રાશ્રમસમાશ્રિતઃ ।
અહં બ્રહ્મેતિ યોગેન બ્રહ્મભૂતો ભવેન્નરઃ ॥ ૪૮॥

મનસા રસયુક્તેન વિષયાદિષુ ભો મુને ।
સંન્યાસશ્ચ કૃતો યેન નારકઃ સ ભવિષ્યતિ ॥ ૪૯॥

કપર્દિકા યદા તેનૈકા ગૃહીતા મહામુને ।
તદા સહસ્રવર્ષાણિ કુમ્ભીપાકે પતેત્ ધ્રુવમ્ ॥ ૫૦॥

સ્ત્રીસમ્ભોગસુખેચ્છા ચેત્તસ્ય વૈ માનસે ક્ષણમ્ ।
સમ્ભવેચ્ચેત્તદા વિપ્ર ગોસહસ્રવધી ભવેત્ ॥ ૫૧॥

કૃતે મનઃ સદાઽઽધીનં નરાણાં ધર્મયોગતઃ ।
(Page  ખં. ૩ અ. ૨૦ પાન ૪૦)
ધ્યાનં મુખ્યં કૃતં તત્ર તેન સર્વં પ્રલભ્યતે ॥ ૫૨॥

ત્રેતાયાં ચઞ્ચલં ચિત્તં ધર્મસ્ય પાદહીનતઃ ।
તપસ્તત્ર કૃતં મુખ્યં તેન સર્વં લભેન્નરઃ ॥ ૫૩॥

દ્વાપરે દેહકષ્ટં યન્ન ભવેત્તેન તત્ર ચ ।
મુખ્યઃ સ્વધર્માચારશ્ચ તેન સર્વં લભેન્નરઃ ॥ ૫૪॥

કલાવાસુરભાવેન નષ્ટો ધર્મઃ ક્રમેણ વૈ ।
તત્ર સ્મરણમાત્રેણ નામ્નઃ સર્વં લભેન્નરઃ ॥ ૫૫॥

નામસ્મરણમાર્ગે વર્ણાશ્રમો ન ચ વિદ્યતે ।
સંન્યાસાદિઃ સદાચારો ભવેત્તેનાસુરં હતમ્ ॥ ૫૬॥

કલાવાસુરબાહુલ્યાન્ન સંન્યાસસ્ય યોગ્યતા ।
ચઞ્ચલં દેહચિત્તાદિ તેન નષ્ટો ભવિષ્યતિ ॥ ૫૭॥

વર્ણાશ્રમવિહીનશ્ચ યો વૈ ભવતિ નિશ્ચિતમ્ ।
તસ્ય દણ્ડો ન વિદ્યેતાદણ્ડી વેદે સ કથ્યતે ॥ ૫૮॥

જ્ઞાનદણ્ડપરિત્યાગાત્ સ્વયં યોગી ભવેન્નરઃ ।
નિષેધવિધિહીનશ્ચ સ્વેચ્છાધર્મપરો ભવેત્ ॥ ૫૯॥

કર્તવ્યં યદિ તેનાઽપિ વેદેષુ વિધૃતં ભવેત્ ।
તદા વિધિસમાયુક્તો જન્તુર્ભવતિ નિશ્ચિતમ્ ॥ ૬૦॥

કિઞ્ચિન્ન તેન કર્તવ્યં યદા વેદે પ્રકીર્તિમ્ ।
તદા નિષેધસંયુક્તો નરો ભવતિ માનદ ॥ ૬૧॥

અતો વિધિનિષેધાભ્યાં હીનો યોગી પ્રકીર્તિતઃ ।
તેનાચરિત આચારઃ સ એવં તસ્ય યોગદઃ ॥ ૬૨॥

અતો યોગી મહાભાગ દણ્ડહીનઃ પ્રકીર્તિતઃ ।
વર્ણાશ્રમવિહીનઃ સ બ્રહ્મભૂતઃ પ્રજાયતે ॥ ૬૩॥

સ વિનાયકનામા વૈ નાયકૈર્વર્જિતઃ સ્વયમ્ ।
યોગી તેન સમાખ્યાતઃ સર્વેષાં નાયકો ભવેત્ ॥ ૬૪॥

બ્રહ્મણિ બ્રહ્મભૂતશ્ચેજ્જાતો યોગસ્ય સેવયા ।
યદિ વર્ણાશ્રમે સંસ્થો ભવતિ સ્વેચ્છયા મુને ॥ ૬૫॥

લોકસઙ્ગ્રહણાર્થં સ નિત્યં ધર્મં સમાચરેત્ ।
નિઃસ્પૃહો ધર્મભોગાર્થે મતં તદપિ તાદૃશમ્ ॥ ૬૬॥

એતદાશ્રમમાર્ગશ્ચ કથિતસ્તે મહામુને ।
માયયા રચિતં સર્વં જાનીહિ ભ્રમણાત્મકમ્ ॥ ૬૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે આશ્રમધર્મવર્ણનં નામ એકોનવિંશતિતમોઽધ્યાયઃ ॥ ૩.૧૯

## ૩.૨૦ વર્ણધર્મપ્રકાશો નામ વિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

નરનારાયણાવૂચતુઃ ।
વર્ણાશ્ચત્વાર એવં તે સ્વસ્વધર્મયુતા મુને ।
બ્રાહ્મણઃ ક્ષત્રિયો વૈશ્યઃ શૃણુ શૂદ્રઃ પ્રકથ્યતે ॥ ૧॥

વ્યભિચારેણ તેષાં વૈ વર્ણા જાતા મહામુને ।
નાનાવિધા વિશેષેણ જાનીહ્યત્ર ન સંશયઃ ॥ ૨॥

તત્ર બ્રાહ્મણધર્મં તે કથયામિ સમાસતઃ ।
શ‍ૃણુ માયાવિનાશાર્થં માયારૂપં પુરાતનમ્ ॥ ૩॥

ચતુર્ધા બ્રાહ્મણાનાં વૈ વૃત્તિઃ શાસ્ત્રૈઃ પ્રકીર્તિતા ।
ઉઞ્છઃ શિલં તથા શુક્લં મૃતં ચામૃતકં ભવેત્ ॥ ૪॥

અયાચિતં ચ ભૂમેર્યત્ કર્ષણં વા વને સ્થિતિઃ ।
તેષાં માર્ગં પ્રવક્ષ્યામિ શ‍ૃણુષ્વ સુસમાહિતઃ ॥ ૫॥

ગૃહીતં કૃષિકૈર્ધાન્યં તત્ર શિષ્ટં તદગ્રહમ્ ।
કણાદિ તસ્ય યોગેન દેહપોષણમાચરેત્ ॥ ૬॥

(Page  ખં. ૩ અ. ૨૦ પાન ૪૧)
અથવા વાણિજાદીનાં ગૃહેભ્યો માર્જિતં ભવેત્ ।
કણાદિ તસ્ય યોગેન દેહપોષણમાચરેત્ ॥ ૭॥

એકા વૃત્તિરિયં પ્રોક્તા દ્વિતીયાં શ‍ૃણુ સામ્પ્રતમ્ ।
ભૂમેઃ કર્ષણહીનેન વૃષ્ટ્યાઽન્નં તત્ર જાયતે ॥ ૮॥

તેનૈવ દેહનિર્વાહઃ કર્તવ્યો બ્રાહ્મણૈઃ સદા ।
શુક્લવૃત્યાઽઽચરેદ્ભૈક્ષ્યં રાગલોભવિવર્જિતઃ ॥ ૯॥

તેન દેહસ્ય નિર્વાહં સ કુર્યાત્તન્મૃતં સ્મૃતમ્ ।
અયાચિતેન વા કાર્યોઽમૃતમેતત્ પ્રકીર્તિતમ્ ॥ ૧૦॥

કૃષીવલૈઃ સ ભૂમેર્યત્ કર્ષણં વા સમાચરેત્ ।
તત્ર ધાન્યોદ્ભવે નૈવ દેહપોષણકં ચરેત્ ॥ ૧૧॥

સ્વધર્મઃ પૂર્વભાગે તે કથિતશ્ચ મહામુને ।
સેવાદિવૃત્તિયોગેન તિષ્ઠેન્ન બ્રાહ્મણઃ કદા ॥ ૧૨॥

ક્ષત્રિયાણાં ચ શસ્ત્રાદિધારણેન મહામુને ।
દેહનિર્વાહકઃ પ્રોક્તો ન સેવાકારકો ભવેત્ ॥ ૧૩॥

અગ્નિહોમં ચ વિપ્રસ્ય હસ્તેનાઽયં સમાચરેત્ ।
સંન્યાસં નૈવ વિપ્રેશ કુર્યાત્ ક્ષત્રિયજઃ કદા ॥ ૧૪॥

વૈશ્યોઽપિ ક્રયકારી વૈ વિક્રયં ચ તથાઽઽચરેત્ ।
કૃષિભિઃ કર્ષણં ભૂમેર્ગવાં પાલનમાદરાત્ ॥ ૧૫॥

સંન્યાસધર્મહીનશ્ચ સદા તિષ્ઠેત્ સ માનદ ।

ક્ષત્રિયાણાં વિશાં વિપ્ર યજનં દાનમેવ ચ ॥ ૧૬॥

સમાખ્યાતં ત્વધ્યયનં ન પ્રોક્તં યાજનાદિકમ્ ।
અગ્નિકર્મ તથા દેવાર્ચનં બ્રાહ્મણહસ્તતઃ ॥ ૧૭॥

કારયેદ્વૈશ્યધર્મજ્ઞઃ સ્વધર્મપાલનાય વૈ ।
તર્પણં બ્રાહ્મણાસ્યેન મન્ત્રેણ તુ સમાચરેત્ ॥ ૧૮॥

એષ વૈશ્યસ્ય માર્ગો વૈ કથિતસ્તે દ્વિજોત્તમ ।
શૂદ્રસ્ય તુ ત્રિવર્ણાનાં સદા સેવા પ્રકીર્તિતા ॥ ૧૯॥

દાસવન્નાત્ર સન્દેહ આશ્રમો ગૃહિસંજ્ઞિતઃ ।
દાનં દદ્યાદ્ દ્વિજાયૈવ પુરાણશ્રવણં તથા ॥ ૨૦॥

કુર્યાદ્વેદાક્ષરસ્યાયં ન કુર્યાચ્છ્રવણં કદા ।
પુરાણાદિષુ દેવાનામવતારાઃ પ્રકીર્તિતાઃ ॥ ૨૧॥

તેષાં મૂર્તિપ્રતિષ્ઠા વૈ કૃતા દેવર્ષિભિઃ પુરા ।
તાસાં સ્પર્શાદિકં ચૈવ ન કર્તવ્યં કદાચન ॥ ૨૨॥

નરાદિભિશ્ચ સર્વત્ર સ્વેચ્છયા સ્થાપિતા ભવેત્ ।
તસ્યાઃ સ્પર્શશ્ચ કર્તવ્યઃ શૂદ્રૈર્નિત્યં મહામુને ॥ ૨૩॥

નામમન્ત્રેણ પૂજા વૈ કર્તવ્યા સ્મરણં તથા ।
મૃત્તિકાર્ચાં સમભ્યર્ચેન્નામમન્ત્રેણ વા મુને ॥ ૨૪॥

આવાહનાદિ પ્રારભ્ય વિસર્ગાન્તં સમાચરેત્ ।
પુરાણસમ્ભવૈર્મન્ત્રૈઃ શ્રાદ્ધતર્પણકાદિકમ્ ॥ ૨૫॥

બ્રાહ્મણાનાં મુખૈશ્ચૈવ શુદ્રૈઃ કર્તવ્યમાદરાત્ ।
ન પુરાણાદિસમ્ભૂતાઃ શ્લોકાસ્તે શૂદ્રજાતિભિઃ ॥ ૨૬॥

પઠિતવ્યા મહાભાગ શ્રવણં સમ્મતં સદા ।
અન્ત્યજાતિભવાઃ શૂદ્રાસ્તૈર્નામસ્મરણં સદા ॥ ૨૭॥

કર્તવ્યં દેવમૂર્તીનાં સ્પર્શો નૈવ કદાચન ।
પુરાણસમ્ભવૈર્મન્ત્રૈર્ન કર્તવ્યં મહામુને ॥ ૨૮॥

કર્મ કિઞ્ચિચ્ચ તૈઃ સર્વૈઃ સ્વસ્વધર્મપરાયણૈઃ ।
પિતૃણાં દેવતાનાં ચોદ્દેશં કૃત્વા ધનાદિકમ્ ॥ ૨૯॥

ધાન્યં તૈઃ સમ્પ્રદાતવ્યમેષ માર્ગઃ પુરાતનઃ ।
સ્વસ્વધર્મરતા એતે સ્વર્ગગામિન એવ ચ ॥ ૩૦॥

ભવન્તિ નાત્ર સન્દેહો મહાભોગાઃ સુખે રતાઃ ।
પ્રાજાપત્યં બ્રાહ્મણાનાં ક્ષત્રિયાણાં તથૈન્દ્રકમ્ ॥ ૩૧॥

વાયવં વૈશ્યજાતીનાં ગાન્ધર્વં શૂદ્રજન્મિનામ્ ।
સ્વસ્વકર્મરતાનાં વૈ પદં પ્રોક્તં મનીષિભિઃ ॥ ૩૨॥

(Page ખં. ૩ અ. ૨૧ પાન ૪૨)
તત્ર તે ભોગભોક્તારો ભવન્ત્યત્ર ન સંશયઃ ।
એવં માયામયં સ્વલ્પં વર્ણધર્મપ્રકાશનમ્ ।
શ‍ૃણોતિ યઃ પઠેત્તસ્ય માયામોહો ન વિદ્યતે ॥ ૩૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે વર્ણધર્મપ્રકાશો નામ વિંશતિતમોઽધ્યાયઃ ॥ ૩.૨૦

## ૩.૨૧ દેવપિતૃકર્મવર્ણનં નામૈકવિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

નરનારાયણાવૂચતુઃ ।
સ્ત્રીણાં ધર્મં પ્રવક્ષ્યાવસ્તં શ‍ૃણુષ્વ મહામતે ।
જાતમાત્રા ચ સા દેવૈર્ભુજ્યતે ત્રિભિરાદરાત્ ॥ ૧॥

ચન્દ્રો ગન્ધર્વકો વહ્નિર્દ્વે દ્વે વર્ષે મહામતે ।
કન્યાં ભુનક્તિ ધર્મેણ ષટ્ વર્ષાણિ વિભાગતઃ ॥ ૨॥

તન્મધ્યે ન પ્રદાતવ્યા કન્યા કસ્મૈ સુહૃજ્જનૈઃ ।
દત્તા ચેદ્દેવતાક્ષોભો ભવેદ્વૈ ધર્મનાશનાત્ ॥ ૩॥

સપ્તાષ્ટનવદિગ્વર્ષવયોયુક્તા સુહૃજ્જનૈઃ ।
કન્યા નરાય દાતવ્યા સાધવે કુલજાય વૈ ॥ ૪॥

દશવર્ષાધિકા કન્યા રજોયુક્તા ચ સમ્મતા ।
ન દત્તા યદિ તન્મધ્યે મહાપાપપ્રવર્ધિની ॥ ૫॥

પદે પદે બ્રહ્મહત્યાં લભન્તે જનકાદયઃ ।
અતઃ કન્યા પ્રદાતવ્યા વિધિના સ્વર્ગદા ભવેત્ ॥ ૬॥

કન્યાદાનસમં પુણ્યં વિદ્યતે ન કદાચન ।
યયા વંશઃ પ્રવર્ધેત સર્વેભ્યઃ સુખદાયકઃ ॥ ૭॥

રજોદર્શનયુક્તા ચેજ્જાતા સ્ત્રી સા તદા ભવેત્ ।
વશગા સ્વપતેસ્તસ્યા એવ તદ્દૈવતં મતમ્ ॥ ૮॥

દાસીવત્તં પતિં સા વૈ સમ્ભજેદ્ભક્તિસંયુતા ।
વને પતિર્યદા યાતસ્તદા તમનુગા ભવેત્ ॥ ૯॥

યદિ પુત્રાદયો બાલાસ્તદા તેષાં પ્રસન્નિધૌ ।
પોષણાર્થં ભવેચ્ચૈવ સંસ્થિતા વનગે પતૌ ॥ ૧૦॥

યદિ સંન્યાસધારી ચેત્ પતિર્ભવતિ ભો મુને ।
તદા સ્ત્રિયા પ્રદાતવ્યા તસ્મા આજ્ઞા મહામુને ॥ ૧૧॥

યદા ગૃહસ્થિતો ભર્તા મૃતશ્ચેત્ સહગા ભવેત્ ।
વનસ્થિતસ્તદા તદ્વત્ કર્તવ્યં સુસ્ત્રિયા કિલ ॥ ૧૨॥

મૃતે ભર્તરિ પત્ની સા ગર્ભયુક્તા રજસ્વલા ।
તદા પત્યા ન સઙ્ગચ્છેદ્વિધવાધર્મગા ભવેત્ ॥ ૧૩॥

ચતુર્થે દિવસે શુદ્ધા ભવેત્ સા પતિકર્મણિ ।
પઞ્ચમે દિવસે વિપ્રાદિપૂજાયાં શુચિર્ભવેત્ ॥ ૧૪॥

વિધવા સ્ત્રી સદા વિપ્ર એકભુક્તપરાયણા ।
વ્રતાદિના સ્વદેહં વૈ શોષયેન્નિત્યમાદરાત્ ॥ ૧૫॥

એવમાદિઃ સતીનાં વૈ ધર્મો મુખ્યઃ પ્રકીર્તિતઃ ।
શ્રવણાત્ પુણ્યદસ્તાસાં ભવત્યેવ મહામુને ॥ ૧૬॥

સર્વેષાં પિતૃદેવાનાં કર્મ કર્તવ્યમાદરાત્ ।
મનુજૈસ્તત્ર પિતૃણાં કર્મ સઙ્ક્ષેપતઃ શ‍ૃણુ ॥ ૧૭॥

અથ શ્રાદ્ધમમાવાસ્યાં પ્રાપ્ય કાર્યં દ્વિજોત્તમૈઃ ।
પિણ્ડાન્વાહાર્યકં ભક્ત્યા ભુક્તિમુક્તિફલપ્રદમ્ ॥ ૧૮॥

પિણ્ડાન્વાહાર્યકં શ્રાદ્ધં સઙ્ક્રમેષુ પ્રશસ્યતે ।
અપરાહ્ણે દ્વિજાતીનાં પ્રશસ્તેનામિષેણ વૈ ॥ ૧૯॥

(Page ખં. ૩ અ. ૨૧ પાન ૪૩)
પૂર્ણિમાદ્યા અમાન્તા યાસ્તિથયઃ કૃષ્ણપક્ષકે ।

ચતુર્દશીં વર્જયિત્વા પ્રશસ્તાઃ શ્રાદ્ધકર્મણિ ॥ ૨૦॥

શસ્ત્રાદિવિષયોગૈર્યે મૃતાસ્તેષાં મહામુને ।
ચતુર્દશ્યાં સમાખ્યાતં શ્રાદ્ધં નાન્યત્ર શસ્યતે ॥ ૨૧॥

કૃષ્ણપક્ષેઽષ્ટકાસ્તિસ્રઃ પૌષમાસાદિષુ ત્રિષુ ।
ચતસ્રોઽપ્યષ્ટકાઃ પુણ્યાઃ શ્રાદ્ધકર્મણિ સર્વદા ॥ ૨૨॥

ત્રયોદશી સમાયુક્તા યુગાદિતિથયઃ સ્મૃતાઃ ।
મન્વાદિતિથયઃ શ્રાદ્ધે પ્રશસ્તાઃ પુણ્યદા મતાઃ ॥ ૨૩॥

નૈમિત્તિકમિદં પ્રોક્તં વ્યતીપાતે ચ વૈધૃતૌ ।
બાન્ધવાનાં મૃતાનાં ચ દશપિણ્ડાદિકં મુને ॥ ૨૪॥

કામ્યાનિ ચૈવ શ્રાદ્ધાનિ શસ્યન્તે ગ્રહણાદિષુ ।
અયને વિષુવે ચૈવ તીર્થે ક્ષેત્રે ત્વનિત્યકમ્ ॥ ૨૫॥

અક્ષય્યં વારતિથિષુ સ્વસ્વજન્મદિનેષ્વપિ ।
નક્ષત્રેષુ ચ સર્વેષુ કાર્યં શ્રાદ્ધં વિશેષતઃ ॥ ૨૬॥

અથવેહ સુખપ્રાપ્ત્યૈ પિતૃલોકસુખાય ચ ।
શ્રાદ્ધં કામપ્રદં પ્રોક્તં સર્વદા નિત્યવન્ મુને ॥ ૨૭॥

ગયાયામક્ષયં શ્રાદ્ધં પ્રયાગેઽમરકણ્ટકે ।
મયૂરેશપુરે ચૈવ કાશ્યાદિષુ વિશેષતઃ ॥ ૨૮॥

ગાયન્તિ પિતરો ગાથાં નર્તયન્તિ મનીષિણઃ ।
એષ્ટવ્યા બહવઃ પુત્રાઃ શીલવન્તો ગુણાન્વિતાઃ ॥ ૨૯॥

તેષાં તુ સમવેતાનાં યદ્યેકોઽપિ ગયાં વ્રજેત્ ।
ગયાં પ્રાપ્યાનુસર્ગેણ યદિ શ્રાદ્ધં સમાચરેત્ ॥ ૩૦॥

તારિતાઃ પિતરસ્તેન સ યાતિ પરમાં ગતિમ્ ।
વારાહે પર્વતે ચૈવ ગયાયાં ચ વિશેષતઃ ॥ ૩૧॥

મયૂરે ચ તથા કાશ્યામષ્ટવૈનાયકસ્થલે ।
ગઙ્ગાદ્વારે પ્રભાસે ચ બિલ્વકે નીલપર્વતે ॥ ૩૨॥

કુરુક્ષેત્રે સેતુબન્ધે ભૃગુતુઙ્ગે મહાલયે ।
કેદારે ફલ્ગુતીર્થે વૈ નૈમિષારણ્યકાદિષુ ॥ ૩૩॥

ઇત્યાદિબહુરૂપેષુ યદિ શ્રાદ્ધં સમાચરેત્ ।
તદા ભુક્તિપ્રદં પ્રોક્તમપવર્ગપ્રદં ભવેત્ ॥ ૩૪॥

ચતુર્થી શુક્લકૃષ્ણૈવૈકાદશી રવિવાસરઃ ।
પ્રદોષશ્ચ તથા વિપ્ર અષ્ટમી સર્વસિદ્ધિદા ॥ ૩૫॥

નિત્યં દેવાર્ચનં પ્રોક્તં વ્રતાદિષુ વિશેષતઃ ।
એવં નાનાવ્રતાદીનાં કર્તવ્યં સેવનં નરૈઃ ॥ ૩૬॥

અગ્નિહોત્રાદિમાર્ગૈશ્ચ દેવાનાં સેવનં મતમ્ ।
તીર્થાદિદાનસમ્ભાવૈરિષ્ટાપૂર્તાદિસમ્મતમ્ ॥ ૩૭॥

એવં દૈવં તથા પિત્ર્યં વિવિધં કર્મ કથ્યતે ।
તદેવ બ્રહ્મણિ પ્રાજ્ઞૈરર્પિતં યોગદં ભવેત્ ॥ ૩૮॥

ઇદં માયામયં પ્રોક્તં કર્મ વર્ણાશ્રમાત્મકમ્ ।
માયામોહનિવૃત્ત્યર્થં રચિતં વિશ્વયોનિના ॥ ૩૯॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે દેવપિતૃકર્મવર્ણનં નામૈકવિંશતિતમોऽધ્યાયઃ ॥ ૩.૨૧
(Page ખં. ૩ અ. ૨૨ પાન ૪૪)

## ૩.૨૨ માન્ધાતુશ્ચરિત્રકથનં નામ દ્વાવિંશતિતમોऽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

નરનારાયણાવૂચતુઃ ।
ચતુર્દશ મનૂનાં વૈ ષટ્કં યત્તે પ્રકીર્તિતમ્ ।
તૈસ્તપશ્ચ કૃતં ઘોરં ગણેશસ્ય મહાત્મનઃ ॥ ૧॥

નાનામન્ત્રજપેનૈવ નાનાધ્યાનપરાયણૈઃ ।
નિરાહારપ્રભાવેણ તોષિતસ્તૈર્ગજાનનઃ ॥ ૨॥

પૂર્ણવર્ષસહસ્રેણ યયૌ વિઘ્નપતિઃ પ્રભુઃ ।
ઉવાચ વૃણુત પ્રાજ્ઞા વરાંસ્તાન્ પ્રદદામ્યહમ્ ॥ ૩॥

તતસ્તૈઃ પૂજિતો દેવઃ સ્તુતશ્ચ વિવિધૈઃ સ્તવૈઃ ।
બહુત્વાન્નૈવ શક્યં તદ્વર્ણનં મુનિસત્તમ ॥ ૪॥

સર્વેષામીપ્સિતં દત્ત્વા યયૌ સ્વાનન્દકે પુરે ।

તે સર્વે સ્વસ્વકર્મજ્ઞાશ્ચક્રુઃ સ્વસ્વક્રિયાં મુને ॥ ૫॥

મન્વન્તરેષ્વતીતેષુ તૈઃ પુનશ્ચ ગણેશ્વરઃ ।
આરાધિતો વિશેષેણ યોગશાન્ત્યર્થમાદરાત્ ॥ ૬॥

ક્રમેણ બ્રહ્મભૂતાસ્તે યયુસ્તં ગણપં પુનઃ ।
એકભાવેન યોગજ્ઞા યોગાકારં મહામુને ॥ ૭॥

પુત્રાશ્ચ બહવસ્તેષાં વર્ણનં નૈવ શક્યતે ।
પૌત્રાદિક્રમભાવેન પાલિતા તૈર્વસુન્ધરા ॥ ૮॥

વૈવસ્વતેન્તરે પ્રાપ્તેઽધુના તત્ર બ્રવીમિ તે ।
શ‍ૃણુ સઙ્ક્ષેપતો વિપ્ર મનુજાનાં ચરિત્રકમ્ ॥ ૯॥

મનોસ્તુ દશ પુત્રા વૈ જાતાઃ પિતૃસમા મુને ।
સુદ્યુમ્નઃ પ્રથમસ્તેષાં જ્યેષ્ઠા કન્યા બભૂવ હ ॥ ૧૦॥

ઇક્ષ્વાકુર્નૃગશર્યાતિદિષ્ટા ધૃષ્ણઃ કરૂષકઃ ।
નરિષ્યન્તપૃષધ્રૌ ચ નભગઃ પરિકીર્તિતાઃ ॥ ૧૧॥

નવૈતે સૂર્યવંશે વૈ શક્રતુલ્યપરાક્રમાઃ ।
જ્યેષ્ઠે ચન્દ્રસ્ય વંશો વૈ સ્ત્રીભાવાત્ સમ્બભૂવ હ ॥ ૧૨॥

સુદ્યુમ્નઃ સ કદાચિદ્વૈ મૃગયાર્થં વને યયૌ ।
વનેષુ સૈન્યસંયુક્તો બભ્રામામિતવિક્રમઃ ॥ ૧૩॥

દૈવયોગેન રાજાઽયં યયૌ ગૌરીવનં મુને ।
તત્ર પ્રવેશમાત્રેણ સ્ત્રીરૂપઃ સ બભૂવ હ ॥ ૧૪॥

શિવેન શૈલપુત્ર્યર્થં શાપિતં તદ્વનં સદા ।
મૃકણ્ડદેહજ શ‍ૃણુષ્વોગ્રં વૈ તત્ર કારણમ્ ॥ ૧૫॥

ગૌરીવને ભવાન્યા સ નગ્નઃ શમ્ભુશ્ચ સા તથા ।
નગ્ના રેમે શિવેનૈવ તયા શમ્ભુશ્ચ માનદ ॥ ૧૬॥

એકદા મુનયઃ શ્રેષ્ઠા વસિષ્ઠાદ્યાઃ સમાયયુઃ ।
દર્શનાર્થં મહેશસ્ય તત્ર તે વિવિશુઃ સુખમ્ ॥ ૧૭॥

તાન્ દૃષ્ટ્વા લજ્જિતા દેવી શિવશ્ચૈવ મહામુને ।
તતસ્તે વિમુખા જગ્મુર્મુનયો લજ્જિતા ભૃશમ્ ॥ ૧૮॥

તતઃ શિવેન શાપો વૈ દત્તસ્તત્ર વને મુને ।
પ્રવેશેઽત્ર પુમાન્ સદ્યો ભવતુ સ્ત્રીસ્વરૂપધૃક્ ॥ ૧૯॥

સુદ્યુમ્નસ્તત્ર સઞ્જાતો નારીરૂપો વિશેષતઃ ।
શુશુભે યૌવનશ્રિયા સ્તનભારભરાન્વિતઃ ॥ ૨૦॥

તતસ્તત્ર બુધો દેવશ્ચન્દ્રપુત્રઃ સમાયયો ।
તેન દૃષ્ટા સુરૂપા સા નારી મોહકરી મુને ॥ ૨૧॥

સાઽપિ તં ચક્રમે તત્ર દેવરૂપં મહાપ્રભમ્ ।
તેન ભુક્ત્વા યયૌ સ્થાનં સ્વકીયં લજ્જિતાઽભવત્ ॥ ૨૨॥

તસ્યાં પુરુરવા જજ્ઞે ચન્દ્રવંશધરઃ પ્રભુઃ ।
શ્રાદ્ધકર્મણિ વિખ્યાતો બભૂવ પિતૃભક્તિતઃ ॥ ૨૩॥

તદર્થં ચ વસિષ્ઠેન ગણેશસ્ય મહામનુઃ ।
દત્તો વિનાયકાયેતિ નમોન્તઃ સ્ત્રીસ્વરૂપિણે ॥ ૨૪॥

રાજપુત્રી વનં ગત્વા તતાપ તપ ઉત્તમમ્ ।
શતવર્ષૈર્ગણાધ્યક્ષસ્તાં યયૌ ભક્તિભાવતઃ ॥ ૨૫॥

તયા સમ્પૂજિતો ઢુણ્ઢિઃ સ્તુતસ્તસ્યૈ વરં દદૌ ।
તયા પુરુષભાવાય યાચિતશ્ચ વરઃ શુભઃ ॥ ૨૬॥

તથેતિ તં પુનઃ સદ્યઃ કૃત્વા નરસુરૂપિણમ્ ।
(Page ખં. ૩ અ. ૨૨ પાન ૪૫)
ગણેશઃ સ યયૌ સ્થાનં સ્વકીયં ભક્તવત્સલઃ ॥ ૨૭॥

સુદ્યુમ્નસ્ય તતસ્તસ્ય પુત્રા જાતાસ્ત્રયો મુને ।
ઉત્કલશ્ચ ગયશ્ચૈવ વિનીતશ્ચ મહાબલઃ ॥ ૨૮॥

પુત્રાન્ સ રાજ્યે સંસ્થાપ્ય મહાતેજા યયૌ વનમ્ ।
ગણેશં યોગમાર્ગેણ તોષયામાસ નિત્યદા ॥ ૨૯॥

શાન્તિયોગધરઃ સોઽપિ બભૂવ વનસંસ્થિતઃ ।
અન્તે સાયુજ્યતાં પ્રાપ્તો ગણેશસ્ય મહાબલઃ ॥ ૩૦॥

સુદ્યુમ્ને સ્ત્રીત્વમાપન્ને ઇલાનામધરે મુને ।
ઇક્ષ્વાકું રાજ્યધર્મે તં સ્થાપયામાસ વૈ મનુઃ ॥ ૩૧॥

વનં યયૌ મહાભાગો મનુર્વૈવસ્વતો મુને ।

સૂર્યાત્ પ્રાપ્ય મહામન્ત્રં જજાપ ચ ષડક્ષરમ્ ॥ ૩૨॥

સૂર્યેણ યોગમાર્ગશ્ચ કથિતસ્તેન વિઘ્નપમ્ ।
અભજદ્યોગશાન્ત્યર્થં સોઽપિ શાન્તો બભૂવ હ ॥ ૩૩॥

નિત્યં ગણપતિં સ્વર્ગેઽભજચ્ચાનન્યચેતસા ।
મહાયોગી મનુર્દેવં ન મુમોચ કદાચન ॥ ૩૪॥

ઇક્ષ્વાકુઃ પુત્રકામાર્થં વસિષ્ઠસ્યોપદેશતઃ ।
અષ્ટાક્ષરેણ મન્ત્રેણાઽતોષયદ્ ગણનાયકમ્ ॥ ૩૫॥

શતવર્ષૈઃ પ્રસન્નોઽભૂદ્દદૌ તં વરમુત્તમમ્ ।
સ્તુતઃ સમ્પૂજિતસ્તેન યયૌ સ્થાનં ગણેશ્વરઃ ॥ ૩૬॥

ગણેશવરદાનેન વિકુક્ષિસ્તસ્ય ચાત્મજઃ ।
બભૂવ સર્વમાન્યઃ સ તેજસ્વી દૃઢવિક્રમઃ ॥ ૩૭॥

સંસ્થાપ્ય સ્વાધિકારે વૈ રાજ્યે રાજા યયૌ વનમ્ ।
પુનસ્તેન સુમન્ત્રેણ તોષયામાસ વિઘ્નપમ્ ॥ ૩૮॥

ક્રમેણ શાન્તિમાપન્ન ઇક્ષ્વાકુર્બ્રહ્મણો મુને ।
બ્રહ્મભૂતઃ સ્વભાવસ્થઃ સ્વાનન્દે ગણપં યયૌ ॥ ૩૯॥

વિકુક્ષેરભવન્ પુત્રા દશ પઞ્ચ મહામુને ।
તેષાં જ્યેષ્ઠઃ કકુત્સ્થશ્ચ શૃણુ તસ્ય વિચેષ્ટિતમ્ ॥ ૪૦॥

દૈત્યૈઃ સન્તાડિતા દેવાઃ શરણં તં નૃપાત્મજમ્ ।
યયુઃ સોઽપિ મહાતેજા દૈત્યાન્ યોદ્ધું સમાયયૌ ॥ ૪૧॥

તત્રેન્દ્રં વૃષભં તસ્ય કૃત્વા કકુદિ સંસ્થિતઃ ।
જઘાન દૈત્યપાન્ સર્વાન્ વિજયી ચાઽભવન્નૃપઃ ॥ ૪૨॥

કકુત્સ્થસ્તેન દેવેન્દ્રૈર્નામ્ના સઙ્કીર્તિતો નૃપઃ ।
સ ગણેશ્વરભક્તો વૈ યયૌ વિઘ્નેશ્વરં પરમ્ ॥ ૪૩॥

તતોઽનેનાઃ પૃથુસ્તસ્માદ્વિશ્વરન્ધિશ્ચ તત્સુતઃ ।
તસ્માચ્ચન્દ્રો મહાબાહુસ્તસ્માચ્ચ યુવનાશ્વકઃ ॥ ૪૪॥

તસ્માચ્છાબસ્તનામાઽભૂદ્ બૃહદશ્વશ્ચ તત્સુતઃ ।
તતઃ કુવલયાશ્વશ્ચ પુત્રોઽભૂદેવ ધુન્ધુહા ॥ ૪૫॥

ધુન્ધું હત્વા મહાદૈત્યં ધુન્ધુમારો બભૂવ હ ।
ધુન્ધુમારસ્ય પુત્રા વૈ ત્રયઃ પ્રોક્તા મહામુને ॥ ૪૬॥

દૃઢાશ્વઃ કપિલાશ્વશ્ચ ભદ્રાશ્વશ્ચ મહાબલઃ ।
દૃઢાશ્વસ્ય ચ હર્યશ્વો મહાબલપરાક્રમઃ ॥ ૪૭॥

હર્યશ્વસ્ય નિકુમ્ભોઽભૂન્નિકુમ્ભાદ્બર્હણાશ્વકઃ ।
કૃશાશ્વશ્ચ રણાશ્વશ્ચ દ્વૌ પુત્રૌ તસ્ય સમ્મતૌ ॥ ૪૮॥

કૃશાશ્વસ્ય ચ પુત્રોઽભૂદ્યુવનાશ્વ ઇતિ સ્મૃતઃ ।
સ યુદ્ધે દેવતુલ્યો વૈ બભૂવ પરમદ્યુતિઃ ॥ ૪૯॥

તેન પુત્રાર્થમાનન્દાન્ મુનિભિશ્ચ મહાત્મના ।
વરુણસ્ય કૃતો યજ્ઞસ્તત્ર તૈર્મન્ત્રિતં જલમ્ ॥ ૫૦॥

રાત્રૌ રાજા પપૌ વિપ્ર તૃષિતો દૈવયોગતઃ ।
બ્રાહ્મણૈશ્ચ તદા પૃષ્ટં કેન પીતં જલં મહત્ ॥ ૫૧॥

રાજ્ઞા પીતં વિદિત્વા તે વિસ્મિતા બ્રાહ્મણાસ્તતઃ ।
ઊચુસ્તં રાજશાર્દૂલં કિં કૃતં ચ ત્વયા પ્રભો ॥ ૫૨॥

તવોદરે તથા ગર્ભો ભવિષ્યતિ ન સંશયઃ ।
(Page ખં. ૩ અ. ૨૩ પાન ૪૬)
એવમુક્ત્વા ચ તે યજ્ઞં પૂર્ણં કૃત્વા યયુઃ સ્થલમ્ ॥ ૫૩॥

ઉદરે યુવનાશ્વસ્ય ગર્ભઃ સંવવૃધે મુને ।
સમ્પૂર્ણે તત્ર દેવેન્દ્રો ગર્ભે તસ્ય મહાત્મનઃ ॥ ૫૪॥

વિદાર્ય જઠરં સદ્યઃ પૂર્વવત્તં ચકાર હ ।
કં ધાસ્યતિ કુમારોઽયં તત્રેન્દ્રસ્તાનુવાચ હ ॥ ૫૫॥

માં ધાસ્યતિ તતસ્તેન માન્ધાતા કથિતો દ્વિજૈઃ ।
ઇન્દ્રેણ વર્ધિતઃ સોઽપિ રરાજ પરમદ્યુતિઃ ॥ ૫૬॥

સ તુ સર્વાન્ વશે કૃત્વા સાર્વભૌમો બભૂવ હ ।
અવ્યાહતગતિર્લોકે દેવતુલ્યો વિશેષતઃ ॥ ૫૭॥

ગુણા વર્ણયિતું શક્યા માન્ધાતુર્ન મહાત્મનઃ ।
સ એવ ગણરાજં તમભજન્નિત્યમાદરાત્ ॥ ૫૮॥

વસિષ્ઠાદ્યોગમાશ્રિત્ય યોગિવન્દ્યો બભૂવ હ ।

પુરુકુત્સઃ સુતસ્તસ્ય સંસ્થાપ્ય સ વનં યયૌ ॥ ૫૯॥

ગણેશભક્તિં વૈ તત્ર ચકારાંઽતે લયં યયૌ ।
સ્વાનન્દે ગણપે વિપ્ર બ્રહ્મભૂતઃ સ્વભાવતઃ ॥ ૬૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે માન્ધાતુશ્ચરિત્રકથનં નામ દ્વાવિંશતિતમોઽધ્યાયઃ ॥ ૩.૨૨

## ૩.૨૩ અમ્બરીષચરિતં નામ ત્રયોવિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુનિરુવાચ ।
મનોર્વંશે મહાભાગોંઽબરીષશ્ચ બભૂવ યઃ ।
એકાદશીવ્રતી નિત્યં વદતં તસ્ય ચેષ્ટિતમ્ ॥ ૧॥

નરનારાયણાવૂચતુઃ ।
મનોર્વંશેંઽત્યપુત્રોઽભૂદમ્બરીષઃ પ્રતાપવાન્ ।
નિત્યં વિષ્ણું સ્વભાવેનાઽભજચ્ચાનન્યમાનસઃ ॥ ૨॥

એકાદશીવ્રતેનૈવ તોષયામાસ માધવમ્ ।
તતો બહુગતે કાલે દ્વાદશ્યાં તં યયૌ મુનિઃ ॥ ૩॥

દુર્વાસાઃ ક્રોધશાલી ચાતિથિઃ પારણકેઽભવત્ ।
તં પ્રણમ્ય સ રાજર્ષિરુવાચ પ્રકૃતાઞ્જલિઃ ॥ ૪॥

ભગવન્ સ્વલ્પકાલસ્થા દ્વાદશી મે ચ પારણે ।
વ્રતસાધનકાર્યાર્થં પ્રાર્થયામિ મહામુને ॥ ૫॥

સ્વલ્પકાલેન સન્ધ્યાદિ કૃત્વાઽઽગન્તવ્યમાદરાત્ ।
તથેતિ નૃપતિં વિપ્ર ઉક્ત્વા તીર્થં જગામ હ ॥ ૬॥

તત્ર શીઘ્રતયા તેન કૃતં સન્ધ્યાદિકં મુને ।
તથાપિ કાલયોગેન દ્વાદશી પ્રગતા તતઃ ॥ ૭॥

મુહૂર્તમાત્રકાલસ્યોત્ક્રમણં તેન વૈ કૃતમ્ ।
નૃપેણ પલમાત્રા સા દ્વાદશી સાધિતાઽભવત્ ॥ ૮॥

વિષ્ણુતીર્થં તતસ્તેન ભક્ષિતં વ્રતસિદ્ધયે ।
પશ્ચાદતિથિરાજસ્ય પ્રતીક્ષામકરોન્નૃપઃ ॥ ૯॥

તતઃ શીઘ્રતયા તત્ર દુર્વાસાઃ પ્રયયૌ મુને ।
રાજ્ઞા તસ્મૈ સ્વવૃત્તાન્તઃ કથિતો વિસ્તરેણ હ ॥ ૧૦॥

શ્રુત્વા સ કુપિતોઽત્યન્તં દુર્વાસાસ્તં શશાપ હ ।
નિમન્ત્ર્ય માં ત્વયા રાજન્ પ્રકૃતં પારણં કથમ્ ॥ ૧૧॥

અતસ્ત્વં ફલહીનો વૈ ભવિષ્યસિ ન સંશયઃ ।
એવમુક્ત્વા જગામાઽસૌ દુર્વાસાઃ સ્વેચ્છયા ચરન્ ॥ ૧૨॥

તતઃ સોઽપિ નૃપોઽત્યન્ત દુઃખિતઃ સંસ્થિતોઽભવત્ ।
ઉપોષણસમાયુક્તઃ સ્વગૃહે તં પ્રતીક્ષયન્ ॥ ૧૩॥

અતિથિં ત્વાગતં ત્યક્ત્વા કથં કુર્વે હિ ભોજનમ્ ।
(Page  ખં. ૩ અ. ૨૩ પાન ૪૭)
નિમન્ત્ર્ય તં વિશેષેણ જપધ્યાનપરાયણઃ ॥ ૧૪॥

ગતે સંવત્સરે તત્રાઽઽજગામ મુનિનારદઃ ।
પ્રપૂજ્ય સર્વવૃત્તાન્તં કથયામાસ તં નૃપઃ ॥ ૧૫॥

તતસ્તં નારદઃ પ્રાહ શ ૃણુ રાજન્ મહામતે ।
જલભક્ષણમાત્રેણ પારણં ચ ત્વયા કૃતમ્ ॥ ૧૬॥

તેનોપોષણયુક્તેન ત્વયા ધર્મઃ પ્રપાલિતઃ ।
દ્વાદશી વ્રતગા પૂર્ણા સાધિતા વ્રતસિદ્ધયે ॥ ૧૭॥

અપરાધવિહીનસ્ય તવાઽયં વિઘ્ન ઉત્થિતઃ ।
દુર્વાસાઃ કોપસંયુક્તો જગામ ક્ષુધિતો ગૃહાત્ ॥ ૧૮॥

અતસ્ત્વં વિઘ્નરાજં તં ભજ યત્નેન માનદ ।
તેન વિઘ્નવિહીનશ્ચ ભવિષ્યસિ ન સંશયઃ ॥ ૧૯॥

વિષ્ણુના પ્રેષિતોઽહં વૈ ત્વદર્થં નૃપસત્તમ ।
સર્વેષામાદિરૂપોઽયમન્તે સોઽપિ ગણેશ્વરઃ ॥ ૨૦॥

શિવવિષ્ણ્વાદયસ્તસ્ય ગણાઃ પ્રોક્તા ન સંશયઃ ।
તેન સંસ્થાપિતાઃ સર્વે નાનાકાર્યેષુ ભૂમિપ ॥ ૨૧॥

ચિત્તં બુદ્ધિસ્વરૂપં યત્તત્ર ચિન્તામણિઃ સ્થિતઃ ।
તં ગચ્છ શરણં વત્સ પતિં બુદ્ધેર્વિશેષતઃ ॥ ૨૨॥

ત્યક્ત્વા સિદ્ધિપતિં દેવં સિદ્ધિમિચ્છતિ દુર્મતિઃ ।

તસ્યાસિદ્ધિર્ભવેન્નિત્યં સર્વત્રાઽત્ર ન સંશયઃ ॥ ૨૩॥

એવમુક્ત્વા મુનિસ્તસ્મૈ દદૌ મન્ત્રં ષડક્ષરમ્ ।
મહાવિષ્ણુર્જપતિ યં તતઃ સોઽન્તર્હિતોઽભવત્ ॥ ૨૪॥

અમ્બરીષસ્તદારભ્ય વિઘ્નેશં શરણં ગતઃ ।
જજાપ મન્ત્રરાજં તં પૂજયિત્વા વિનાયકમ્ ॥ ૨૫॥

વિષ્ણોર્ગણેશસ્ય ચૈવાભેદસ્તેન સમાશ્રિતઃ ।
ગણેશસ્ય ચતુર્ધા સા મૂર્તિઃ સર્વત્ર દૃશ્યતે ॥ ૨૬॥

તતો દુર્વાસસો વિપ્ર મનશ્ચઞ્ચલતાં ગતમ્ ।
દયયા સ્વયમેવાસાવમ્બરીષં જગામ હ ॥ ૨૭॥

સમાગતં મુનીન્દ્રં તં દૃષ્ટ્વા વિસ્મિતમાનસઃ ।
પ્રણમ્યાદાવમ્બરીષોઽપૂજયદ્ ભક્તિસંયુતઃ ॥ ૨૮॥

તતસ્તં નૃપશાર્દૂલં જગાદ મુનિસત્તમઃ ।
દુર્વાસા વિનયેનૈવ યુક્તં પરમહર્ષિતઃ ॥ ૨૯॥

દુર્વાસા ઉવાચ ।
ક્ષમસ્વૈનં મેઽપરાધં સાહસં નૃપસત્તમ ।
અપરાધવિહીનં ત્વામશપં ક્રોધસંયુતઃ ॥ ૩૦॥

ત્વં તુ સાધુસ્વભાવેન સંસ્થિતઃ સ્વગૃહે નૃપ ।
ઉપોષણસમાયુક્તસ્તેન સર્વં જિતં ત્વયા ॥ ૩૧॥

માં ત્યક્ત્વા જલપાનેન પારણં યત્ત્વયા કૃતમ્ ।
સૈવ નિષ્ફલરૂપૈકાદશી તવ ભવિષ્યતિ ॥ ૩૨॥

અન્યાઃ ફલયુતાઃ સર્વાસ્તે ભવન્તુ નૃપોત્તમ ।
એવમુક્ત્વા સ તેનૈવ બુભુજે મુનિસત્તમઃ ॥ ૩૩॥

તમનુગૃહ્ય દુર્વાસા યયૌ સ્વસ્યાશ્રમં શુભમ્ ।
અમ્બરીષસ્તતો દેવં ગણેશમભજત્ સદા ॥ ૩૪॥

તસ્માત્પુત્રાઃ સમુત્પન્નાસ્તત્ર જ્યેષ્ઠં પ્રતાપવાન્ ।
રાજ્યે નૃપોત્તમસ્તં સ સ્થાપયિત્વા વનં યયૌ ॥ ૩૫॥

ભક્ત્યા ગણપતિં તત્રાઽભજચ્ચાનન્યચેતસા ।
કાલેનાંઽતે ગણેશાનં યયૌ યોગેન તત્ત્વતઃ ॥ ૩૬॥

અમ્બરીષસ્ય પઠતિ ચિત્રં યચ્ચ શ‍ૃણોતિ યઃ ।
ચરિત્રં તસ્ય ભક્તિશ્ચ મુક્તિર્ભવતિ શાશ્વતી ॥ ૩૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે અમ્બરીષચરિતં નામ ત્રયોવિંશતિતમોઽધ્યાયઃ ॥ ૩.૨૩

## ૩.૨૪ મુચુકુન્દચરિતં નામ ચતુર્વિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

નરનારાયણાવૂચતુઃ ।
પુરુકુત્સસ્ય દાયાદાવભૂતાં તુ મહાબલૌ ।
અમ્બરીષો મહાભાગો મુચુકુન્દસ્તથાઽપરઃ ॥ ૧॥

અમ્બરીષઃ સ્વરાજ્યં વૈ કૃત્વા ગણપતિં યયૌ ।
તપસ્તપ્ત્વા સુવિપુલં પુત્રે રાજ્યં નિધાય ચ ॥ ૨॥

ચકાર મુચુકુન્દઃ સ રાજર્ષિર્રાજ્યમુત્તમમ્ ।
ધર્મયુક્તો મહાતેજાઃ શક્રતુલ્યપરાક્રમઃ ॥ ૩॥

કદાચિદ્દેવદૈત્યાનાં યુદ્ધં જાતં મહાદ્ભુતમ્ ।
તત્ર દેવા જિતાઃ સર્વે દૈત્યૈઃ પરમદારુણૈઃ ॥ ૪॥

મુચુકુન્દં તતો દેવાઃ શરણં જગ્મુરાદરાત્ ।
તતસ્તેન મહાદૈત્યા હતાઃ શસ્ત્રબલેન વૈ ॥ ૫॥

તત્ર યુદ્ધપ્રસઙ્ગેન કાલો વિપ્ર ગતો બહુઃ ।
યુગાતિક્રમણં તેન પ્રાપ્તં તસ્ય મહાત્મનઃ ॥ ૬॥

યુગભેદં નિરીક્ષ્યાઽસૌ દેવાન્ સર્વાનુવાચ હ ।
જ્ઞાનં દાતવ્યમાદ્યં મે ભવદ્ભિરધુના પરમ્ ॥ ૭॥

તતસ્તે દૈવતાઃ સર્વે જગુઃ પરમભાવિતાઃ ।
અધુના પર્વતદ્રોણ્યાં નિદ્રાયુક્તો ભવ પ્રભો ॥ ૮॥

નૃપ ત્વાં યો નરસ્તત્ર કશ્ચિદુત્થાપયિષ્યતિ ।
સ એવ મરણં સદ્યઃ પ્રાપ્નોતુ ત્વત્સમીપગઃ ॥ ૯॥

તત્ર તે વાસુદેવસ્ય દર્શનં પ્રભવિષ્યતિ ।

સ એવ જ્ઞાનસન્દાતા મહાયોગી નૃપોત્તમ ॥ ૧૦॥

યયાવુવાચૈવ વનં તાન્ તથેતિ મહાબલઃ ।
સ ગન્ધમાદનદ્રોણ્યાં સુષ્વાપ ચ નૃપોત્તમઃ ॥ ૧૧॥

તતો બહુગતે કાલે વસુદેવસુતોઽભવત્ ।
વિષ્ણુઃ સાક્ષાન્ મહાયોગી તપસાઽઽરાધિતો મુને ॥ ૧૨॥

કંસં હત્વા મહાવીરં મથુરાયાં સ્થિતોઽભવત્ ।
કંસસ્ય શ્વશુરોઽત્યન્તં ક્રોધયુક્તો બભૂવ હ ॥ ૧૩॥

જરાસન્ધો યયૌ તત્ર યુદ્ધાર્થં સૈન્યસંયુતઃ ।
રાજભિઃ શાલ્વકાદ્યૈશ્ચ સંવૃતો વીરસત્તમૈઃ ॥ ૧૪॥

ત્રયોવિંશતિરેતસ્યાઽક્ષૌહિણ્યશ્ચ બલં બભૌ ।
તન્મમર્દ મહાતેજાઃ કૃષ્ણઃ સઙ્કર્ષણાન્વિતઃ ॥ ૧૫॥

પલાયત તતો રાજા ગતઃ સ્થાનં પુનર્યયૌ ।
તાવત્ સન્યૈન સંયુક્તો ભવદેવં પરાજિતઃ ॥ ૧૬॥

એવં મહાબલઃ સપ્ત દશ વારં સમાગતઃ ।
જરાસન્ધસ્તતો રાજા ન યશઃ પ્રાપ દુઃખિતઃ ॥ ૧૭॥

તદા તેનાઽપિ વિપ્રેન્દ્ર યવનાધિપતિઃ ખલઃ ।
સહાયાર્થં ધૃતઃ પક્ષે સ કાલયવનાભિધઃ ॥ ૧૮॥

સ વૈ યવનરાજશ્ચ યાદવાનાં વિનાશકૃત્ ।
ગર્ગશાપાત્ સમુદ્ભૂત આયયૌ મથુરાં મુને ॥ ૧૯॥

તમાગતં પરિજ્ઞાય માયયા નિર્મમે સ્વયમ્ ।
દ્વારકાં જલધૌ કૃષ્ણસ્તત્ર ચિક્ષેપ યાદવાન્ ॥ ૨૦॥

તતો યવનરાજસ્ય સમીપે સ સમાગતઃ ।
દર્શયિત્વા તથાઽઽત્માનં વાસુદેવઃ પલાયત ॥ ૨૧॥

નારદેન ચ કૃષ્ણસ્ય ચિહ્નાનિ કથિતાનિ વૈ ।
યવનેન્દ્રાય તૈઃ કૃષ્ણં જ્ઞાત્વા સન્ધાવિતોઽભવત્ ॥ ૨૨॥

અભર્ત્સયન્ મહાત્માનં કૃષ્ણકાલસમઃ સ્વયમ્ ।
યવનઃ કિં યદોર્વંશે લાઞ્છનપ્રદ ધાવસિ ॥ ૨૩॥

તતઃ કૃષ્ણો ગતસ્તત્ર યત્ર સુષ્વાપ વૈ નૃપઃ ।
મુચુકુન્દઃ સ તં ત્યક્ત્વા ગુહાન્તરગતોઽભવત્ ॥ ૨૪॥

યવનેન્દ્રેણ સુપ્તોઽસૌ દૃષ્ટસ્તં સ્વપદાઽહનત્ ।
કિં સુપ્તોઽસિ ચ નિર્લજ્જ કુરુ યુદ્ધં મયા સહ ॥ ૨૫॥

બોધિતો યવનેનૈવં મુચુકુન્દઃ પ્રતાપવાન્ ।
તસ્ય નેત્રોદ્ભવો વહ્નિર્યવનં સ દદાહ ચ ॥ ૨૬॥

(Page ખં. ૩ અ. ૨૫ પાન ૪૯)
એવં તં કાલયવનં હતં દૃષ્ટ્વા જનાર્દનઃ ।
આયયૌ નૃપનાથં તં હર્ષનિર્ભરમાનસઃ ॥ ૨૭॥

તમાગતં સમાદૃષ્ટ્વા મુચુકુન્દો નનામ ચ ।
ઉવાચ ભક્તિસંયુક્તઃ કૃષ્ણં યોગીશ્વરં મુને ॥ ૨૮॥

મુચુકુન્દ ઉવાચ ।
દેવૈઃ સઙ્કથિતં કૃષ્ણ મમૈતદભવત્ પ્રભો ।
અધુના જ્ઞાનમાર્ગં વૈ કથયસ્વ કૃપાનિધે ॥ ૨૯॥

મુચુકુન્દસ્ય વાક્યં સ શ્રુત્વા હર્ષસમન્વિતઃ ।
જગાદ તં મહાભાગં કૃષ્ણઃ પરમયોગવિત્ ॥ ૩૦॥

શ્રીકૃષ્ણ ઉવાચ ।
અહં ગણેશ્વરઃ પૂર્ણો ન ભિન્નશ્ચ મહામતે ।
એતદેવ પરં જ્ઞાનં સંજ્ઞાતવ્યં ત્વયા નૃપ ॥ ૩૧॥

ત્યક્ત્વા પઞ્ચવિધં ચિત્તં તદૈશ્વર્યં ચ મોહદમ્ ।
યોગેન બ્રહ્મણિ પ્રોક્તં ગણેશસ્ત્વં ભવિષ્યસિ ॥ ૩૨॥

ચિત્તરૂપા મહાબુદ્ધિર્મોહરૂપા ચ ભૂમિપ ।
સિદ્ધિર્ગણપતેર્માયે તત્ર બિમ્બં સ્થિતં ચ યત્ ॥ ૩૩॥

તદેવ ગણનાથોઽયં પશ્ય તં યોગસેવયા ।
ચિત્તે ચિન્તામણિં ભૂપ ત્યક્ત્વા બિમ્બભવં ભ્રમમ્ ॥ ૩૪॥

ગકારાત્મકરૂપાં વૈ સિદ્ધિં જાનીહિ માનદ ।
ણકારરૂપિકાં બુદ્ધિં તયોઃ સ્વામી ગણેશ્વરઃ ॥ ૩૫॥

તં ભજસ્વ મહાભાગ તેન શાન્તિમવાપ્સ્યસિ ।

જ્ઞાનં ગુહ્યતમં પ્રોક્તં મયા તે નૃપસત્તમ ॥ ૩૬॥

એવમુક્ત્વા મહાયોગી કૃષ્ણસ્તેન પ્રપૂજિતઃ ।
આગત્ય મથુરાયાં સ જઘાન યવનાન્ પ્રભુઃ ॥ ૩૭॥

જરાસન્ધં સમાગત્ય ધાવિતો રામસંયુતઃ ।
વઞ્ચયિત્વા યયૌ તં સ દ્વારકાયાં મહામુને ॥ ૩૮॥

મુચુકુન્દશ્ચ રાજર્ષિઃ સાધયામાસ યત્નતઃ ।
કૃષ્ણેન કથિતં યોગં તેન શાન્તિં જગામ હ ॥ ૩૯॥

તતો ભ્રમન્ સ રાજેન્દ્રઃ પૃથિવ્યાં યત્ર તત્ર ચ ।
ગણેશમભજત્ ભક્ત્યા તં પ્રાણાન્તં મહાયશાઃ ॥ ૪૦॥

મુચુકુન્દસ્ય યો મર્ત્યશ્ચરિતં શ‍ૃણુયાત્ પરમ્ ।
પઠેત્તસ્મૈ તુ સર્વં સ પ્રદદ્યાદ્ગણપઃ પ્રભુઃ ॥ ૪૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે મુચુકુન્દચરિતં નામ ચતુર્વિંશતિતમોઽધ્યાયઃ ॥ ૩.૨૪

## ૩.૨૫ સગરભગીરથચરિતં નામ પઞ્ચવિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

નરનારાયણાવૂચતુઃ ।
અમ્બરીષસ્ય પુત્રોઽભૂદ્યૌવનાશ્વો પરઃ સ્મૃતઃ ।
હરિતો યૌવનાશ્વસ્ય હારિતસ્તુ સુતોઽભવત્ ॥ ૧॥

પુરુકુત્સસ્ય પુત્રોઽભૂત્ત્રસદ્દસ્યુસ્તતોઽભવત્ ।
અનરણ્યસ્તસ્ય પુત્રો હર્યશ્વઃ સાધુસમ્મતઃ ॥ ૨॥

અરુણસ્તત્સુતઃ સૂર્યવરાત્ પ્રોક્તઃ સમુદ્ભવઃ ।
તસ્ય પુત્રોઽભવત્ સત્યવ્રતો વિદ્વાન્ મહાશયાઃ ॥ ૩॥

સ એવાઽભૂત્રિશઙ્ક્વાખ્યો દેહભૃત્ સ્વર્ગલોકગઃ ।
તસ્ય પુત્રો હરિશ્ચન્દ્રઃ સર્વધર્મપરાયણઃ ॥ ૪॥

વિશ્વામિત્રાચ્ચ વિઘ્નેશં જ્ઞાત્વા ગાણેશકોઽભવત્ ।
સ્વાનન્દે ગણનાથં સોઽન્તે જગામ મહાયશાઃ ॥ ૫॥

રોહિતસ્તસ્ય પુત્રોઽભૂદ્ધરિતો વૈ તતોઽભવત્ ।

ચમ્પસ્તસ્માત્ સુદેવોઽતો વિજયો ભરુકસ્તતઃ ॥ ૬॥

તતો વૃકસ્તતો બાહુઃ સગરસ્તસ્ય ચાત્મજઃ ।
સગરસ્યાઽપિ ભાર્યે દ્વે પ્રભા ભાનુમતી તથા ॥ ૭॥

તાભ્યામારાધિતો યોગી ભૃગુઃ પરમપાવનઃ ।
(Page ખં. ૩ અ. ૨૫ પાન ૫૦)
પુત્રાર્થં સ દદૌ તાભ્યાં વરં પુત્રપ્રદં પરમ્ ॥ ૮॥

ષષ્ટિસાહસ્રપુત્રા વૈ વૃતાશ્ચ પ્રભયા તતઃ ।
એકં વંશધરં ભાનુમતી વવ્રે મહામુને ॥ ૯॥

ભૃગોઃ પ્રસાદયોગેન ભાનુમત્યાં સમુદ્ભવઃ ।
અસમઞ્જસનામા વૈ પુત્રો વંશધરો મુને ॥ ૧૦॥

સ તુ યોગયુતઃ સર્વાન્ શિશૂન્ ધૃત્વા મહાયશાઃ ।
ચિક્ષેપ શરયૂમધ્યે બાલો બાલવિનાશકૃત્ ॥ ૧૧॥

વનં યયૌ તતઃ પિત્રા સ સન્ત્યક્તો મહામુને ।
જીવયિત્વા શિશૂન્ સર્વાન્ યોગી માયાબલેન વૈ ॥ ૧૨॥

તસ્ય પુત્રઃ સમુત્પન્નોંઽશુમાન્ ધર્મપરાયણઃ ।
પ્રભાયાં ષષ્ટિસાહસ્રં પુત્રાણાં પ્રબભૂવ હ ॥ ૧૩॥

સગરેણ તતો યજ્ઞા અશ્વમેધાઃ કૃતા બલાત્ ।
શતસઙ્ખ્યાઃ પ્રમાણેન તત્રેન્દ્રઃ ક્ષુભિતોઽભવત્ ॥ ૧૪॥

અન્ત્યે યજ્ઞે સમારબ્ધે માયયા ચ સુરાધિપઃ ।
અશ્વં સઙ્ગૃહ્ય પાતાલે સ્થાપયામાસ સન્નિધૌ ॥ ૧૫॥

કપિલસ્ય તતસ્તત્ર પુત્રાશ્ચ સગરસ્ય યે ।
કુપિતાસ્તે સહસ્રાણાં ષષ્ટિઃ પરમદુર્જયાઃ ॥ ૧૬॥

અશ્વપાદં પ્રપશ્યદ્ભિર્ભૂમિમધ્યે વિચક્ષણૈઃ ।
તતસ્તૈઃ ખનિતા ભૂમિઃ સર્વત્ર બલસંયુતૈઃ ॥ ૧૭॥

તૈઽસ્તુ સંવર્ધિતો વિપ્ર સમુદ્રો લવણાત્મકઃ ।
તેન સાગરનામાઽભૂત્તદારભ્ય સ્વકર્મણા ॥ ૧૮॥

તમશ્વરાજં દદૃશુશ્ચરન્તં કપિલાન્તિકે ।
તં ચૌરં સાગરા જ્ઞાત્વા હન્તું શસ્ત્રાણિ સન્દધુઃ ॥ ૧૯॥

કપિલક્રોધવહ્નૌ તે ભસ્મીભૂતા બભૂવિરે ।
સગરા હર્ષિતસ્તેન સ પ્રતાપી પુરન્દરઃ ॥ ૨૦॥

નારદાત્ સગરો જ્ઞાત્વાંઽશુમન્તં પૌત્રકં તતઃ ।
પ્રેષયામાસ તં વિપ્રં નનામ સ મહાદ્યુતિઃ ॥ ૨૧॥

સ્તુતઃ સમ્પૂજિતસ્તેન કપિલઃ પ્રદદૌ હયમ્ ।
સઙ્ગૃહ્ય સ યયૌ વિપ્ર સગરં સ્વપિતામહમ્ ॥ ૨૨॥

તતશ્ચકાર તં યજ્ઞં સમ્પૂર્ણં ત્વશ્વમેધકમ્ ।
યયૌ રાજ્યેઽભિષિચ્યાઽસૌ વનં પૌત્રં મહાયશાઃ ॥ ૨૩॥

ગુરોઃ પ્રાપ્ય મહામન્ત્રં ગાણેશં યોગશાન્તિદમ્ ।
સાધયિત્વા સ વૈ યોગી બભૂવ પરમદ્યુતિઃ ॥ ૨૪॥

અનન્યમનસા દેવં ગણેશમભજન્નૃપઃ ।
અન્તે સ ગણપં વિપ્ર યયૌ બ્રહ્મપરાયણઃ ॥ ૨૫॥

અંશુમાન્ કપિલાચ્ચૈવ જ્ઞાનં પ્રાપ્ય મહાયશાઃ ।
ગણેશમભજન્નિત્યં ગાણપત્યસ્વભાવતઃ ॥ ૨૬॥

તસ્ય પુત્રો દિલીપશ્ચ દિલીપાત્તુ ભગીરથઃ ।
દિલીપોઽન્યસ્ય રાજ્યે તં યયૌ વિઘ્નેશમુત્તમમ્ ॥ ૨૭॥

તતો ભગીરથો રાજા દિલીપસ્થાપિતઃ સ વૈ ।
પાલયામાસ સમ્પૂર્ણં રાજ્યં સદ્ધર્મભાવતઃ ॥ ૨૮॥

એકદા નારદસ્તત્ર જગામ નૃપતિં મુને ।
પૂજિતસ્તેન હોવાચ નૃપં વચનમુત્તમમ્ ॥ ૨૯॥

નારદ ઉવાચ ।
ભગીરથ મહાભાગ શ‍ૃણુ મે વચનં હિતમ્ ।
તવ બ્રાહ્મણસઙ્ક્રોધાદ્ગ્ધાશ્ચ પ્રપિતામહાઃ ॥ ૩૦॥

વિપ્રક્રોધેન દગ્ધા યે ગતિસ્તેષાં ન વિદ્યતે ।
અતસ્ત્વં ચ મહારાજ કુરુ તેષાં હિતં પરમ્ ॥ ૩૧॥

સ્વર્ણદીં ત્વં સમાનીય પ્લાવયસ્વ ચ તાન્ જલૈઃ ।
સ્વર્ગવાસિન એવં તે પ્રભવિષ્યન્તિ પૂર્વજાઃ ॥ ૩૨॥

એવમુક્ત્વા મહાયોગી નારદો ગણપં સ્મરન્ ।
(Page  ખં. ૩ અ. ૨૫ પાન ૫૧)
યયૌ સ્વર્ગં તતો વિપ્ર રાજા સન્દુઃખિતોઽભવત્ ॥ ૩૩॥

પ્રધાનેષુ સ્વકીયં તદ્રાજ્યં ત્યક્ત્વા વનં યયૌ ।
તપસાઽઽરાધયામાસ સ્વર્ણદીં ચ ભગીરથઃ ॥ ૩૪॥

પૂર્ણે વર્ષશતે ચૈવ તં યયૌ સ્વર્ગવાહિની ।
વરેણ ચ્છન્દયામાસ રાજાનં ભક્તિસંયુતમ્ ॥ ૩૫॥

પૂજયામાસ તાં દેવીં સ્તુત્વા ચ વિવિધૈઃ સ્તવૈઃ ।
પ્રતાપવાન્ જગાદાઽસૌ ભૂમિપઃ સ ભગીરથઃ ॥ ૩૬॥

ભગીરથ ઉવાચ ।
યદિ તુષ્ટા મહાભાગે તદા મે પ્રપિતામહાન્ ।
પ્લાવયસ્વ મહીસંસ્થા સા તથેતિ તમબ્રવીત્ ॥ ૩૭॥

મદીયમુગ્રવેગં સન્ધારણાર્થં મહામતે ।
પાત્રં પશ્ય મહાભાગાઽઽગમિષ્યામિ મહીતલમ્ ॥ ૩૮॥

તથેતિ સ મહીપાલઃ પૂજયામાસ શઙ્કરમ્ ।
વર્ષેણૈકેન તં શમ્ભુઃ પ્રસન્નો વરદોઽભવત્ ॥ ૩૯॥

સ્વર્ણદીં ધારયસ્વ ત્વં યદિ તુષ્ટોઽસિ શઙ્કર ।
તથેતિ શિવ ઊચે તં સસ્માર સ મહાનદીમ્ ॥ ૪૦॥

આગતાં તાં તદા પ્રાહ પત દેવિ મહીતલે ।
ધારયિષ્યતિ તે વેગં શઙ્કરઃ કરુણાનિધિઃ ॥ ૪૧॥

સ્વર્ગઙ્ગા ગર્વયુક્તા ચ તથેતિ શિવમસ્તકે ।
પપાત સૈવ ધારાભિઃ સહસ્રેણ સમન્તતઃ ॥ ૪૨॥

શિવમસ્તકમાપ્લાવ્ય ગમિષ્યામિ રસાતલમ્ ।
ઇતિ સન્ધાર્ય મનસિ મહાવેગયુતા યયૌ ॥ ૪૩॥

તસ્યા ગર્વં પરિજ્ઞાય શઙ્કરેણ સ્વમાયયા ।
જટાયાં ગોપિતા દેવી તત્ર બભ્રામ વૈ નદી ॥ ૪૪॥

નાન્તં જગામ શમ્ભોઃ સા જટાયાસ્તં નમામ વૈ ।
તતઃ શિવેન રાજાર્થે મોચિતા ધરણીં યયૌ ॥ ૪૫॥

તત્ર જન્હું મહીપાલં દદર્શ સ્વર્ગવાહિની ।
તં તપન્તં તપો ઘોરં જગાદ ચલ તાપસ ॥ ૪૬॥

નોચેત્ત્વાં પ્લાવયિષ્યામિ સ જગાદ ન તાં યદા ।
તદા સા ક્રોધસંયુક્તા પ્લાવિતું તં સમાયયૌ ॥ ૪૭॥

તામાગતાં સમાજ્ઞાય ક્રોધયુક્તો મહીપતિઃ ।
તપોબલેન તાં પીત્વા સન્તસ્થૌ તપસિ પ્રભુઃ ॥ ૪૮॥

તતો ભગીરથસ્તં પ્રણનામાઽથ મહાયશાઃ ।
પ્રાર્થિતઃ સ મુમોચાઽપિ સ્વોરું ભિત્વા તતો નદીમ્ ॥ ૪૯॥

તસ્ય પુત્રીત્વમાપન્ના જાહ્નવી તેન કથ્યતે ।
પુનઃ સા વેગસંયુક્તા પ્લાવયામાસ સાગરાન્ ॥ ૫૦॥

વિમાનવરમારૂઢાસ્તે ભગીરથસન્નિધૌ ।
તે ગતાઃ સ્વર્ગલોકે ચ જલસ્પર્શેન તત્ક્ષણાત્ ॥ ૫૧॥

રાજ્ઞા ભગીરથેનૈવં પૂજિતા સ્વર્ગવાહિની ।
પુત્રીભાવેન સઙ્ક્લૃપ્તાઽભવત્ ભાગીરથી તતઃ ॥ ૫૨॥

એવં ભગીરથોઽસૌ પ્રભાવયુક્તઃ પ્રતાપવાન્ ।
ભગીરથસુતોઽપ્યાસીચ્છ્રુતો નામ મહીપતિઃ ॥ ૫૩॥

સંસ્થાપ્ય સ્વપદે રાજ્યે સ યયૌ વનમુત્તમમ્ ।
વસિષ્ઠાત્ સ વિદિત્વા ચ યોગં ગાણેશકં મુને ॥ ૫૪॥

સાધયિત્વા સ વૈ રાજા ગાણપત્યો બભૂવ હ ।
અન્તે જગામ ગાણેશસાયુજ્યં યોગસેવયા ॥ ૫૫॥

ઇદં ભગીરથાઽઽખ્યાનં યઃ શ્ૃણોતિ નરોત્તમઃ ।
પઠેદ્વા તસ્ય ભો વિપ્ર ભુક્તિમુક્તિપ્રદં ભવેત્ ॥ ૫૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે સગરભગીરથચરિતં નામ પઞ્ચવિંશતિતમોઽધ્યાયઃ ॥ ૩.૨૫

## ૩.૨૬ રામચન્દ્રચરિતં નામ ષડ્વિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

નરાનરાયણાવૂચતુઃ ।

શ્રુતસ્ય ચૈવ નાભાખ્યઃ પુત્રસ્તસ્ય બભૂવ હ ।
સિન્ધુદ્વીપસ્તતો જજ્ઞે જ્ઞાની પુત્રો મહાયશાઃ ॥ ૧॥

અયુતાયુઃ સુતસ્તસ્ય તતો ય ઋતુપર્ણકઃ ।
સ વૈ નલસખસ્તસ્માદશ્વવિદ્યાપરાયણઃ ॥ ૨॥

સર્વકામસ્તતો જજ્ઞે તસ્માજ્જાતઃ સુદાસકઃ ।
સૌદાસસ્તસ્ય પુત્રોઽભૂત્ ખ્યાતઃ કલ્માષપાદકઃ ॥ ૩॥

કલ્માષપાદક્ષેત્રે વૈ વસિષ્ઠો મુનિસત્તમઃ ।
અશ્મકં જનયામાસ ચેક્ષ્વાકુકુલવર્ધકમ્ ॥ ૪॥

અશ્મકસ્ય ચ પુત્રોઽભૂન્મૂલકો નામ પાર્થિવઃ ।
સ હિ રામભયાદ્રાજા વનં પ્રાપ્ય સુદુઃખિતઃ ॥ ૫॥

તત્ર નારીસ્વરૂપઃ સન્નારીભિઃ પરિરક્ષિતઃ ।
નારીકવચનામાઽભૂત્ કર્મણા તેન ભો મુને ॥ ૬॥

તસ્માચ્છતરથશ્ચૈલવિલો જજ્ઞે ચ તત્સુતઃ ।
તતો વિશ્વસહસ્તસ્માત્ ખટ્વાઙ્ગો ઢુણ્ઢિમાપ્તવાન્ ॥ ૭॥

દીર્ઘબાહુસ્તતસ્તસ્માદ્રઘુસ્તસ્માદજોઽભવત્ ।
પુત્રો દશરથસ્તસ્ય કશ્યપાંશઃ સ વૈ સ્મૃતઃ ॥ ૮॥

તસ્ય ભાર્યાત્રયં ચાસીદ્રૂપેણાપ્રતિમં મુને ।
કૌસલ્યા ચૈવ કૈકેયી સુમિત્રા ધર્મસંયુતા ॥ ૯॥

યૌવને પ્રગતે પ્રાપ ન રાજા પુત્રમુત્તમમ્ ।
નાનાયત્નં ચકારાઽસૌ વ્રતતીર્થાદિકં મુને ॥ ૧૦॥

તતો વસિષ્ઠં વિપ્રેશં સસ્ત્રીકઃ શરણં યયૌ ।
પ્રધાનેષુ વિનિક્ષિપ્ય રાજ્યં નિહતકણ્ટકમ્ ॥ ૧૧॥

વસિષ્ઠેન ગણેશસ્ય મન્ત્રો દત્તો દશાક્ષરઃ ।
તસ્મૈ રાજ્ઞે તથા ચૈવોવાચ પત્નીસમન્વિતમ્ ॥ ૧૨॥

સૂર્યસ્ય કુલદેવત્વં સમ્પ્રાપ્તઃ સ ગજાનનઃ ।
તસ્ય વંશે ત્વમુત્પન્નઃ કથં વિસ્મૃતવાંશ્ચ તમ્ ॥ ૧૩॥

તસ્ય વિસ્મૃતિમાત્રેણ ન સિદ્ધિં પુરુષો લભેત્ ।
પરત્રેહ ચ વિઘ્નેન પીડિતોઽતિમહાદ્ભુતમ્ ॥ ૧૪॥

અતસ્ત્વમપિ રાજેન્દ્ર ગણપં ભજ ભાવતઃ ।
ન ત્યાજ્યોઽયં મન્ત્રરાજસ્ત્યાગે હાનિર્ભવિષ્યતિ ॥ ૧૫॥

તથેતિ તં વસિષ્ઠં સ ઉક્ત્વા નત્વા યયૌ વનમ્ ।
તતાપ વૈ દશરથસ્તપ ઉગ્રં મહાયશાઃ ॥ ૧૬॥

વાયુમાત્રાશનો ભૂત્વાઽપૂજયદ્ ગણનાયકમ્ ।
પત્ન્યા સહ વિનીતાત્માઽજપત્તં મન્ત્રમુત્તમમ્ ॥ ૧૭॥

તતો વર્ષશતે પૂર્ણે પ્રસન્નોઽભૂદ્ગજાનનઃ ।
આયયૌ તં વરાન્ દાતું મૂષકારૂઢ એવ સઃ ॥ ૧૮॥

તં દૃષ્ટ્વોત્થાય સસ્ત્રીકો નનામ સહસા પ્રભુમ્ ।
પૂજયામાસ તં દેવં સ્તુત્વા સ્તોત્રૈર્નનામ ચ ॥ ૧૯॥

તતસ્તં ગણરાજો વૈ જગાદ સ નૃપોત્તમમ્ ।
વરં બ્રૂહિ મહાબાહો દાસ્યે તે મનસેપ્સિતમ્ ॥ ૨૦॥

તતસ્તદ્વચનં શ્રુત્વોવાચ સંવિનયાન્વિતઃ ।
પ્રસન્નાત્મા દશરથો ગણેશં સર્વસિદ્ધિદમ્ ॥ ૨૧॥

દશરથ ઉવાચ ।
યદિ પ્રસન્નો દેવેશ તદા દેહિ ગજાનન ।
ભક્તિં તે ચરણે નાથ યયાઽજ્ઞાનં ન વિદ્યતે ॥ ૨૨॥

અન્યદ્દેહિ ગણાધીશ પુત્રં પૃથુલકીર્તિદમ્ ।
બલેનાપ્રતિમં ચૈવ તવ ભક્તિપરાયણમ્ ॥ ૨૩॥

મયા યત્ર તપસ્તપ્તં તત્ર ત્વં સુસ્થિરો ભવ ।
પૂરયન્ ભક્તિભાવેન જનાનાં મનસીપ્સિતમ્ ॥ ૨૪॥

તથેતિ વૈ દશરથં જગાદ ગણનાયકઃ ।
અન્તર્ધાય સ્વમાત્માનં યયૌ સ્વાનન્દમાદરાત્ ॥ ૨૫॥

તતો વસિષ્ઠહસ્તેન સ્થાપિતા મૂર્તિરાદરાત્ ।
(Page ખં. ૩ અ. ૨૬ પાન ૫૩)
ગણેશસ્ય ચ તત્રાઽઽસીત્ ક્ષેત્રં સકલસિદ્ધિદમ્ ॥ ૨૬॥

પૂજયિત્વા દશરથઃ સસ્ત્રીકશ્ચ સ વિપ્ર તમ્ ।

આયયૌ નગરેઽયોધ્યાયાં સર્વાન્ સમ્પ્રહર્ષયન્ ॥ ૨૭॥

તતો રાવણનાશાર્થં વિષ્ણુમાજ્ઞાપયત્ પ્રભુઃ ।
ગણેશઃ સ તુ પુત્રોઽભૂન્ મુને દશરથસ્ય ભોઃ ॥ ૨૮॥

ચતુર્ધાત્માનમાભજ્ય વિબભૌ હરિરવ્યયઃ ।
કૌસલ્યાયાં સમુત્પન્નો રામઃ શસ્ત્રભૃતાં વરઃ ॥ ૨૯॥

કૈકેય્યાં ભરતો જજ્ઞે સુમિત્રાયાં ચ લક્ષ્મણઃ ।
શત્રુઘ્નશ્ચૈવ વિપ્રેન્દ્ર સર્વે વિષ્ણુસમા બભુઃ ॥ ૩૦॥

તતો દશરથો રાજા કામભોગપરાયણઃ ।
સઞ્જાતસ્તં ન સસ્માર વિસ્મૃત્યા ગણનાયકમ્ ॥ ૩૧॥

તતો રામસ્ય મૌઞ્જ્યાદિ કર્મ તેન કૃતં મુને ।
વિશ્વામિત્રેણ યજ્ઞસ્ય રક્ષાર્થં યાચિતોઽભવત્ ॥ ૩૨॥

સ લક્ષ્મણેન રામેણ યજ્ઞસ્તસ્ય પ્રપાલિતઃ ।
હતઃ સુબાહકો નામ રાક્ષસો દારુણો મુને ॥ ૩૩॥

પ્રસન્નોઽભૂન્ મહાયોગી વિશ્વામિત્રઃ પ્રતાપવાન્ ।
અસ્ત્રવિદ્યાં દદૌ તસ્મૈ રામાય સકલાં મુને ॥ ૩૪॥

તતો જનકયજ્ઞં વૈ જગામ મુનિકૌશિકઃ ।
રામલક્ષ્મણસંયુક્તઃ પૂજિતો જનકેન સઃ ॥ ૩૫॥

માહેશ્વરં ધનુસ્તત્ર સજ્યં રામેણ વૈ કૃતમ્ ।
આકર્ષણેન મહતા ભગ્નં મધ્યે મહામુને ॥ ૩૬॥

તતો જનકભૂપેન દત્તા સીતા મહાત્મને ।
રામાય પ્રીતિયુક્તેન લક્ષ્મણાય તથોર્મિલા ॥ ૩૭॥

ભ્રાતૃકન્યે તતો રાજ્ઞા દત્તે તત્ર મહામુને ।
ભરતાય તથા શત્રુઘ્નાય ભાવેન માનદ ॥ ૩૮॥

તતો દશરથો રાજા કૈકેય્યા પ્રાર્થિતો ભૃશમ્ ।
રામસ્ય વનવાસાર્થં રાજ્યાર્થં ભરતસ્ય ચ ॥ ૩૯॥

વરદાનપ્રભાવેન તથેતિ સ ચકાર હ ।
વર્ષાણિ વનવાસં સ ચતુર્દશ ચ રાઘવઃ ॥ ૪૦॥

સલક્ષ્મણશ્ચ સસ્ત્રીકશ્ચકાર પિતૃગૌરવાત્ ।
સ તત્ર નાસિકે રામો વાસં ચક્રે પ્રહર્ષિતઃ ॥ ૪૧॥

તત્રાતિથિસ્વરૂપેણ રાવણશ્ચ સમાયયૌ ।
એકાકિનીં ચ સીતાં સઙ્ગૃહ્ય લઙ્કાં યયૌ ખલઃ ॥ ૪૨॥

સલક્ષ્મણસ્તતો રામો ન દદર્શ વિદેહજામ્ ।
પપાત મૂર્ચ્છિતો ભૂત્વા વિલલાપ ભૃશાતુરઃ ॥ ૪૩॥

તતો જગામ રામશ્ચ સીતામન્વેષયન્ વને ।
કર્ણાટે તત્ર શૈવં સ ક્ષત્રં મુખ્યં દદર્શ હ ॥ ૪૪॥

તત્ર શમ્ભું સ રામો વૈ લક્ષ્મણેન સમન્વિતઃ ।
આરાધયન્ મહાભક્ત્યા માસં વૈ શૈવરૂપધૃક્ ॥ ૪૫॥

સન્તુષ્ટસ્તત્ર રામાય વરં પ્રાદાત્ સદાશિવઃ ।
સીતાપ્રાપ્તિસ્વરૂપં તમુપદેશં ચકાર સઃ ॥ ૪૬॥

શિવ ઉવાચ ।
શ ૃણુ રામ મહાભાગ ત્વં વૈ વિષ્ણુઃ સનાતનઃ ।
ભૃગોઃ શાપેન જાતોઽસિ માનુષે દેહધારકઃ ॥ ૪૭॥

સીતાવિયોગજં દુઃખં વનવાસં તથાઽઽશ્રિતઃ ।
અતસ્ત્વં ગણરાજં વૈ ભજ ત્વં ભક્તિસંયુતઃ ॥ ૪૮॥

તેન જ્ઞાનં ચ તે રામ ભવિષ્યતિ પુરાતનમ્ ।
સીતાપ્રાપ્તિર્મહાબાહો ભવિતા નાત્ર સંશયઃ ॥ ૪૯॥

શિવસ્ય વચનં શ્રુત્વા તં પપ્રચ્છ મહાયશાઃ ।
રામઃ પરમશોકાર્તો વિનયેન સમન્વિતઃ ॥ ૫૦॥

રામ ઉવાચ ।
વદ શમ્ભો મહેશાન ગણેશસ્ય સ્વરૂપકમ્ ।
કીદૃશોઽયં વિશેષેણ સર્વાધીશશ્ચ કથ્યતે ॥ ૫૧॥

રામસ્ય વચનં શ્રુત્વા શઙ્કરસ્તમુવાચ હ ।
યોગં ગાણેશકં પૂર્ણં બોધયન્ મુનિસત્તમ ॥ ૫૨॥

શિવ ઉવાચ ।
શ ૃણુ રામ ગણેશસ્ય જ્ઞાનં તે કથયામ્યહમ્ ।

તેન ત્વં સર્વભાવજ્ઞઃ શાન્તિં પ્રલભસે પ્રભો ॥ ૫૩॥

પઞ્ચધા હૃદિ સંસ્થા યા બુદ્ધિઃ સૈવ ન સંશયઃ ।
ચિત્તરૂપા મહાભાગા પ્રકૃતિસ્તસ્ય ભો વિભો ॥ ૫૪॥

નાનાભ્રમકરી માયા સિદ્ધિઃ સર્વત્ર દૃશ્યતે ।
ભ્રમન્તિ સર્વલોકા વૈ સિદ્ધ્યર્થં મોહિતાસ્તયા ॥ ૫૫॥

સા તસ્ય પ્રકૃતિઃ પ્રોક્તા વામભાગે પ્રસંસ્થિતા ।
બભૂવ દક્ષિણાઙ્ગે વૈ બુદ્ધિર્માયેતિ કથ્યતે ॥ ૫૬॥

તયોઃ સ્વામી ગણેશઃ સ યોગશાન્તિમયો મતઃ ।
તં જ્ઞાત્વા ચ વયં રામ શાન્તિં પ્રાપ્તા ભજામહે ॥ ૫૭॥

બુદ્ધ્યા યદ્ બુધ્યતે રામ તદેવં તસ્ય રૂપકમ્ ।
યોગાદિસાધને નૈવ લભ્યતે તચ્ચ સિદ્ધિજમ્ ॥ ૫૮॥

માયે ચ દ્વિવિધે ત્યક્ત્વા ભજસ્વ ગણનાયકમ્ ।
તેન ત્વં યોગમાર્ગજ્ઞો ગણેશશ્ચ ભવિષ્યસિ ॥ ૫૯॥

વિઘ્નરાજઃ સ વેદેષુ પ્રોક્તો વૈ વેદવાદિભિઃ ।
તમનાદૃત્ય વિઘ્નેશં વિઘ્નહીનઃ કથં ભવેત્ ॥ ૬૦॥

વિઘ્નાધીનં મહાભાગ સકલં વેદવર્ણિતમ્ ।
અતો વિઘ્નેન સંયુક્તં હીનં પ્રભવતિ પ્રભો ॥ ૬૧॥

વિઘ્નાઃ સત્તાત્મકાઃ પ્રોક્તાસ્તેષાં સ્વામી ગણેશ્વરઃ ।
તં ભજસ્વ વિધાનેન વિઘ્નહીનો ભવિષ્યસિ ॥ ૬૨॥

હેરમ્બં ભજ ભાવેન ભક્તિમાર્ગં વદામિ તે ।
તેન ત્વં લભસે દેવં ગણેશં નાત્ર સંશયઃ ॥ ૬૩॥

સ્વકીયસત્તયા હીનો ભવેદ્વૈ યદિ માનવઃ ।
હીનસ્તદા સમાખ્યાતઃ પરાધીનસ્વભાવતઃ ॥ ૬૪॥

દીનાનાં રક્ષકા યે વૈ ઈશ્વરાઃ પરમેશ્વરાઃ ।
તે દીનપાલકાઃ પ્રોક્તા વિચારય મહામતે ॥ ૬૫॥

દીનાર્થવાચકો રામ હેર્વેદેષુ વિનિશ્ચિતમ્ ।
નાથો રમ્બસ્તયોર્યોગે હેરમ્બશ્ચ પ્રકથ્યતે ॥ ૬૬॥

દીનાઃ સત્તાવિહીનાશ્ચ સત્તાયુક્તાશ્ચ પાલકાઃ ।
તેષાં સ્વામી સ હેરમ્બસ્તં ભજસ્વ વિધાનતઃ ॥ ૬૭॥

અભિમાનં ચ દ્વિવિધં ત્યજ ત્વં રાઘવ પ્રભો ।
દીનાત્મકં તથા પૂર્ણપાલનાત્મકમુત્તમમ્ ॥ ૬૮॥

દીના યેન કૃતા જીવાઃ પાલકાઃ પરમેશ્વરાઃ ।
તદધીનં જગદ્બ્રહ્મ મત્વા તં શરણં બ્રજ ॥ ૬૯॥

એવમુક્ત્વા મહાદેવો રાઘવં ચ સલક્ષ્મણમ્ ।
અન્તર્ધાનં જગામાઽપિ રાઘવસ્તત્ર સંસ્થિતઃ ॥ ૭૦॥

વિદ્યાધીશપુરે રામસ્તતાપ તપ ઉત્તમમ્ ।
શિવોપદિષ્ટમન્ત્રેણ તોષયામાસ વિઘ્નપમ્ ॥ ૭૧॥

હેરમ્બં તં સદા રામો લક્ષ્મણશ્ચ વિશેષતઃ ।
પુપૂજ ભક્તિસંયુક્તો નિરાહારસમન્વિતઃ ॥ ૭૨॥

ધ્યાનેન તસ્ય દેવસ્ય સ્વલ્પકાલેન ચ પ્રભુઃ ।
રામઃ શાન્તિયુતો વિપ્ર સમભૂદ્ યોગસેવયા ॥ ૭૩॥

નિશ્ચયં તસ્ય રામસ્ય દૃષ્ટ્વા ભક્તં તમાયયૌ ।
ષણ્માસૈશ્ચ વરં દાતું ગણેશઃ કરુણાનિધિઃ ॥ ૭૪॥

સલક્ષ્મણં ચ રામં સ બોધયામાસ વિઘ્નપઃ ।
તતો ધ્યાનં પરિત્યજ્ય ગણપં નેમતુઃ પરમ્ ॥ ૭૫॥

તતસ્તં પૂજયામાસ રામો દેવવરો મુને ।
તુષ્ટાવ સ ગણાધીશં ભક્તિનમ્રાત્મકન્ધરઃ ॥ ૭૬॥

(Page ખં. ૩ અ. ૨૬ પાન ૫૫)

રામ ઉવાચ ।
હેરમ્બાય નમસ્તુભ્યં દીનકર્ત્રે કૃપાલવે ।
દીનાનાથસ્વરૂપાણાં કર્ત્રે તે વૈ નમો નમઃ ॥ ૭૭॥

ઈશ્વરાણાં ચ દીનાનામભેદાય ચ તે નમઃ ।
વિઘ્નેશાય ગણાનાં વૈ પતયે તે નમો નમઃ ॥ ૭૮॥

અનાદયે ચ સર્વેષામાદિરૂપાય તે નમઃ ।
અન્તમધ્યપ્રતિષ્ઠાય લમ્બોદર નમો નમઃ ॥ ૭૯॥

ચિન્તામણે ચ ચિત્તાનાં ચાલકાય નમો નમઃ ।
ભેદાભેદાદિહીનાય તદાકારાય તે નમઃ ॥ ૮૦॥

સર્વપૂજ્યાય સર્વાદિપૂજ્યાય પરમાત્મને ।
અનન્તાય પરેશાય ઢુણ્ઢિરાજાય તે નમઃ ॥ ૮૧॥

પૂર્ણાય પૂર્ણનાથાય સ્વાનન્દસ્થાય તે નમઃ ।
સિદ્ધિબુદ્ધિપ્રદાત્રે ચ સિદ્ધિબુદ્ધિવરાય ચ ॥ ૮૨॥

સમર્થાનાં ચ તે ભક્તિહીનાનાં દૈન્યકારિણે ।
દીનાનાં ભક્તિયુક્તાનાં નમઃ સામર્થ્યકારિણે ॥ ૮૩॥

દીનત્વં ચ સમર્થત્વં ત્વદધીનં ન સંશયઃ ।
અતો માં રક્ષ યોગેશ યોગેશાય નમો નમઃ ॥ ૮૪॥

કિં સ્તૌમિ ત્વાં ગણાધીશ શાન્તિયોગસ્વરૂપિણમ્ ।
ન સમર્થાશ્ચ વેદા યં યોગીન્દ્રાસ્તત્ર કોઽપ્યહમ્ ॥ ૮૫॥

રામસ્ય તસ્ય સ્તુવત એવં સમ્ભક્તિભાવિતઃ ।
રોમોદ્ગમઃ પ્રાદુરાસીત્ કણ્ઠરોધસ્તથૈવ ચ ॥ ૮૬॥

તતો ભક્તિરસે મગ્નં રામં વીક્ષ્ય ગજાનનઃ ।
જગાદ તં વરં બ્રૂહિ મનસીપ્સિતમાદરાત્ ॥ ૮૭॥

ત્વયા કૃતમિદં સ્તોત્રં ભવેન્ મત્પ્રીતિવર્ધનમ્ ।
શાન્તિયોગપ્રદં ચૈવ ભક્તિલક્ષણવર્ધનમ્ ॥ ૮૮॥

યદ્યદિચ્છતિ તત્તદ્વૈ દાસ્યામિ સ્તોત્રપાઠતઃ ।
શ્રવણેન ન સન્દેહઃ પ્રિયો મે સ ભવિષ્યતિ ॥ ૮૯॥

હેરમ્બસ્ય વચઃ શ્રુત્વા તમુવાચ જનાર્દનઃ ।
રામઃ પરમભાવેન ભક્ત્યા ચ પ્રકૃતાઞ્જલિઃ ॥ ૯૦॥

રામ ઉવાચ ।
યદિ પ્રસન્નભાવેન વરદોઽસિ ગજાનન ।
તદા ત્વદીયપાદાબ્જે ભક્તિર્ભવતુ શાશ્વતી ॥ ૯૧॥

યોગશાન્તિઃ સ્મૃતિર્નિત્યં યથા શઙ્કરભાષિતમ્ ।
તથા યોગીન્દ્રવન્દ્યં માં કુરુષ્વ ગણપ પ્રભો ॥ ૯૨॥

રાવણેન હૃતા સીતા તદ્વધાર્થં સમુદ્યતઃ ।

અહં તત્ર ચ હેરમ્બ જયં દેહિ વિશેષતઃ ॥ ૯૩॥

મદીયસ્ય ચ નામ્નો વૈ મહિમાનં મહાદ્ભુતમ્ ।
કુરુ સર્વત્ર માન્યં માં કીર્તિયુક્તં ગજાનન ॥ ૯૪॥

એવં તસ્ય વચઃ શ્રુત્વા હેરમ્બો રામમબ્રવીત્ ।
યથા સમ્પ્રાર્થિતં વિષ્ણો તથાઽસ્તુ તવ નિત્યદા ॥ ૯૫॥

મદીયસ્મરણેનૈવ સર્વં તે સુલભં ભવેત્ ।
તવ નામપ્રભાવેણ તરિષ્યન્તિ તુ જન્તવઃ ॥ ૯૬॥

એવમુક્ત્વા ગણેશાનોઽતર્ધાનં પ્રચકાર હ ।
રામો લક્ષ્મણસંયુક્તોઽભવત્તત્રૈવ સંસ્થિતઃ ॥ ૯૭॥

તતોઽગસ્ત્યં સમાનીય રામો વિપેન્દ્રસત્તમૈઃ ।
મૂર્તિં સંસ્થાપયામાસ હેરમ્બસ્ય વિધાનતઃ ॥ ૯૮॥

તદાદિગણનાથસ્તુ હેરમ્બઃ સંસ્થિતોઽભવત્ ।
વિદ્યાધીશપુરે વિપ્ર ભક્તેભ્યઃ સર્વસિદ્ધિદઃ ॥ ૯૯॥

તં પૂજયિત્વા રામઃ સ શોકહીનતયા મુને ।
જગામ લક્ષ્મણેનૈવ યુક્તો રક્ષોવધાય ચ ॥ ૧૦૦॥

સુગ્રીવં મિત્રભાવેન વાનરૈઃ સહિતં મુને ।
કૃત્વા ચ વાલિનં હત્વા યયૌ લઙ્કાં મહાબલઃ ॥ ૧૦૧॥

હનૂમદઙ્ગદાદ્યૈશ્ચ સુગ્રીવાદ્યૈશ્ચ સંવૃતઃ ।
અન્યૈર્જામ્બવદાદ્યૈશ્ચ વાનરૈર્દેવરૂપિભિઃ ॥ ૧૦૨॥

(Page  ખં. ૩ અ. ૨૭ પાન ૫૬)
સલક્ષ્મણશ્ચ રામોઽયં યુયુધે રાક્ષસૈસ્તતઃ ।
હત્વા રાક્ષસસઙ્ઘાન્ સ કુમ્ભકર્ણં જઘાન ચ ॥ ૧૦૩॥

લક્ષ્મણશ્ચેન્દ્રજેતારં મારયામાસ વેગતઃ ।
તતોઽતિકોપસંયુક્તો રાવણો યુયુધે ભૃશમ્ ॥ ૧૦૪॥

તેન સર્વે કપીન્દ્રાશ્ચ હતાઃ સમ્મૂર્ચ્છિતાઃ કૃતાઃ ।
લક્ષ્મણો મૂર્ચ્છિતસ્તત્ર ભૃશં રામશ્ચ પીડિતઃ ॥ ૧૦૫॥

શસ્ત્રાસ્ત્રાણિ ચ રામસ્ય કુણ્ઠિતાનિ વિશેષતઃ ।
તતોઽતિવિહ્વલો રામઃ સસ્માર ગણનાયકમ્ ॥ ૧૦૬॥

સ્મૃતિમાત્રેણ રામસ્ય હૃદિ ચિન્તામણિઃ સ્વયમ્ ।
દદૌ સ્ફૂર્તિં તથા રામો જઘાન રાવણં મુને ॥ ૧૦૭॥

સ્વયં બુદ્ધિપતિઃ સાક્ષાદ્રામાર્થં બુદ્ધિદોઽભવત્ ।
બુદ્ધ્યધીનં વિશેષેણ જગદ્બ્રહ્મ મહામુને ॥ ૧૦૮॥

તતો હત્વા મહાવીરં રાવણં રવિવંશજઃ ।
રામશ્ચકાર લઙ્કાયાં રાજાનં ચ બિભીષણમ્ ॥ ૧૦૯॥

યયૌ સીતાં વિમાનેન સઙ્ગૃહ્ય નગરે સ્વકે ।
ચકાર રાજ્યમુગ્રં વૈ સદા ધર્મેણ ધર્મવિત્ ॥ ૧૧૦॥

સીતયાઽઽસક્તચિત્તઃ સ વ્યસ્મરત્ જ્ઞાનમુત્તમમ્ ।
ગાણેશં ચ તતસ્તસ્ય વિયોગઃ સીતયાઽભવત્ ॥ ૧૧૧॥

અશ્વમેધાદિકં કૃત્વા સંસ્થિતો રાજ્યકર્મણિ ।
તતો વસિષ્ઠયોગેન પુનર્જ્ઞાનમવાપ હ ॥ ૧૧૨॥

તતઃ શાન્તિસમાયુક્તો ગણેશં મનસા સદા ।
પુપૂજ ભક્તિસંયુક્તો બહિર્મૂર્તિધરં મુને ॥ ૧૧૩॥

અન્તે જગામ રામઃ સ વિકુણ્ઠં વિષ્ણુરવ્યયઃ ।
તત્ર તં ગણનાથં સોઽભજતાનન્યચેતસા ॥ ૧૧૪॥

ઇદં રામચરિત્રં યઃ શૃણુતે ભક્તિસંયુતઃ ।
પઠેદ્વા ભુક્તિદં તસ્ય મુક્તિદં પ્રભવિષ્યતિ ॥ ૧૧૫॥

અયં મહોદરસ્યૈવાવતારસ્તે મહામુને ।
હેરમ્બાખ્યસ્તથા પ્રોક્તઃ શ્રવણાત્ સર્વસિદ્ધિદઃ ॥ ૧૧૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે રામચન્દ્રચરિતં નામ ષડ્વિંશતિતમોઽધ્યાયઃ ॥ ૩.૨૬

## ૩.૨૭ સૂર્યવાલખિલ્યસંવાદસમાપ્તિવર્ણનં નામ સપ્તવિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

નરનારાયણવૂચતુઃ ।
ઇત્યાદિ રાજમાહાત્મ્યં વક્તું નૈવ પ્રશક્યતે ।

સર્વં માયામયં વિદ્ધિ માર્કણ્ડેય વિશેષતઃ ॥ ૧॥

બ્રહ્મણા સૃષ્ટમાપૂર્ણં વિષ્ણુના પાલિતં તથા ।
હરેણ સંહૃતં સર્વં બ્રહ્માણ્ડં માયયા કૃતમ્ ॥ ૨॥

અનન્તાનિ ચ સર્વત્ર બ્રહ્માણ્ડાનિ સ્થિતાનિ વૈ ।
મહાકારણરૂપેણ સન્ધૃતા વિદ્ધિ માનદ ॥ ૩॥

માયાત્મકાનિ સર્વાણિ જ્ઞાતવ્યાનિ વિશેષતઃ ।
ભ્રમનાશેન યોગેન જ્ઞાયન્તે નાત્ર સંશયઃ ॥ ૪॥

મનોવાણીમયં સર્વં ભ્રમરૂપં પ્રકથ્યતે ।
મનોવાણીવિહીનં વૈ તદેવં તાદૃશં મતમ્ ॥ ૫॥

ધર્માર્થકામમોક્ષાશ્ચ બ્રહ્મભૂતત્વમેવ ચ ।
ભ્રમેણ માયયા વિપ્ર ભાસતે યોગિનાં હૃદિ ॥ ૬॥

રામસ્ય ચરિતં પૂર્ણં કથિતં તે સમાસતઃ ।
કિં શ્રોતુમિચ્છસિ પ્રાજ્ઞ ગમિષ્યાવો નિજાશ્રમમ્ ॥ ૭॥

ભાનુરુવાચ ।
તયોર્વચનમાકર્ણ્ય માર્કણ્ડેયશ્ચ તૌ પુનઃ ।
(Page ખં. ૩ અ. ૨૭ પાન ૫૭)
જગાદ પ્રણતો ભૂત્વા યોગાર્થં પૂર્ણભાવતઃ ॥ ૮॥

માર્કણ્ડેય ઉવાચ ।
નરનારાયણૌ દેવૌ ભવદ્ભ્યાં પાવિતોઽહ્યહમ્ ।
કથાં શ્રુત્વા ન મે તૃપ્તિર્જાયતેઽમૃતપાનવત્ ॥ ૯॥

અતો ગણેશયોગં મે વદતં યેન ચાપ્યહમ્ ।
રામવચ્છાન્તિમાશ્રિત્ય બ્રહ્મભૂતો ભવામિ ચ ॥ ૧૦॥

નરનારાયણાવૂચતુઃ ।
ગણેશયોગમાર્ગં તે વદિષ્યાવઃ સુયુક્તિતઃ ।
ન શક્તિસ્તં વર્ણયિતું મનસાઽપિ મુનીશ્વર ॥ ૧૧॥

ચિત્તં પઞ્ચવિધં વિપ્ર તત્ર ચિન્તામણિઃ સ્થિતઃ ।
પઞ્ચવૃત્તિનિરોધેન લભ્યતે નાત્ર સંશયઃ ॥ ૧૨॥

ભ્રાન્તિદા સર્વભાવેષુ સિદ્ધિઃ સર્વત્ર સંસ્થિતા ।

ભ્રાન્તિધારકરૂપા વૈ બુદ્ધિઃ સા કથ્યતે બુધૈઃ ॥ ૧૩॥

તયોર્બિમ્બં ચ યત્ પ્રોક્તં તદેવ ગણનાયકઃ ।
મોહયુક્તઃ સ્વભાવેન ખેલતે મુનિસત્તમ ॥ ૧૪॥

બિમ્બિભાવં પરિત્યજ્ય ભવ ત્વં ગણનાયકઃ ।
અહં ગણેશરૂપશ્ચ યોગોઽયં શાન્તિદાયકઃ ॥ ૧૫॥

ચિત્તં પઞ્ચવિધં ત્યક્ત્વા તદૈશ્વર્યં ભ્રમાત્મકમ્ ।
અધુના ગણનાથો વૈ ત્વં યોગેન ભવિષ્યસિ ॥ ૧૬॥

મનોવાણીમયં સર્વં ગકારાક્ષરવાચકમ્ ।
મનોવાણી વિહીનં ચ ણકારઃ કથ્યતે બુધૈઃ ॥ ૧૭॥

તયોઃ સ્વામી ગણેશાનો વેદે પશ્ય મહામુને ।
તં ભજસ્વ તતઃ શાન્તિં ગચ્છસિ ત્વં ન સંશયઃ ॥ ૧૮॥

એવમુક્ત્વા વાલખિલ્યા નરનારાયણાવૃષી ।
વિરેમતુરથૈવં તં જાનીત ગણનાયકમ્ ॥ ૧૯॥

તૌ પ્રણમ્ય પુનઃ પ્રાહ માર્કણ્ડેયઃ પ્રતાપવાન્ ।
ધન્યોઽહં ભવતોશ્ચૈવ દર્શનેન મહામુની ॥ ૨૦॥

માયાં મોહકરીં નાથૌ દ્રષ્ટુમિચ્છામિ શાશ્વતીમ્ ।
દર્શયેતં મહામાયાં ભગવન્તૌ નમામ્યહમ્ ॥ ૨૧॥

ભાનુરુવાચ ।
તથેતિ તં વાલખિલ્યા ઊચતુર્મુનિસત્તમૌ ।
પશ્યસિ ત્વં મહામાયાં માર્કણ્ડેય ન સંશયઃ ॥ ૨૨॥

આજ્ઞાં પ્રગૃહ્ય તેનૈવ પૂજિતૌ યોગિનાં વરૌ ।
યયતુઃ સ્વાશ્રમં યોગાદ્બ્રાણપત્યૌ મહર્ષયઃ ॥ ૨૩॥

તતઃ કદાચિદ્વિપ્રેન્દ્રો માર્કણ્ડેયઃ સ્વ આશ્રમે ।
સંસ્થિતો યોગિનૌ ધ્યાત્વા માયાદર્શનલાલસઃ ॥ ૨૪॥

તતોઽકસ્માત્ પ્રશુશ્રાવ મહાનાદં સમુદ્ભવમ્ ।
ભયભ્રાન્તોઽભવત્ સોઽપિ તતો મેઘા જગર્જિરે ॥ ૨૫॥

હસ્તિહસ્તોપમાભિસ્તે ધારાભિર્વવૃષુસ્તતઃ ।
મેઘૈસ્તત્ર જગત્ સર્વં મજ્જિતં પશ્યતો મુનેઃ ॥ ૨૬॥

તતઃ સમુદ્રજેનૈવ જલેન પ્લાવિતં મહત્ ।
સર્વં ચરાચરં તત્ર બભ્રામ મુનિસત્તમઃ ॥ ૨૭॥

મત્સ્યાદિભિશ્ચ વિપ્રેન્દ્રઃ કિઞ્ચિત્ ક્ષતયુતઃ કૃતઃ ।
સસ્માર ગણનાથં સ માર્કણ્ડેયોઽતિવિહ્વલઃ ॥ ૨૮॥

તતો દદર્શ તત્રૈવ વટપત્રસ્થિતં શિશુમ્ ।
અઙ્ગુષ્ઠપર્વમાત્રં સ વિષ્ણું સર્વાર્થદં પરમ્ ॥ ૨૯॥

તં પ્રણમ્ય પ્રતુષ્ટાવ માર્કણ્ડેયો મહર્ષયઃ ।
અથર્વશિરસા દેવં સન્તુષ્ટં સ ચકાર હ ॥ ૩૦॥

ઉવાચ તં સ વિપ્રેન્દ્રં કિમિચ્છસિ મહામુને ।
વદ તેઽહં પ્રદાસ્યામિ વરદો નાત્ર સંશયઃ ॥ ૩૧॥

તં પ્રણમ્ય તથોઽવાચ માર્કણ્ડેયઃ પ્રસન્નધીઃ ।
માયાં દર્શય મે વિષ્ણો તાં જ્ઞાત્વા સન્ત્યજામ્યહમ્ ॥ ૩૨॥

તતસ્તં વિષ્ણુરૂપઃ સ બાલકો ભક્તિયન્ત્રિતઃ ।
જગાદ હાસ્યસંયુક્તો ભક્તરક્ષણતત્પરઃ ॥ ૩૩॥

(Page ખં. ૩ અ. ૨૭ પાન ૫૮)

બાલવિષ્ણુરુવાચ ।
પશ્ય માયાં મહર્ષે ત્વં જ્ઞાનદૃષ્ટ્યા મહામુને ।
જ્ઞાનચક્ષુર્મયા દત્તં તુભ્યં ભક્તિપ્રભાવતઃ ॥ ૩૪॥

માર્કણ્ડેયસ્તતો વિપ્રા જ્ઞાનચક્ષુઃસમન્વિતઃ ।
માયામપશ્યદાનન્દાન્નાનાભાવપ્રકાશિનીમ્ ॥ ૩૫॥

વ્યાપ્યવ્યાપકરૂપેણ દ્વિજાઃ સર્વત્ર સંસ્થિતાઃ ।
નાનાગુણવિભેદેન મોહયન્તિ નરાન્ સદા ॥ ૩૬॥

કુત્ર બ્રહ્માણ્ડનાશશ્ચ કુત્ર બ્રહ્માણ્ડપાલનમ્ ।
કુત્રોત્પત્તિશ્ચ વિપ્રેન્દ્રા દૃશ્યતે તેન યોગિના ॥ ૩૭॥

કુત્ર શૂન્યમયં કુત્ર પૂર્ણરૂપં તથા પુનઃ ।
ધ્યાનસંસ્થં પરં બ્રહ્મ દદર્શ મુનિસત્તમઃ ॥ ૩૮॥

કુત્ર યોગાર્થમત્યન્તં નરાઃ પરમભાવિકાઃ ।

લિપ્યન્તે કુત્ર ભોગાર્થં મોક્ષાર્થં કુત્રચિદ્ દ્વિજાઃ ॥ ૩૯॥

પુનઃ પુનશ્ચ સૃજ્યન્તે મ્રિયન્તે ચ પુનઃ પુનઃ ।
ઈશ્વરાનેશ્વરાઃ કુત્ર પ્રભવન્તીશ્વરા નરાઃ ॥ ૪૦॥

અમૃતં વિષરૂપં ચ વિષં ચામૃતદાયકમ્ ।
દદર્શ તત્ર વિપ્રર્ષિઃ સૂર્યં શીતત્વમાસ્થિતમ્ ॥ ૪૧॥

સ્થલે જલં જલે ચૈવ સ્થલં નાનાવિકારજમ્ ।
મુક્તં નરં તથા બદ્ધં દદર્શ મુનિસત્તમઃ ॥ ૪૨॥

ન પ્રલેભે ગતિં તત્રેશ્વરો ભ્રાન્ત્યા હ્યનીશ્વરઃ ।
જગચ્ચ જગદાત્મા વૈ તતોઽસૌ વિસ્મિતોઽભવત્ ॥ ૪૩॥

એવં નાનાવિધં ભાવં દદર્શ મુનિસત્તમઃ ।
ન શક્યતે મયા વક્તું વર્ષકોટિશતૈરપિ ॥ ૪૪॥

તતસ્તં પરિતુષ્ટાવ બાલવિષ્ણું મહામુનિઃ ।
નાનાસ્તોત્રૈઃ સુતુષ્ટં સ પ્રાર્થયામાસ ભાવતઃ ॥ ૪૫॥

નિવર્તય હરે માયાં કુરુ માં પૂર્વવદ્યથા ।
ઇતિ પ્રાર્થયમાનં સ ચક્રે સ્વે ચાશ્રમે સ્થિતમ્ ॥ ૪૬॥

તતસ્તત્ર દ્વિજેન્દ્રેણ ન દૃષ્ટમિવ તદ્બભૌ ।
યથા સ્વપ્નગતં જન્તુર્ન દદર્શ સમુત્થિતઃ ॥ ૪૭॥

ન જલં નૈવ સામુદ્રં ભયં દુઃખં ન કેશવઃ ।
બાલરૂપધરશ્ચૈવ ન માયા તેન વિસ્મિતઃ ॥ ૪૮॥

વાલખિલ્યાસ્તતો વિપ્રસ્ત્યક્ત્વા માયાં ભ્રમાત્મિકામ્ ।
ગણેશભજને સક્તોઽજપદ્વૈ મન્ત્રમુત્તમમ્ ॥ ૪૯॥

નરનારાયણાભ્યાં યઃ કથિતો યોગ ઉત્તમઃ ।
હેરમ્બમન્ત્રભાવેન સાધયામાસ તં પુનઃ ॥ ૫૦॥

રામેણ સાધિતઃ પૂર્વં તથા તેનાઽપિ સાધિતઃ ।
યોગઃ શાન્તિપ્રદઃ પૂર્ણો ગાણપત્યસ્વભાવતઃ ॥ ૫૧॥

યોગશાન્તિપરો ભૂત્વાઽભજત્તં ગણનાયકમ્ ।
અનન્યચેતસા સોઽપિ માર્કણ્ડેયઃ સુયોગવિત્ ॥ ૫૨॥

અન્તે ગણેશદેહે સ સાયુજ્યં પ્રાપ ભક્તિતઃ ।
એવં નાનાવિધા વિપ્રા ગાણેશાઃ સમ્ભવન્તિ વૈ ॥ ૫૩॥

એતન્ મૃકણ્ડપુત્રસ્ય ચરિતં યઃ શ‍ૃણોતિ વા ।
પઠેત્તુ તસ્ય વૈ માયાબન્ધો ન પ્રભવિષ્યતિ ॥ ૫૪॥

મહોદરો ભવેદ્દેવો હેરમ્બાખ્યઃ પ્રકીર્તિતઃ ।
વિઘ્નાધીશપુરે ભક્તિસિદ્ધિદસ્તત્ર તિષ્ઠતિ ॥ ૫૫॥

અતોઽહં ગણનાથં તં પ્રભજે વાલખિલ્યકાઃ ।
યોગભાવેન સંસાધ્યં કૃત્વા ભક્તિસમન્વિતઃ ॥ ૫૬॥

મુદ્ગલ ઉવાચ ।
એવં ભાનોર્વચઃ શ્રુત્વા પ્રણેમુર્વાલખિલ્યકાઃ ।
રવિં સર્વત્ર ચાત્માનં તુષ્ટુવુર્વિવિધૈઃ સ્તવૈઃ ॥ ૫૭॥

ઊચુઃ પ્રાઞ્જલયસ્તે તં ભાનું સર્વપ્રિયં પુનઃ ।
કૃતકૃત્યાઃ કૃતા ભાનો વયં દેવ ન સંશયઃ ॥ ૫૮॥

(Page ખં. ૩ અ. ૨૮ પાન ૫૯)
કિં પ્રદદ્મો મહાત્મંસ્ત્વાં દેહોઽયં તે સમર્પિતઃ ।
તેન તુષ્ટો ભવ સ્વામિન્ ગુરુરસ્માકમાદરાત્ ॥ ૫૯॥

તતઃ સર્વે પુપૂજુસ્તં વાલખિલ્યાસ્તપોધનાઃ ।
પ્રણમ્ય પ્રયયુસ્તે વૈ તપસે વનમુત્તમમ્ ॥ ૬૦॥

સાધયિત્વા યથાયોગં શ્રુતમત્ર પ્રજાપતે ।
યોગિનઃ સર્વવન્દ્યાસ્તે સમ્બભૂવુર્વિશેષતઃ ॥ ૬૧॥

હેરમ્બં ભજમાનાશ્ચ નિત્યં ધ્યાનપરાયણાઃ ।
અનન્યબુદ્ધયઃ સર્વે યોગશાન્તિં પ્રલેભિરે ॥ ૬૨॥

હેરમ્બાખ્યાવતારશ્ચ મહોદરકલાત્મકઃ ।
કથિતસ્તે પ્રજાપાલ નાનાખ્યાનસમન્વિતઃ ॥ ૬૩॥

એતાદૃશાઽવતારાશ્ચ બહવસ્તસ્ય માનદ ।
મહોદરસ્ય તેષાં યચ્ચરિત્રં પરમાદ્ભુતમ્ ॥ ૬૪॥

નૈવ શક્યં કથયિતું તત્ કેનાઽપિ ન સંશયઃ ।
અતઃ સઙ્ક્ષેપતઃ પ્રોક્તં મયા દક્ષ પ્રજાપતે ॥ ૬૫॥

સૂર્યસ્ય વાલખિલ્યાનાં સંવાદઃ પરમાદ્ભુતઃ ।
બ્રહ્મભૂયપ્રદઃ પ્રોક્તો ધર્મકામાર્થમોક્ષદઃ ॥ ૬૬॥

પ્રભવેત્ સ વિશેષેણ સર્વસમ્પત્પ્રદાયકઃ ।
મોહનાશકરઃ પૂર્ણઃ શ્રોતુમિચ્છસિ કિં પુનઃ ॥ ૬૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે સૂર્યવાલખિલ્યસંવાદસમાપ્તિવર્ણનં નામ સપ્તવિંશતિતમોઽધ્યાયઃ ॥ ૩.૨૭

## ૩.૨૮ બુધોત્પત્તિવર્ણનં નામાષ્ટાવિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શૌનક ઉવાચ ।
સૂત ત્વયા મહાખ્યાનં કથિતં સર્વસિદ્ધિદમ્ ।
શ્રુત્વા તૃપ્તિં ન યામીહાઽમૃતં પીત્વા યથા નરઃ ॥ ૧॥

પુનસ્ત્વં વદ મે બ્રહ્મન્ ભવેદ્દક્ષેણ સંશ્રુતમ્ ।
મુદ્ગલાન્ મુનિમુખ્યાચ્ચ સર્વેષાં સમ્મતં પરમ્ ॥ ૨॥

સૂત ઉવાચ ।
સૂર્યસ્ય વાલખિલ્યાનાં સંવાદં બ્રહ્મદાયકમ્ ।
શ્રુત્વા પપ્રચ્છ તં દક્ષો મુદ્ગલં વિનયાન્વિતઃ ॥ ૩॥

દક્ષ ઉવાચ ।
શ્રુતં હેરમ્બમાહાત્મ્યં બ્રહ્મભૂતપદપ્રદમ્ ।
પુનસ્ત્વં વદ વિપ્રર્ષે મહોદરચરિત્રકમ્ ॥ ૪॥

શ્રુત્વા શ્રુત્વા ન મે તૃપ્તિર્જાયતે યોગિસત્તમ ।
કથાં બ્રહ્મમયીં પૂર્ણાં સુધારસસમાં પરામ્ ॥ ૫॥

સૂત ઉવાચ ।
દક્ષસ્ય વચનં શ્રુત્વા હૃષ્ટરોમા મહાયશાઃ ।
જગાદ તં પ્રજાપાલં યત્તચ્છૃણુ હિ શૌનક ॥ ૬॥

મુદ્ગલ ઉવાચ ।
યુધિષ્ઠિરેણ દેવેશો માનપ્રદ મહોદરઃ ।
આરાધિતો વિશેષેણ યોગી સોઽભૂચ્ચ પાણ્ડવઃ ॥ ૭॥

દક્ષ ઉવાચ ।
યુધિષ્ઠિરસ્ય વિપ્રર્ષે ચરિત્રં વદ સામ્પ્રતમ્ ।
પ્રારભ્ય ચન્દ્રવંશાચ્ચ તદન્તં પુણ્યદં ભવેત્ ॥ ૮॥

મુદ્ગલ ઉવાચ ।
અત્રિનેત્રાત્ સમુત્પન્નશ્ચન્દ્રોઽમૃતમયઃ પુરા ।
તેનાતિતપસા દેવઃ સેવિતો ગણનાયકઃ ॥ ૯॥

ગણેશવરદાનેન તારાણામધિપોઽભવત્ ।
ઓષધીનાં ચ વિપ્રાણાં યોગયુક્તઃ પ્રતાપવાન્ ॥ ૧૦॥

તતઃ સ રાજા મોહેન મોહિતોઽતિતરાં વિભો ।
ગણેશભજનં ત્યક્ત્વા ભોગયુક્તો બભૂવ હ ॥ ૧૧॥

તતો વિઘ્નેન વૈ ચન્દ્રઃ પીડિતો મોહસંયુતઃ ।
મોહેન ગર્હિતં કર્મ યચ્ચકાર શ‍ૃણુષ્વ તત્ ॥ ૧૨॥

(Page ખં. ૩ અ. ૨૮ પાન ૬૦)
બૃહસ્પતેશ્ચ યા નારી તારા યૌવનશાલિની ।
રૂપેણાપ્રતિમા તાં સ જગૃહે તીર્થસંશ્રિતામ્ ॥ ૧૩॥

મા મેતિ બ્રુવતીં તારાં હાહાકારં પ્રકુર્વતીમ્ ।
ગુરુપત્નીં મહામૂર્ખશ્ચુચુમ્બ હઠસંયુતઃ ॥ ૧૪॥

વનેષુ પર્વતદ્રોણ્યાં નાનાભાવેષુ સોઽત્રિજઃ ।
રેમે તયા પ્રજાપાલ કામબાણપ્રપીડિતઃ ॥ ૧૫॥

તતો બહૌ ગતે કાલે ગર્ભસ્તસ્યાં વ્યવર્ધત ।
ન મુમોચ તદાઽપ્યેતાં મોહયુક્તશ્ચ ચન્દ્રમાઃ ॥ ૧૬॥

બૃહસ્પતિશ્ચ તં જ્ઞાત્વા વૃત્તાન્તં ક્ષુભિતો ભૃશમ્ ।
નાનાયત્નેન ચન્દ્રં સ યયાચે ન દદૌ શઠઃ ॥ ૧૭॥

તતશ્ચ ગુરુણા દક્ષ શિવસ્તેન પ્રસાદિતઃ ।
શમ્ભુરઙ્ગિરસઃ શિષ્યઃ સ વૈ ક્રોધયુતોઽભવત્ ॥ ૧૮॥

દેવૈરિન્દ્રાદિભિઃ સર્વૈઃ શઙ્કરઃ ક્રોધસંયુતઃ ।
હન્તું ચન્દ્રં યયૌ તત્ર ક્રોધારુણવિલોચનઃ ॥ ૧૯॥

ભયભીતઃ શશી તત્ર શુક્રં સ શરણં યયૌ ।

તેનાપ્યાઙ્ગિરસ્યૈવ વૈરી સમ્પાદિતોઽભવત્ ॥ ૨૦॥

શુક્રેણાકારિતા દૈત્યાઃ પ્રહ્લાદપ્રમુખા યયુઃ ।
સઙ્ગ્રામાય શિવેનૈવ સસુરેણ મહાબલાઃ ॥ ૨૧॥

તતસ્તેષામભૂદ્યુદ્ધં તુમુલં રોમહર્ષણમ્ ।
દૈત્યાનાં ચૈવ દેવાનાં પરસ્પરવિનાશનમ્ ॥ ૨૨॥

માસમાત્રં મહોગ્રં તન્ન શાન્તિમલભન્ કદા ।
દિવારાત્રં દેવગણા દૈત્યાનાં ચ ગણા વિભો ॥ ૨૩॥

તતો બૃહસ્પતિર્દુઃખાત્ સસ્માર ગણનાયકમ્ ।
નિન્દયામાસ ચાત્માનં તથા ચન્દ્રં પ્રજાપતે ॥ ૨૪॥

અહો ભ્રાતૃવિરોધેન મમ જ્ઞાનં ગતં મહત્ ।
ગતો ગણેશસ્તેનાઽહં વિઘ્નયુક્તોઽધુનાઽભવમ્ ॥ ૨૫॥

મદર્થં દેવદૈત્યાનામધુના નાશ આગતઃ ।
કિં ભવિષ્યતિ દેવેશ ગજાનન નમોઽસ્તુ તે ॥ ૨૬॥

નિર્વિઘ્નં કુરુ માં ઢુણ્ઢેઽધુના દેવ દયાનિધે ।
દેવાનાં ચૈવ દૈત્યાનાં મૂલચ્છેદો ભવિષ્યતિ ॥ ૨૭॥

તથા ચન્દ્રઃ સ તં દેવં સસ્માર હૃદિ ભાવતઃ ।
તતો વિઘ્નહરશ્ચૈવ તયોર્દક્ષ બભૂવ હ ॥ ૨૮॥

તત્રાઽઽજગામ દેવેશો બ્રહ્મા સર્વપિતામહઃ ।
દેવાનાં દાનવાનાં વૈ જ્ઞાત્વા નાશં દયાન્વિતઃ ॥ ૨૯॥

શઙ્કરાદ્યાંશ્ચ દેવાન્ સ પ્રહ્લાદાદ્યાંશ્ચ દાનવાન્ ।
વારયામાસ સર્વજ્ઞો વિધાતા સર્વભાવનઃ ॥ ૩૦॥

બ્રહ્મણો વચનં શ્રુત્વા સંસ્થિતા દેવદાનવાઃ ।
પ્રણમ્ય તં વિધાતારં બદ્ધાઞ્જલિપુટાઃ પુરઃ ॥ ૩૧॥

ચન્દ્રં તતસ્તિરસ્કૃત્ય દદૌ તારાં પિતામહઃ ।
ગુરવે તત્ર સંવાદઃ પુત્રાર્થં ચ તયોરભૂત્ ॥ ૩૨॥

તારાયા ઉદરે ગર્ભો વા ચન્દ્રસ્ય બૃહસ્પતેઃ ।
ન જ્ઞાયતે દેવગણૈસ્તતસ્તાં વિધિરબ્રવીત્ ॥ ૩૩॥

ત્યજ ગર્ભં મહાભાગે કસ્યાંઽશોઽયં વદ સ્નુષે ।
તથા તયા ચ સન્ત્યક્તો ગર્ભઃ સમ્પતિતોઽભવત્ ॥ ૩૪॥

મહાતેજોમયં પુત્રં વીક્ષ્ય દેવા વિસિસ્મિરે ।
લજ્જયાઽધોમુખી તારા કથયામાસ નૈવ તમ્ ॥ ૩૫॥

તતો ગર્ભઃ સ્વયં તત્રોવાચ બ્રહ્માણમાદરાત્ ।
ચન્દ્રસ્યાઽહં ન સન્દેહસ્તં તારાઽપિ તથાઽબ્રવીત્ ॥ ૩૬॥

તસ્ય નામ કૃતં દેવૈર્બુધસ્તેન સુકર્મણા ।
ચન્દ્રાય તં દદૌ ધાતા સર્વે સ્વસ્વાલયં યયુઃ ॥ ૩૭॥

એવં પુરા તારકાર્થે સઙ્ગ્રામસ્તારકામયઃ ।
બભૂવ પરમુગ્રશ્ચ દૈત્યદેવવિનાશકૃત્ ॥ ૩૮॥

(Page ખં. ૩ અ. ૨૯ પાન ૬૧)
બુધસ્ય ચરિતં પૂર્ણં કથિતં તે પ્રજાપતે ।
પુરૂરવાસ્તસ્ય પુત્રો બભૂવાઽપિ મહાયશાઃ ॥ ૩૯॥

ઇલાયાં ગર્ભસન્દાનાત્તસ્ય જન્મ મયા પુરા ।
કથિતં સોઽપિ રાજર્ષિઃ પિતૃતૃપ્તિકરોઽભવત્ ॥ ૪૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે બુધોત્પત્તિવર્ણનં નામાષ્ટાવિંશતિતમોઽધ્યાયઃ ॥ ૩.૨૮

## ૩.૨૯ પુરૂરવસશ્ચરિતકથનં નામૈકોનત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
પુરૂરવાશ્ચકારાઽસૌ રાજ્યં ભૂમણ્ડલસ્ય ચ ।
ધર્મયુક્તઃ સુનીત્યા તાન્ પાલયામાસ માનવાન્ ॥ ૧॥

મુનિશાપસમાયુક્તોર્વશી નૃપતિમાયયૌ ।
કુરુક્ષેત્રે ચરન્તં સ ચકમે તાં મહીપતિઃ ॥ ૨॥

સોવાચ પુત્રતુલ્યૌ મે ઉરણૌ રક્ષસિ પ્રભો ।
રતિં વિના સ્વદેહં ત્વં નગ્નં મા દર્શયસ્વ મામ્ ॥ ૩॥

તદા તવ ગૃહે રાજન્ વસામિ ઘૃતભોજના ।

તથેતિ સ તુ ભૂપસ્તાં સઙ્ગૃહ્ય ગૃહમાયયૌ ॥ ૪॥

તસ્યાં પુત્રા બભૂવુશ્ચ ષડિન્દ્રસમતેજસઃ ।
આયુર્માયુરમાયુશ્ચ વિશ્વાયુશ્ચ તથા પ્રભો ॥ ૫॥

શતાયુઃ સ્થાયુરેતે ચ નામભિઃ પરિકીર્તિતાઃ ।
ચન્દ્રવંશકરાઃ સર્વે બભૂવુર્જયશાલિનઃ ॥ ૬॥

તત ઇન્દ્રેણ ગન્ધર્વાઃ પ્રેષિતા રાજવેશ્મનિ ।
ઉર્વશીનયનાર્થં વૈ વિશ્વાવસુપુરોગમાઃ ॥ ૭॥

તૈર્માયાપ્રકૃતી તત્ર રાત્રૌ તસ્યાઃ સમાહૃતૌ ।
ઉરણૌ ચ તથા તાભ્યાં શબ્દૈઃ પ્રરુદિતં ભૃશમ્ ॥ ૮॥

તયો રુદનમાકર્ણ્ય રાજાનં રભસાજ્જગૌ ।
ઉર્વશી વીર્યહીનં ત્વાં ન જાનામિ નરેશ્વરમ્ ॥ ૯॥

મમ પુત્રૌ હૃતૌ કેન ચૌરેણ કિમુ પશ્યસિ ।
તસ્યા વચનમાકર્ણ્ય ક્રોધરૂપો બભૂવ સઃ ॥ ૧૦॥

નગ્નઃ ખડ્ગધરઃ સદ્યો નિર્યયૌ ભાવિગૌરવાત્ ।
વિદ્યુત્પાતસ્તથા તત્ર સમભૂદ્દેવનિર્મિતઃ ॥ ૧૧॥

તેજસા વિદ્યુતસ્તત્ર રાજા નગ્નો બભૌ ગૃહે ।
તથા તમુર્વશી દૃષ્ટ્વાંઽતર્ધાનં સા ચકાર વૈ ॥ ૧૨॥

મેષૌ પ્રગૃહ્ય ગન્ધર્વા ગતાઃ સ્વર્ગં વિહાયસા ।
ઉર્વશીસહિતાઃ શક્રં પ્રણેમુર્હર્ષસંયુતાઃ ॥ ૧૩॥

રાજા સ્વગૃહમધ્યે તાં ન દદર્શ યશસ્વિનીમ્ ।
તદા પપાત ભૂપૃષ્ઠે હાહાકૃત્વા મુમૂર્ચ્છ સઃ ॥ ૧૪॥

તથાવિધો મહારાજો વિલલાપ પુરૂરવાઃ ।
બભ્રામ વસુધાં સર્વામુર્વશીદર્શનોત્સુકઃ ॥ ૧૫॥

તતો બહૌ ગતે કાલે વર્ષમાત્રે દયાયુતામ્ ।
કુરુક્ષેત્રે પુનસ્તાં સ દૃષ્ટવાન્ હર્ષિતોઽભવત્ ॥ ૧૬॥

માં ત્યક્ત્વા ક્વ ગતાઽસિ ત્વં પ્રિયે તે ભક્તિસંયુતમ્ ।
અધુના માં ગૃહાણ ત્વં ત્યજ મા ચાપ્સરોવરે ॥ ૧૭॥

તતસ્તેન સમાયુક્તા રાત્રિમેકામુવાસ સા ।
ઉવાચ તં તુ રાજાનં શોકયુક્તં વચો હિતમ્ ॥ ૧૮॥

અહં દેવાપ્સરો રમ્યા ગન્ધર્વાઽધીનતાં ગતા ।
અતસ્ત્વં પિતૃયજ્ઞેન યજ ત્વં નિત્યમાદરાત્ ॥ ૧૯॥

તતઃ સ્વર્ગે ચ તે વાસો ભવિષ્યતિ મહામતે ।
(Page ખં. ૩ અ. ૨૯ પાન ૬૨)
ત્વદધીના ભવિષ્યામિ નિત્યં રાજન્ન સંશયઃ ॥ ૨૦॥

તતઃ શોકાકુલો રાજા રુરોદાતીવ દારુણમ્ ।
સા તથા વિહ્વલં દૃષ્ટ્વોવાચ દેવાઙ્ગના ચ તમ્ ॥ ૨૧॥

વર્ષે વર્ષે ચ ભો રાજન્નેકરાત્રિં વસામ્યહમ્ ।
ત્વયા સાર્દ્ધં મહાભાગ તતઃ સાંઽતર્હિતાઽભવત્ ॥ ૨૨॥

રાજ્ઞાઽપિ તાદૃશં તત્ર કૃતં નિત્યં પ્રજાપતે ।
તેન પિતૃગણાસ્તુષ્ટા વરં રાજ્ઞે દદૌ પરમ્ ॥ ૨૩॥

ઉર્વશી ત્વદધીના સા ભવિષ્યતિ મહામતે ।
તવ નામાઙ્કિતા દેવાઃ શ્રાદ્ધેઽસ્માકં ભવન્તુ ચ ॥ ૨૪॥

અક્ષયઃ પિતૃલોકસ્તે ભવિષ્યતિ ન સંશયઃ ।
એવમુક્ત્વાંઽતર્દધુસ્તે પિતરો ભક્તવત્સલાઃ ॥ ૨૫॥

તતઃ સ્વલ્પેન કાલેન ભૂમિપો નિધનં ગતઃ ।
સ્વર્ગં પુણ્યબલેનૈવ જગામ સ પુરૂરવાઃ ॥ ૨૬॥

તત્રોર્વશી સમાયુક્તો બુભુજે વિષયપ્રિયઃ ।
ભોગાન્ સ્વર્ગોદ્ભવાન્ નિત્યં તામવાપ્ય પુરૂરવાઃ ॥ ૨૭॥

તતો બહૌ ગતે કાલે પિતૃલોકે ગતેન સઃ ।
નારદેન મહીપાલો બોધિતો દયયા વિધે ॥ ૨૮॥

નારદ ઉવાચ ।
કિં રાજંસ્ત્વં મહાભાગ વિષયેષુ વિશેષતઃ ।
સક્તઃ પશ્ય સ્વમાત્માનં પતિષ્યસિ ન સંશયઃ ॥ ૨૯॥

દેહોઽયં બન્ધનાગારં તત્ર ત્વં નિગડેન ચ ।
બદ્ધસ્તસ્માચ્ચ યોગેન બન્ધહીનો ભવ પ્રભો ॥ ૩૦॥

પુનઃ પુનશ્ચ ભોગાઃ કિં ભોક્તવ્યાસ્તાદૃશાસ્ત્વયા ।
ન તૃપ્તિમધિગચ્છન્તિ જના અજ્ઞાનસંયુતાઃ ॥ ૩૧॥

બ્રહ્મામૃતં પિબ ત્વં ચ સદા સ્વાનન્દદાયકમ્ ।
તત્ત્યક્ત્વાઽલ્પસુખે સક્તઃ પતિષ્યસિ પુનર્ભ્યધિઃ ॥ ૩૨॥

ચતુરશીતિ લક્ષાસુ નરો ભ્રમતિ યોનિષુ ।
તત્ર સ્ત્રીપુત્રકાર્થં સ લભતે નાઽત્ર સંશયઃ ॥ ૩૩॥

મનુષ્યયોનિગો ભૂત્વા નરઃ સર્વાર્થવાન્ ભવેત્ ।
તત્ર જ્ઞાનં વિશેષેણ ભવત્યત્ર ન સંશયઃ ॥ ૩૪॥

કર્માર્હો નરદેહોઽયં તત્ર યોગો ન સાધિતઃ ।
પતિષ્યતિ પુનઃ સોઽપિ નાનાયોનિષુ માનદ ॥ ૩૫॥

દ્વન્દ્વભાવમયં દુઃખં યત્ર તત્ર ચ વિન્દતિ ।
ન શાશ્વતસ્વરૂપં સ બ્રહ્મ ભુઙ્ક્તે નરઃ કદા ॥ ૩૬॥

ત્વમપિ જ્ઞાનયુક્તઃ સન્ કિં કરોષિ મહામતે ।
તારયસ્વ સ્વમાત્માનં યોગેન નરસત્તમ ॥ ૩૭॥

નારદસ્ય વચઃ શ્રુત્વા તં જગાદ નરાધિપઃ ।
સત્યમુક્તં ત્વયા યોગિન્ મયા તચ્ચૈવ સન્ધૃતમ્ ॥ ૩૮॥

અહં વિષયદોષેણ પીડિતોઽતિતરાં પ્રભો ।
નિર્વેદં મે મનઃ પ્રાપ્તં જ્ઞાનં બ્રૂહિ મહામુને ॥ ૩૯॥

નારદ ઉવાચ ।
ગણેશં ભજ ભાવેન તતઃ ક્ષેમં ભવિષ્યતિ ।
એકાક્ષરવિધાનેન સર્વેભ્યશ્ચ પરાત્પરમ્ ॥ ૪૦॥

હૃદિ બુદ્ધિપ્રદાતારં બહિઃ સિદ્ધિપ્રદં પરમ્ ।
યોગાકારં ચ સર્વત્ર સંસ્થિતં બ્રહ્મનાયકમ્ ॥ ૪૧॥

ચિત્તં ત્યક્ત્વા મહારાજ ભવ ચિન્તામણિઃ સ્વયમ્ ।
એવમુક્ત્વા ચ તસ્મૈ સ દદાવેકાક્ષરં મનુમ્ ॥ ૪૨॥

તતસ્તેનાભ્યનુજ્ઞાતો નારદઃ પ્રજગામ હ ।
સોઽપિ તામુર્વશીં ત્યક્ત્વા ધ્યાનસંસ્થો બભૂવ હ ॥ ૪૩॥

કાલેન સ્વલ્પભાવેન ગાણપત્યો બભૂવ હ ।

તતઃ સ નિન્દયામાસ સ્વાત્માનં ભૃશદુઃખિતઃ ॥ ૪૪॥

(Page ખં. ૩ અ. ૩૦ પાન ૬૩)
અહો મયાઽતિમૂર્ખેણ કૃતં કર્મ વિશેષતઃ ।
ભોગદં મોહિતેનૈવ સ્ત્રીકામેન ન સંશયઃ ॥ ૪૫॥

અસ્થિમાંસમયો દેહસ્તત્ર દુર્ગન્ધસંયુતઃ ।
છિદ્રં મૂત્રગૃહં નીચં તત્ર સક્તો ભવામ્યહમ્ ॥ ૪૬॥

સર્વાર્થદં મનુષ્યાણાં દેહં પ્રાપ્ય મયા સદા ।
નરકાધિપ્રદં કર્મ કૃતં વૈ નાત્ર સંશયઃ ॥ ૪૭॥

નરદેહમવાપ્યૈવ મદ્વિના કો ભવેચ્છઠઃ ।
સ્ત્રીસંસક્તો વિશેષેણ ત્યક્ત્વા ગણપતિં નરઃ ॥ ૪૮॥

એવં ખેદસમાયુક્તો બભૂવ નૃપસત્તમઃ ।
અભજત્તં સ્વભાવેન ગણેશં સર્વસિદ્ધિદમ્ ॥ ૪૯॥

અન્તે જગામ યોગેન ગણેશં સ પુરૂરવાઃ ।
મહિમા કથિતસ્તસ્ય પાપનાશકરો યતઃ ॥ ૫૦॥

પુરૂરવસ આખ્યાનં યઃ શૃણોતિ નરોત્તમઃ ।
પાપક્ષયકરં તસ્ય ભવતીદં પ્રજાપતે ॥ ૫૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે પુરૂરવસશ્ચરિતકથનં નામૈકોનત્રિંશોઽધ્યાયઃ ॥ ૩.૨૯

## ૩.૩૦ નહુષચરિતં નામ ત્રિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
આયુષસ્તનયા દક્ષ પઞ્ચાઽઽસન્ દૃઢવિક્રમાઃ ।
સ્વર્ભાનુતનયાયાં વૈ પ્રભાયાં તેજસા યુતાઃ ॥ ૧॥

નહુષઃ પ્રથમસ્તેષાં શક્રતુલ્યપરાક્રમઃ ।
ચકાર શતયજ્ઞાંશ્ચ રાજ્ઞઃ સર્વાન્ વિજિત્ય યઃ ॥ ૨॥

તત્રેન્દ્રઃ ક્ષુભિતોઽત્યન્તં નિરાકર્તું શશાક ન ।
રાજાનં સર્વશાસ્ત્રજ્ઞં તતઃ શાન્તો બભૂવ હ ॥ ૩॥

ગૌતમેન મહેન્દ્રોઽથ શાપિતસ્ત્રીપ્રધર્ષણાત્ ।
ભ્રષ્ટરાજ્યોઽભવદ્દેવસ્તતો દેવા ભયાતુરાઃ ॥ ૪॥

દૈત્યાનાં વેગમુગ્રં તે સહને ન ક્ષમાસ્તતઃ ।
બૃહસ્પતિં સમાગમ્ય પપ્રચ્છુઃ ક્ષેમકારકમ્ ॥ ૫॥

તેનાજ્ઞપ્તાસ્તતો દેવા મુનયશ્ચ પ્રજાપતે ।
નહુષં સ્વર્ગરાજં તં ચક્રુસ્તેજસ્વિનાં વરમ્ ॥ ૬॥

દેવેન્દ્રો નહુષો ભૂત્વા શશાસ સ્વર્ગમણ્ડલમ્ ।
ઇન્દ્રાસને સમાસીનઃ પાલયામાસ તાન્ સુરાન્ ॥ ૭॥

તસ્મૈ વરં દદૌ દેવા મુનયસ્તે પ્રજાપતે ।
ક્રોધેન યસ્ત્વયા દૃશ્યઃ સત્તાહીનો ભવેત્ સદા ॥ ૮॥

તતોઽતિતેજસા યુક્તો બભૂવ સ નરાધિપઃ ।
દેવાદિભિઃ સદા દક્ષ સેવિતો નહુષઃ કિલ ॥ ૯॥

તતોઽતિગર્વિતો રાજાઽભવત્ સ્ત્રીસઙ્ગલાલસઃ ।
શચીં દેવૈશ્ચ નિર્લજ્જ આહ્વયામાસ દુર્મતિઃ ॥ ૧૦॥

દેવાનુવાચ સા દેવી નાહં યામિ નરાધિપમ્ ।
ઇન્દ્રસ્ય દેવમુખ્યસ્ય પત્ન્યહં પુરુષં પરમ્ ॥ ૧૧॥

એવમુક્ત્વા તતો દેવાન્ યયૌ ગેહં બૃહસ્પતેઃ ।
નનામ તં મહાભાગા સ્નુષાં રક્ષેતિ સાઽબ્રવીત્ ॥ ૧૨॥

તસ્યા વૃત્તાન્તમુગ્રં સ શ્રુત્વા દેવગુરુઃ સ્વયમ્ ।
નિકટે તાં સમાસ્થાપ્ય ઇન્દ્રાર્થં હ્યુદ્યતોઽભવત્ ॥ ૧૩॥

ગૌતમં સહસાઽઽગત્ય તમુવાચ મહામુનિમ્ ।
શાપહીનં મહેન્દ્રં ત્વં કુરુષ્વ વચનાચ્ચ મે ॥ ૧૪॥

(Page ખં. ૨ અ. ૩૦ પાન ૬૪)
તમુવાચ મહાયોગી ગૌતમઃ કિં કરોમ્યહમ્ ।
ઉપાયં વદ મે તાત તં કરિષ્યે જવાદહમ્ ॥ ૧૫॥

ગૌતમાય તતસ્તેન કથિતં સુખદં પરમ્ ।
વિનાયકસ્ય મન્ત્રં ત્વં દેહીન્દ્રાય મહામુને ॥ ૧૬॥

ગૌતમેન તદા દત્તઃ સ્વમન્ત્રો ગણપસ્ય ચ ।

ઇન્દ્રાય સ તતસ્તેનાઽભવચ્છક્રશ્ચ નીરુજઃ ॥ ૧૭॥

જજાપ મન્ત્રરાજં તં શક્રો ગણપતેસ્તતઃ ।
ધ્યાત્વા તં દેવદેવેશં તતાપ તપ ઉત્તમમ્ ॥ ૧૮॥

વિદર્ભે નિર્જને દેવો વને વાય્વશનઃ સ્વયમ્ ।
નાસાગ્રન્યસ્તદૃષ્ટિઃ સ પૂજયામાસ વિઘ્નપમ્ ॥ ૧૯॥

ગતે વર્ષસહસ્રે વૈ તં યયૌ ભક્તવત્સલઃ ।
ગણેશાનો વરં દાતું તપસા તોષિતો ભૃશમ્ ॥ ૨૦॥

સિંહારૂઢો મહાબાહુશ્ચતુર્ભુજવિરાજિતઃ ।
સિદ્ધિબુદ્ધિયુતશ્ચૈવ નાભિશેષધરઃ પ્રભુઃ ॥ ૨૧॥

ઇન્દ્રં સ બોધયામાસ વરં બ્રૂહિ હૃદીપ્સિતમ્ ।
મઘવંસ્તે પ્રસન્નોઽહં દાસ્યામિ તપસાઽધુના ॥ ૨૨॥

તતસ્તં પ્રણનામાઽથ ઇન્દ્રો ભક્તિસમન્વિતઃ ।
તુષ્ટાવ સુસ્થિરો ભૂત્વા યથામતિ ગજાનનમ્ ॥ ૨૩॥

ઇન્દ્ર ઉવાચ ।
નમસ્તેઽસ્તુ ગણાધ્યક્ષ ભક્તેભ્યઃ સિદ્ધિદાયક ।
વિનાયકાય દેવાય હેરમ્બાય નમો નમઃ ॥ ૨૪॥

અનાદયે ચ સર્વેષામાદિભૂતાય તે નમઃ ।
આદિપૂજ્યાય વિઘ્નેશ સર્વપૂજ્યાય વૈ નમઃ ॥ ૨૫॥

આદિમધ્યાન્તહીનાય હ્યાદિમધ્યમયાય ચ ।
અન્ત્યરૂપાય દેવેશ વિઘ્નહર્ત્રે નમો નમઃ ॥ ૨૬॥

પાશાઙ્કુશધરાયૈવ સિંહવાહાય તે નમઃ ।
અમેયાય નમસ્તુભ્યં નાનામાયાધરાય ચ ॥ ૨૭॥

વિઘ્નકર્ત્રે હ્યભક્તાનાં સદા સ્વાનન્દવાસિને ।
સિદ્ધિબુદ્ધિપતે તુભ્યં નાભિશેષાય તે નમઃ ॥ ૨૮॥

બ્રહ્મણે બ્રહ્મરૂપાય બ્રહ્મદાત્રે કૃપાલવે ।
ધર્માર્થકામમોક્ષાણાં દાત્રે તે વૈ નમો નમઃ ॥ ૨૯॥

પૂર્ણાય પૂર્ણભાવજ્ઞ પૂર્ણાનન્દપ્રદાય વૈ ।
કર્ત્રે હર્ત્રે ચ પાત્રે તે ગણેશાય નમો નમઃ ॥ ૩૦॥

સૂક્ષ્મેષુ સૂક્ષ્મરૂપાય સ્થૂલેષુ સ્થૂલભોગિને ।
સ્થૂલસૂક્ષ્માદિહીનાય લમ્બોદર નમોઽસ્તુ તે ॥ ૩૧॥

કિં સ્તૌમિ ત્વાં સદા શાન્તિરૂપં તસ્માન્નમો નમઃ ।
તેન તુષ્ટો ભવ સ્વામિન્ દયાકારાય તે નમઃ ॥ ૩૨॥

મુદ્ગલ ઉવાચ ।
એવં સ્તુતિં સમાકર્ણ્ય મઘવન્તમુવાચ હ ।
ગણેશો ભક્તિભાવેન સન્તુષ્ટો ભક્તમુત્તમમ્ ॥ ૩૩॥

ગણેશ ઉવાચ ।
ઇન્દ્ર ત્વયા કૃતં સ્તોત્રં ભુક્તિમુક્તિપ્રદં ભવેત્ ।
યઃ પઠેચ્છૃણુયાચ્ચૈધસ્તસ્મૈ સર્વાર્થદં તથા ॥ ૩૪॥

નિત્યં ત્વમપિ દેવેન્દ્ર પઠ સ્તોત્રં પ્રયત્નતઃ ।
તેન વિઘ્નવિહીનસ્તુ ભવિષ્યસિ મહામતે ॥ ૩૫॥

વરાન્ બ્રૂહિ મહાભાગ યે તે ચિત્તે ભવન્તિ વૈ ।
તાન્ દાસ્યામિ ન સન્દેહો ભક્ત્યા સ્તોત્રેણ તોષિતઃ ॥ ૩૬॥

તતસ્તં મઘવા દેવં પ્રણમ્યાભિદધે વચઃ ।
નિર્વિઘ્નં કુરુ માં દેવ સ્વપદસ્થં તથા પ્રભો ॥ ૩૭॥

ભક્તિં ત્વદીયપાદે મે દેહિ નાથ નમોઽસ્તુ તે ।
ઇદં ક્ષેત્રં સુવિખ્યાતં ગાણપત્યં તથા કુરુ ॥ ૩૮॥

તીર્થં ચ સર્વદં સ્વામિન્ કુરુ તે પાદલાઞ્છિતમ્ ।
સ્વાનન્દદાયકં સ્નાનમાત્રેણાત્ર ન સંશયઃ ॥ ૩૯॥

પુરે કદમ્બનામ્ન્યેવ ગાણેશં ચિન્તિતાર્થદમ્ ।
(Page ખં. ૩ અ. ૩૦ પાન ૬૫)
લોકે ભવતુ વિખ્યાતં પ્રસાદાત્તે ચ વિઘ્નપ ॥ ૪૦॥

તથેતિ તમુવાચાઽથ ગણેશોંઽતર્દધે તતઃ ।
ઇન્દ્રેણ ગણનાથસ્ય મૂર્તિઃ સંસ્થાપિતા દ્વિજૈઃ ॥ ૪૧॥

તં પૂજયિત્વા દેવેન્દ્રઃ સંસ્થિતસ્તત્ર માનદ ।
નિત્યં ધ્યાનપરો ભૂત્વાઽભજત્તં ગણનાયકમ્ ॥ ૪૨॥

અધુના શ‍ૃણુ ભો દક્ષ નહુષસ્ય પ્રચેષ્ટિતમ્ ।
ગણેશેન તદા રાજા વિઘ્નયુક્તઃ કૃતઃ ખલઃ ॥ ૪૩॥

બૃહસ્પતિમુવાચાઽથ મૃત ઇન્દ્રો ન સંશયઃ ।
ન દૃશ્યતે જનૈઃ કુત્ર શચીં મે દેહિ ભો ગુરો ॥ ૪૪॥

તતસ્તં વાક્પતિર્દેવોઽવદત્ ક્રોધસમન્વિતઃ ।
દ્વિજવાહનગો ભૂત્વા શચીં યાહિ નરાધિપ ॥ ૪૫॥

નાનાવાહેષુ સા દેવી દેવેન્દ્રેણ પ્રલાલિતા ।
અપૂર્વં વાહનં ચૈવેચ્છતિ તસ્માત્તથા કરુ ॥ ૪૬॥

તથેતિ મદયુક્તઃ સ ચકાર નહુષસ્તતઃ ।
વિમાનવાહાન્ સઙ્ગૃહ્ય દુરાત્મા બ્રાહ્મણાન્ બલાત્ ॥ ૪૭॥

તતો દુઃખં દ્વિજાનાં સ જ્ઞાત્વાઽત્રેયઃ સમાયયૌ ।
દુર્વાસાસ્તં પ્રગૃહ્યૈવ વાહકં સ ચકાર હ ॥ ૪૮॥

તતોઽતિવેગભાવાર્થં સર્પધ્વં બ્રાહ્મણાન્નૃપઃ ।
ઉવાચ શિબિકાયાં સ સંસ્થિતો મોહસંયુતઃ ॥ ૪૯॥

દુર્વાસાઃ કુપિતોઽત્યન્તં દદૌ શાપં સુદારુણમ્ ।
સર્પો ભવ મહાદુષ્ટ પત ભૂમૌ નૃપાધમ ॥ ૫૦॥

તતસ્તં પ્રણનામાઽથ ગતગર્વો મહીપતિઃ ।
ઉચ્છાપં વદ મે બ્રહ્મન્ દયયા ત્વં દયાનિધે ॥ ૫૧॥

ધિઙ્ માં બ્રાહ્મણભાવેષુ વિપરીતં પ્રવર્તિનમ્ ।
મોહેન મોહિતં પૂર્ણં તારયસ્વ મહામુને ॥ ૫૨॥

તતસ્તાપસમાયુક્તં નહુષં મુનિસત્તમઃ ।
દુર્વાસાઃ પ્રત્યુવાચેદં વચનં દયયા યુતઃ ॥ ૫૩॥

દુર્વાસા ઉવાચ ।
તવ વંશે મહારાજ ધર્મઃ સાક્ષાદ્ભવિષ્યતિ ।
યુધિષ્ઠિરસ્તદા તસ્ય દર્શનં તે ભવિષ્યતિ ॥ ૫૪॥

તેન સઙ્કથિતં જ્ઞાનં જ્ઞાત્વા શાપવિવર્જિતઃ ।
ભવિષ્યસિ ન સન્દેહોઽધુના ગચ્છ મહીતલમ્ ॥ ૫૫॥

દ્વિજાઃ પૂજ્યાઃ સદા રાજન્નૃપૈર્નાન્યે કદાચન ।

ત્વયાઽવમાનિતા વિપ્રા વાહકાસ્તે કૃતા બલાત્ ॥ ૫૬॥

તેનાઽતિધર્મલોપો વૈ જાતસ્તે નાત્ર સંશયઃ ।
પુનર્ધર્મં નિરીક્ષ્ય ત્વં ધર્મયુક્તો ભવિષ્યસિ ॥ ૫૭॥

એવમુક્ત્વા સ દુર્વાસા ગતઃ સ્વેચ્છાપરાયણઃ ।
નહુષઃ સર્પરૂપોઽભૂત્ પપાત ધરણીતલે ॥ ૫૮॥

તત ઇન્દ્રં સમાનીય સામરશ્ચ બૃહસ્પતિઃ ।
ઇન્દ્રાસને સમાસ્થાપ્ય મુદિતઃ સ બભૂવ હ ॥ ૫૯॥

નહુષો વનમધ્યે સ ચચાર ગણપં સ્મરન્ ।
અહો વિઘ્નયુતં સર્વં જગત્ સ્થાવરજઙ્ગમમ્ ॥ ૬૦॥

અહં વિઘ્નેન સંયુક્તઃ કૃતો વિઘ્નેશરૂપિણા ।
અતસ્તં શરણં યામિ તેન સર્વં શુભં ભવેત્ ॥ ૬૧॥

તતઃ ક્રમેણ તેનાઽપિ જિતં ચિત્તં પ્રજાપતે ।
સર્પદેહગતેનૈવ ગાણપત્યસ્વભાવતઃ ॥ ૬૨॥

તતો બહૌ ગતે કાલે વનમાયાદ્ યુધિષ્ઠિરઃ ।
દ્રૌપદ્યાઃ ભ્રાતૃભિઃ સાર્દ્ધં દ્યૂતદોષેણ નિશ્ચિતમ્ ॥ ૬૩॥

તતો ભીમો વને તત્ર ચચાર ફલકામ્યયા ।
નહુષેણ સમાદૃષ્ટો બદ્ધો જ્ઞાત્વા સ પાણ્ડવઃ ॥ ૬૪॥

સ્વદેહેનાવૃતં ભીમં કૃત્વા નાગસ્વરૂપધૃક્ ।
પાતયામાસ ભૂમૌ તં બલેન બલવાન્નૃપઃ ॥ ૬૫॥

ભીમેન તત્ર નાદશ્ચ કૃતો મેઘસમો મહાન્ ।
(Page ખં. ૩ અ. ૩૦ પાન ૬૬)
તં શ્રુત્વા ધર્મરાજઃ સ યયૌ ભીમં મહાબલમ્ ॥ ૬૬॥

સર્પેણ વેષ્ટિતં ભીમં દૃષ્ટ્વા દુઃખસમન્વિતમ્ ।
યુધિષ્ઠિરં સ તં તત્રોવાચ નાગો મહાબલઃ ॥ ૬૭॥

નાગ ઉવાચ ।
અહં નહુષનામા તે નૃપઃ પુત્ર ન સંશયઃ ।
દર્શનાર્થં મયા ચાઽયં ભીમઃ સઞ્જગૃહેઽધુના ॥ ૬૮॥

અહં પૃચ્છામિ રાજંસ્ત્વાં તદ્વદસ્વ યથાતથમ્ ।

તદા ભીમં પ્રમોક્ષ્યામિ સર્વજ્ઞાસ્ત્વં મતો યતઃ ॥ ૬૯॥

નહુષસ્ય વચઃ શ્રુત્વા હર્ષિતઃ સ યુધિષ્ઠિરઃ ।
તમુવાચ મહાભાગં સ્વવંશવરભૂષણમ્ ॥ ૭૦॥

યુધિષ્ઠિર ઉવાચ ।
વદ નાગ મહાભાગ માન્યોઽસિ ત્વં મહામતે ।
સંશયં છેદયિષ્યામિ પ્રસાદાત્તવ માનદ ॥ ૭૧॥

નહુષ ઉવાચ ।
કિં સત્યં કિં તથા રાજન્નનૃતં ધર્મમુત્તમમ્ ।
પાપં બન્ધં ચ મોક્ષં કિં યોગં ધ્યાનં વદસ્વ ચ ॥ ૭૨॥

કિં કર્મ કિમકર્મ ત્વં કિં વિકર્મ સ્મૃતં ભવેત્ ।
કિં જ્ઞાનં કિં તપોમૂલં દૈવતં કિં વદસ્વ મે ॥ ૭૩॥

કિં સારં કિમસારં ચ કિં માન્યં ચ તથા નૃપ ।
અવમાન્યં ચ સર્વેશં કિં વદસ્વ યુધિષ્ઠિર ॥ ૭૪॥

એતાન્ વૈ વદ મે વત્સ તદા ભીમં મહામતે ।
મોચયિષ્યામિ વેગેન ગમિષ્યામિ યથેચ્છયા ॥ ૭૫॥

યુધિષ્ઠિર ઉવાચ ।
સત્યં બ્રહ્મ ચ વિજ્ઞેયં જગદ્વૈ હ્યનૃતાત્મકમ્ ।
ધર્મઃ સ્વધર્મરૂપશ્ચ જાનીયા રાજસત્તમ ॥ ૭૬॥

સ્વધર્મહીનં રૂપં યત્ પાપં સર્વૈઃ પ્રકીર્તિતમ્ ।
અહં મમાત્મકો બન્ધો મોક્ષસ્તાભ્યાં વિવર્જિતઃ ॥ ૭૭॥

યોગશ્ચિત્તસ્ય રોધો વૈ ધ્યાનં નિર્વિષયં મનઃ ।
કર્મ સત્કર્મરૂપં વૈ જ્ઞાતવ્યં વિબુધૈઃ સદા ॥ ૭૮॥

બ્રહ્માર્પણાત્મકં સર્વમકર્મ કથિતં કિલ ।
વિકર્મ પાપાચરણં સર્વશાસ્ત્રૈઃ પ્રકાશિતમ્ ॥ ૭૯॥

જ્ઞાનં બ્રહ્માહમિત્યુક્તં તપો દ્વન્દ્વસમાત્મકમ્ ।
દૈવતં સર્વપૂજ્યં વૈ ગાણેશં વિદ્ધિ માનદ ॥ ૮૦॥

દેવસ્ય ભજનં સારં નવધા સતતં નૃપ ।
અસારં વિષયાણાં વૈ ભજનં નવધા સ્મૃતમ્ ॥ ૮૧॥

માન્યં સઙ્કથિતં વેદૈઃ પુરાણૈઃ સ્મૃતિભિર્ભવેત્ ।
વેદાધારવિહીનં યદવમાન્યં મનીષિભિઃ ॥ ૮૨॥

સર્વેશં હૃદિ સંસ્થં વૈ વિદ્ધિ બુદ્ધિપ્રચાલકમ્ ।
સર્વં તે કથિતં સ્વામિન્ મોચયસ્વાઽનિલાત્મજમ્ ॥ ૮૩॥

એતસ્મિન્નન્તરે તત્ર વિમાનં સહસાઽઽગતમ્ ।
દિવ્યભોગસમાયુક્તં તદ્દર્શ યુધિષ્ઠિરઃ ॥ ૮૪॥

મુમોચ નહુષો ભીમં તં તદા બન્ધનાત્ પ્રભો ।
દેહં ત્યક્ત્વા વિમાનસ્થો યયૌ સ્વર્ગં નરાધિપઃ ॥ ૮૫॥

તત્રેન્દ્રસ્ય સમીપે સોઽભવદર્ધાસનસ્થિતઃ ।
ગણેશમભજન્નિત્યં સ નૃપોઽનન્યચેતસા ॥ ૮૬॥

સ્વર્ગાન્તે સ ગતો ભૂપઃ શુક્લગત્યા ગજાનનમ્ ।
વિઘ્નહીનઃ સ્વભાવેન પુણ્યશ્લોકો બભૂવ હ ॥ ૮૭॥

નહુષસ્ય ચરિત્રં તે કથિતં પાપનાશનમ્ ।
શ‍ૃણુયાદ્વા પઠેદ્વાઽપિ તસ્મૈ કામપ્રદં ભવત્ ॥ ૮૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે નહુષચરિતં નામ ત્રિંશત્તમોઽધ્યાયઃ ॥ ૩.૩૦
(Page ખં. ૩ અ. ૩૧ પાન ૬૭)

## ૩.૩૧ યયાતિચરિતં નામૈકત્રિંશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
નહુષસ્યાભવન્ પુત્રાઃ પઞ્ચ દેવસમા ધિયા ।
યમ્યાતિશ્ચ યયાતિશ્ચ તથા સંયાતિરાયતિઃ ॥ ૧॥

પઞ્ચમશ્ચાશ્વકો નામ યયાતિર્ભૂમિપોઽભવત્ ।
માહાત્મ્યં તસ્ય મુખ્યં તે કથયામિ પ્રજાપતે ॥ ૨॥

દેવયાનીમુશનસઃ સ તાં ભાર્યામવાપ હ ।
વૃષપર્વસુતાં ચૈવ શર્મિષ્ઠાં રાજસત્તમઃ ॥ ૩॥

યદું ચ તુર્વસં ચૈવ દેવયાની વ્યજીજનત્ ।

દ્રુહ્યં તદ્વદનું પૂરું શર્મિષ્ઠાં વાર્ષપર્વણી ॥ ૪॥

સોઽભ્યષિઞ્ચદતિક્રમ્ય જ્યેષ્ઠાન્ પુત્રાન્ મહામતિઃ ।
પૂરું કનિષ્ઠમેવં ચ પિતુર્વાક્યપરાયણમ્ ॥ ૫॥

દક્ષ ઉવાચ ।
કિમર્થં તેન ભૂપેન વિપરીતં કૃતં પ્રભો ।
તત્ સર્વં વદ યોગીન્દ્ર સાદરેણ શ‍ૃણોમ્યહમ્ ॥ ૬॥

મુદ્ગલ ઉવાચ ।
વૃષપર્વા પ્રજાનાથ દૈત્યાનામધિપઃ સ્મૃતઃ ।
તસ્ય પુત્રી મહાભાગા શર્મિષ્ઠા માનિતાઽભવત્ ॥ ૭॥

તત્ર શુક્રસ્ય પુત્રી યા દેવયાની પ્રકીર્તિતા ।
સાઽપિ પિત્રા સ્વવાત્સલ્યાત્ સ્થાપિતા લાલિતા ભૃશમ્ ॥ ૮॥

સખીભિરેકદા બાલા સંવૃતા રાજકન્યકા ।
શર્મિષ્ઠા વાટિકાયાં સા હર્ષયુક્તા જગામ હ ॥ ૯॥

દેવયાની તથા તત્ર ક્રીડાર્થં સા સમાગતા ।
તત્ર નાનાવિધાં ક્રીડાં ચક્રિરે કન્યકાઃ પ્રભો ॥ ૧૦॥

તતસ્તાઃ શ્રમસંયુક્તા જગ્મુઃ સ્નાનાર્થમાદરાત્ ।
તીરે ક્ષિપ્ત્વા સ્વવસ્ત્રાણિ ચિક્રીડુર્જલમધ્યગાઃ ॥ ૧૧॥

તતઃ સખીભિર્યુક્તા સા શર્મિષ્ઠા નિઃસૃતા પુરઃ ।
સમ્ભ્રમેણ તયા વસ્ત્રં દેવયાન્યા ધૃતં કિલ ॥ ૧૨॥

નિઃસૃતા દેવયાની વૈ દૃષ્ટ્વા કર્મ જુગુપ્સિતમ્ ।
રાજપુત્રીમુવાચાઽથ ભર્ત્સયન્તી પ્રજાપતે ॥ ૧૩॥

બ્રાહ્મણસ્ય મહાદુષ્ટે પુત્ર્યહં કિં ધૃતાનિ વૈ ।
વસ્ત્રાણિ મે યથા પાકસ્પર્શને ચ શુની ખલે ॥ ૧૪॥

દ્વારપા લોમતઃ શાસ્ત્રે બ્રાહ્મણાનાં વિશેષતઃ ।
રાજન્યસ્તસ્ય પુત્રી ત્વં ન યોગ્યાઽસિ કદાચન ॥ ૧૫॥

એવં નાનાવિધૈર્વાક્યૈર્દેવયાની ચ તાં પ્રભો ।
ભર્ત્સયામાસ સોવાચ કુપિતા તાં પુનર્વચઃ ॥ ૧૬॥

શર્મિષ્ઠોવાચ ।

કિમાત્માનં ચ દુષ્ટે ત્વં કથ્યસે મમ સન્નિધૌ ।
રાજપ્રસાદસંસર્ગાદ્બ્રાહ્મણા માનિતા બભુઃ ॥ ૧૭॥

અસ્મદીયપ્રસાદેન વસ્ત્રાન્નાદિકમાદરાત્ ।
ભુક્ત્વા માં સ્પર્શસે દુષ્ટે બલિભુગ્વાયસી યથા ॥ ૧૮॥

એવં નાનાવિધૈર્વાક્યૈસ્તાં નિર્ભર્ત્સ્ય પ્રજાપતે ।
સખીભિર્દેવયાનીં સા કૂપે ચિક્ષેપ ચાસુરી ॥ ૧૯॥

તતઃ સા સ્વગૃહે ક્રુદ્ધા પ્રયયૌ દુઃખિતા ભૃશમ્ ।
દેવયાની તથા કૂપે સંસ્થિતા જલવર્જિતે ॥ ૨૦॥

દૈવયોગેન તત્રાઽસૌ યયાતિઃ સ જગામ હ ।
એકાકી મૃગયાસક્તઃ કૂપસ્થાં તાં દદર્શ હ ॥ ૨૧॥

તતોઽતિકરુણાયુક્તો હસ્તં દત્વા સ્વદક્ષિણમ્ ।
દેવયાનીં દધારાઽસૌ તયા હસ્તો ધૃતસ્તથા ॥ ૨૨॥

બહિર્નિષ્કાસ્ય રાજા સોઽભવદ્ગન્તું સમુદ્યતઃ ।
તતસ્તં દેવયાની સોવાચ હર્ષસમન્વિતા ॥ ૨૩॥

દેવયાન્યુવાચ ।
પાણેસ્ત્વયા મે ગ્રહણં કૃતં સૌમ્ય મહામતે ।
કોઽસિ ત્વં વદ માં સર્વં વૃત્તાન્તં તે યથાયથમ્ ॥ ૨૪॥

તામુવાચ મહીપાલઃ શ‍ૃણુ ત્વં વરવર્ણિનિ ।
યયાતિં વિદ્ધિ માં દેવિ નાહુષં ક્ષત્રવંશજમ્ ॥ ૨૫॥

મૃગયાઽઽસક્તભાવેન પ્રાપ્તં તે દર્શનં મહત્ ।
ગચ્છ ત્વં સ્વગૃહે બાલે ગમિષ્યામિ સ્વમાલયમ્ ॥ ૨૬॥

તમુવાચ પ્રજાનાથં દેવયાની પ્રહર્ષિતા ।
કાવ્યપુત્રીં ચ માં વિદ્ધિ ભવ ત્વં મે પતિઃ પ્રભો ॥ ૨૭॥

હસ્તસ્ય ગ્રહણં તે વૈ વિશેષેણ કૃતં મયા ।
ત્વદૃતે ન વૃણોમ્યન્યમતસ્ત્વં મે પતિર્ભવ ॥ ૨૮॥

તસ્યાસ્તદ્વચનં શ્રુત્વા યયાતિસ્તામુવાચ હ ।
કાવ્યકન્યાં કથં દેવિ વૃણોમિ ક્ષત્રવંશજઃ ॥ ૨૯॥

તતઃ સોવાચ તં દેવયાની શ‍ૃણુ વચો મહત્ ।

બ્રાહ્મણો મે ન ભર્તા ચ ભવિતા કચશાપતઃ ॥ ૩૦॥

અતસ્ત્વં ભયહીનઃ સન્ વૃણુ માં રાજસત્તમ ।
કાવ્યં સમ્બોધયિત્વાઽહં પત્ની તે પ્રભવામિ ચ ॥ ૩૧॥

તથેતિ નૃપવર્યોઽસૌ તાં જગાદ તથા યયૌ ।
નગરં સ મહાભાગઃ સા ચ તત્ર સ્થિતાઽભવત્ ॥ ૩૨॥

તત્રાઽઽગતં નરં કશ્ચિત્તમુવાચ વદ પ્રભુમ્ ।
કાવ્યમત્ર સ્થિતા પુત્રી દેવયાની મહામતે ॥ ૩૩॥

તતસ્તેન મુનીન્દ્રોઽસૌ બોધિતઃ શ‌ૃણુ મે વચઃ ।
વને તે દેવયાની સા પુત્રી વત્સલ સંસ્થિતા ॥ ૩૪॥

શુક્રસ્તાં પ્રયયૌ શીઘ્રં તમુવાચ સુવિહ્વલા ।
રુદતી દેવયાની સા વૃત્તાન્તં સર્વમઞ્જસા ॥ ૩૫॥

તં શ્રુત્વા કુપિતઃ કાવ્યસ્ત્યક્ત્વા દૈત્યં સ નિર્યયૌ ।
વનવાસાર્થમાનન્દાદૂહયન્ વૃત્તિમુલ્બણામ્ ॥ ૩૬॥

તતો દૈત્યાધિપઃ શ્રુત્વા વૃત્તાન્તં વિહ્વલો ભૃશમ્ ।
તં યયૌ ધાવમાનઃ સ પ્રણનામ મહામુનિમ્ ॥ ૩૭॥

ઉવાચ ભક્તિસંયુક્તં વચનં દૈત્યનાયકઃ ।
ત્વદાધારમિદં રાજ્યં દેહોઽયં મે તથા મુને ॥ ૩૮॥

મુનિસત્તમ માં ત્યક્ત્વા કુત્ર ગન્તું ત્વમિચ્છસિ ।
રાજ્યાદિકં પરિત્યજ્ય યામ્યહં તે પ્રસન્નિધૌ ॥ ૩૯॥

તસ્ય તદ્વચનં શ્રુત્વા કાવ્યઃ પુત્રીમુવાચ હ ।
ચલ ત્વં રાજકન્યાયા અપરાધં ક્ષમસ્વ ચ ॥ ૪૦॥

દેવયાની મુનિં તત્રોવાચ ક્રોધસમન્વિતા ।
નાઽહં યામિ પિતઃ પુર્યાં દેહત્યાગં કરોમિ વૈ ॥ ૪૧॥

તતઃ પુત્રીં સ્વયં કાવ્ય ઊચે તાં શોકસઙ્કુલઃ ।
કિમિચ્છસિ વદ ત્વં મ ઉપાયં તં કરોમ્યહમ્ ॥ ૪૨॥

તતસ્તં દેવયાની સોવાચ ક્રોધસમન્વિતા ।
સખીભિઃ સહિતા દાસી શર્મિષ્ઠા મે ભવેદ્યદિ ॥ ૪૩॥

યત્ર દાસ્યસિ માં તાત તત્રેયં સહગા ભવેત્ ।
તદાહં નગરે યામિ હૃષ્ટા દૈત્યાધિપસ્ય ચ ॥ ૪૪॥

ઉવાચ કાવ્યો દૈત્યેશં તં પુત્રીવત્સલસ્તતઃ ।
તથેતિ દૈત્યરાજઃ સ ગૃહે કાવ્યં સમાનયત્ ॥ ૪૫॥

કાવ્યેન નાહુષાયૈવ દત્તા પુત્રી વિધાનતઃ ।
તત્ર દાસી સ્વભાવેન શર્મિષ્ઠા પ્રયયૌ વિધે ॥ ૪૬॥

કદાચિત્તત્ર શર્મિષ્ઠાઽભવદૃતુયુતા સ્વયમ્ ।
રાજાનં વાટિકામધ્યે ઉવાચ વિનયાન્વિતા ॥ ૪૭॥

સખ્યા મે દેવયાન્યા ત્વં મહીપાલ વૃતો યદા ।
પતિસ્તદા મયા નાથ ત્વમેવ મનસા વૃતઃ ॥ ૪૮॥

ઋતુયુક્તાં સ્ત્રિયં સ્વામિન્ ભજ ત્વં ભક્તિસંયુતામ્ ।
તથેતિ નાહુષેણૈવ વૃતા સા ગુપ્તભાવતઃ ॥ ૪૯॥

દેવયાન્યા ચરિત્રં ન તસ્યા જ્ઞાતં પ્રજાપતે ।
(Page  ખં. ૩ અ. ૩૧ પાન ૬૯)
ગર્ભયુક્તાં વિદિત્વા તાં સા પપ્રચ્છ મુનેઃ સુતા ॥ ૫૦॥

કસ્ય વીર્યં ત્વયા દેવિ ધૃતં મે વદ ચાધુના ।
લાઞ્છનં દૈત્યરાજસ્ય પ્રાપ્તં કિં દૈવયોગતઃ ॥ ૫૧॥

શર્મિષ્ઠા તાં જગાદાઽથ ન કૃતં લાઞ્છનં મયા ।
બ્રાહ્મણસ્ય મહદ્વીર્યં ગૃહીતં ગુપ્તતઃ સખિ ॥ ૫૨॥

તસ્યાં પુત્રાઃ સમુત્પન્નાસ્ત્રયો દેવસમા બભુઃ ।
રાજ્ઞા સમ્માનિતા નિત્યં વાટિકાયાં વિશેષતઃ ॥ ૫૩॥

કદાચિદ્દેવયાની સા વાટિકાયાં જગામ હ ।
તત્ર પુત્રા યયાતિં તં પિતરં પ્રાહુરાદરાત્ ॥ ૫૪॥

તચ્છ્રુત્વા ક્ષુભિતાઽત્યન્તં દેવયાની ગૃહં યયૌ ।
પિતુસ્તાં સાન્ત્વયામાસ યયાતિર્વિનયાન્વિતઃ ॥ ૫૫॥

ન શશાક સ રાજર્ષિસ્તાં સ્વગેહે ભયાકુલઃ ।
આનેતું સા તથા કાવ્યં જગાદ રુદતી ભૃશમ્ ॥ ૫૬॥

શુક્રેણ શાપિતો રાજા જરાયુક્તો બભૂવ સઃ ।

ગત્વા ચોશનસં તત્રોવાચ શોકસમાકુલઃ ॥ ૫૭॥

નાઽહં શ્વશુર તૃપ્તોઽસ્મિ કામભોગેભ્ય એવ ચ ।
જરાઘ્નં મે વદોપાયં તં કરિષ્યામિ યત્નતઃ ॥ ૫૮॥

દેવયાનીં વિનાઽન્યાં સ્ત્રીં ન સ્પૃશામિ કદાચન ।
તતસ્તમુશનાઃ પ્રીત ઉવાચ વચનં હિતમ્ ॥ ૫૯॥

તવ પુત્રા મહાભાગ યૌવનાસ્થા ભવન્તિ યે ।
જરાં તત્ર વિનિક્ષિપ્ય ગૃહાણ નૃપ યૌવનમ્ ॥ ૬૦॥

ત્વદાજ્ઞયા જરાં પુત્રો ગ્રહીષ્યતિ કુરુષ્વ તમ્ ।
રાજાનં મુખ્યભાવં ત્વં ન દોષસ્તત્ર તે ભવેત્ ॥ ૬૧॥

તથેતિ દેવયાનીં સઙ્ગૃહ્ય સ્વનગરં યયૌ ।
જ્યેષ્ઠાન્ પુત્રાન્ યયાચે સ રાજર્ષિર્યૌવનં તતઃ ॥ ૬૨॥

ન જરાં જગૃહુસ્તસ્ય સર્વે તે મૂર્ખભાવતઃ ।
તતઃ પૂરું સ રાજર્ષિર્યયાચે સ દદૌ કિલ ॥ ૬૩॥

શુક્રસ્ય વરદાનેન દોષઃ પૂરોર્ન તસ્ય વૈ ।
ભુક્ત્વા ભોગાનનેકાન્ સ યયાતિસ્તોષિતોઽભવત્ ॥ ૬૪॥

યજ્ઞાન્ કૃત્વા મહાભાગઃ સાઙ્ગાન્ સર્વાન્ વિશેષતઃ ।
તીર્થાદીનિ જગામાઽસૌ નાનારૂપાણિ ભાવતઃ ॥ ૬૫॥

સર્વં કોશગતં દ્રવ્યં ભૂષણાદિકમાદરાત્ ।
દદૌ સ બ્રાહ્મણેભ્યશ્ચ દાનશીલોઽભવત્તથા ॥ ૬૬॥

મૃત્પાત્રૈર્ગૃહકાર્યેષુ ચરન્તં ગાલવો મુનિઃ ।
તમાયયૌ યયાચે વૈ રાજાનં ખેદસંયુતઃ ॥ ૬૭॥

ગુરોશ્ચ દક્ષિણાર્થં મે દેહ્યશ્વાન્ શ્યામકર્ણકાન્ ।
સહસ્રસઙ્ખ્યાયુક્તાંસ્ત્વં શ્રેષ્ઠઃ સકલભૂભુજામ્ ॥ ૬૮॥

માધવીં સ્વાં દદૌ તસ્મૈ તતઃ કન્યાં મહીપતિઃ ।
તયા તસ્ય મુનેઃ કાર્યં કૃતં સર્વં પ્રજાપતે ॥ ૬૯॥

તતઃ સ રાજશાર્દૂલો જરાં સઙ્ગૃહ્ય યૌવનમ્ ।
પૂરવેઽદાત્ પુનઃ સદ્યસ્તં ચકાર નરાધિપમ્ ॥ ૭૦॥

દિશિ દક્ષિણપૂર્વસ્યાં તુર્વસું પુત્રમાદિશત્ ।
દક્ષિણાપશ્ચિમાયાં સ યદું જ્યેષ્ઠં ન્યયોજયત્ ॥ ૭૧॥

પ્રતીચ્યામુત્તરાયાં સ દ્રુહ્યં ચાનુમયોઽજયત્ ।
તૈરિયં પૃથિવી સર્વા ધર્મતઃ પરિપાલિતા ॥ ૭૨॥

સર્વત્ર સાર્વભૌમેન પૂરુસ્તત્ર રરાજ ચ ।
ધર્મયુક્તો વિનીતાત્મા સત્યસન્ધઃ પ્રતાપવાન્ ॥ ૭૩॥

તતો વનં યયૌ રાજા તતાપ તપ ઉત્તમમ્ ।
અન્તે જગામ સ્વર્ગં સ નાનાભોગપ્રદં પરમ્ ॥ ૭૪॥

તત્ર સર્વાનતિક્રમ્ય બુભુજે ભોગમુત્તમમ્ ।
ન મત્સમશ્ચ સ્વર્ગેષુ પુણ્યભોગકરઃ પરઃ ॥ ૭૫॥

(Page ખં. ૩ અ. ૩૧ પાન ૭૦)
ઇતિ ગર્વેણ સંયુક્તમિન્દ્રસ્તં પ્રજગાદ સઃ ।
ત્વયા રાજન્ મહત્પુણ્યં કીદૃશં પ્રકૃતં વદ ॥ ૭૬॥

ઉવાચ નરશાર્દૂલઃ તતસ્તં મોહસંયુતઃ ।
ન સઙ્ખ્યા વિદ્યતે દેવ મમ પુણ્યસ્ય દેવપ ॥ ૭૭॥

સ્વર્ગેષુ યે સ્થિતા દેવાઃ પુણ્યકર્મકરા ઇમે ।
ન મે કલાં ચ પુણ્યસ્ય લભન્તે દેવનાયક ॥ ૭૮॥

તસ્ય તદ્વચનં શ્રુત્વા તમિન્દ્રઃ પ્રત્યુવાચ હ ।
ન જાનાસિ મહારાજ એષાં પુણ્યપ્રભાવકમ્ ॥ ૭૯॥

સર્વાનિમાંસ્તિરસ્કૃત્ય ત્વં પ્રમોહસમન્વિતઃ ।
સ્વપ્રશંસાં તથાઽપારં પુણ્યં વદસિ ચાઽદ્ય મામ્ ॥ ૮૦॥

તેન તે પુણ્યમુગ્રં તત્ સર્વં નષ્ટં નરાધિપ ।
પ્રપત ત્વં મહીપૃષ્ઠે પુનઃ પુણ્યં સમાચર ॥ ૮૧॥

તતઃ પપાત ભૂપૃષ્ઠે યયાતિર્દુઃખસંયુતઃ ।
તં પતન્તં ચ દૌહિત્રા દદૃશુઃ શિબિમુખ્યકાઃ ॥ ૮૨॥

માતામહં ચ વિજ્ઞાય દદુઃ પુણ્યં પુનઃ સ્વકમ્ ।
તેન સ્વર્ગસ્થિતો રાજા મુમુદે દેવવત્ સ્વયમ્ ॥ ૮૩॥

તતસ્તં નારદો યોગી જગાદ કરુણાયુતઃ ।

ત્વયા વિઘ્નો મહારાજ પ્રાપ્તઃ પુણ્યવિનાશકૃત્ ॥ ૮૪॥

વિઘ્નેશં ભજ રાજંસ્ત્વમન્તે સ્વાનન્દગસ્તતઃ ।
ભવિષ્યસિ ન સન્દેહો નોચેદ્ભૂમૌ પતિષ્યસિ ॥ ૮૫॥

તતસ્તેન ગણેશસ્ય મન્ત્રો દત્તો દશાક્ષરઃ ।
તં જજાપ યયાતિશ્ચ ગણેશધ્યાનતત્પરઃ ॥ ૮૬॥

પુણ્યક્ષયે સ રાજેન્દ્રઃ શુક્લગત્યા પ્રજાપતે ।
ગણેશં પ્રયયૌ ભક્ત્યા ગાણપત્યો મહાયશાઃ ॥ ૮૭॥

યયાતેશ્ચરિતં પુણ્યં સઙ્ક્ષેપેણ નિરૂપિતમ્ ।
શૃણ્વતે કામદં પૂર્ણં ભવિષ્યતિ ન સંશયઃ ॥ ૮૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે યયાતિચરિતં નામૈકત્રિંશત્તમોઽધ્યાયઃ ॥ ૩.૩૧

## ૩.૩૨ ધનકસ્ય વ્રતોપદેશો નામ દ્વાત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
યદોરપ્યભવન્ પુત્રાશ્ચત્વારો દેવસન્નિભાઃ ।
સહસ્ત્રજિત્તથા જ્યેષ્ઠસ્તસ્ય પુત્રો બભૂવ હ ॥ ૧॥

શતજિન્નામ વિખ્યાતસ્તસ્ય પુત્રાસ્ત્રયોઽભવન્ ।
હિહયશ્ચ હયશ્ચૈવ વપુર્હય ઉદાહૃતઃ ॥ ૨॥

હિહયસ્યાઽભવત્ પુત્રો ધર્મ ઇત્યભિવિશ્રુતઃ ।
તસ્ય નેત્રસ્તસ્ય કુન્તિઃ સોહઞ્જિસ્તત્સુતઃ સ્મૃતઃ ॥ ૩॥

સો હઞ્જેરભવત્ પુત્રો મહિષ્માન્નામ પાર્થિવઃ ।
માહિષ્મતી ચ નગરી વાસિતા યેન ભૂભુજા ॥ ૪॥

તસ્ય પુત્રો ભદ્રસેનો દુર્મદસ્તત્સુતઃ સ્મૃતઃ ।
ધનકશ્ચાઽપરો ધીમાન્ મુખ્યોઽભૂત્તત્ર પાર્થિવઃ ॥ ૫॥

ધનકાદભવન્ પુત્રાશ્ચત્વારો લોકવિશ્રુતાઃ ।
કૃતવીર્યઃ કૃતાગ્નિશ્ચ કૃતવર્મા તતઃ સ્મૃતઃ ॥ ૬॥

કૃતૌજાશ્ચ તથા દક્ષ તત્ર જ્યેષ્ઠઃ પ્રતાપવાન્ ।

બભૂવ દાનશીલશ્ચ કૃતવીર્યો મહીપતિઃ ॥ ૭॥

તેન વૈ પૃથિવીમધ્યે ચતુર્થી કૃષ્ણગાઽપરા ।
(Page ખં. ૩ અ. ૩૨ પાન ૭૧)
પ્રકાશિતા પ્રજાપાલ સ્વર્ગાત્ સર્વશુભપ્રદા ॥ ૮॥

દક્ષ ઉવાચ ।
કથં તેન નૃપાલેન ચતુર્થી ભૂમિમણ્ડલે ।
સમાનીતા મહાયોગિન્ વદ તસ્ય ચરિત્રકમ્ ॥ ૯॥

શ્રુત્વા કથામૃતં સ્વામિન્ હર્ષશ્ચેતસિ વર્ધતે ।
અતો વિસ્તરભાવેન કથયસ્વ કથાનકમ્ ॥ ૧૦॥

મુદ્ગલ ઉવાચ ।
માહિષ્મત્યાં મહાપુર્યાં ભીમનામાઽભવત્ પુરા ।
અન્ત્યજો દ્રવ્યલુબ્ધશ્ચ પાપકર્મપરાયણઃ ॥ ૧૧॥

સ તુ માર્ગે જનાન્ વીક્ષ્યાઽમારયત્તાન્ દિને દિને ।
માંસવિક્રયકારી ચ પશુન્ હત્વા નિરન્તરમ્ ॥ ૧૨॥

એકદા માઘમાસસ્ય ચતુર્થી કૃષ્ણપક્ષગા ।
સમાગતા ચ તત્રાઽસૌ વિચચાર વનાન્તરે ॥ ૧૩॥

મહાપર્વતદેશે સ જનાનાં પ્રવધાય ચ ।
દૈવયોગેન તસ્યાઽપિ મિલિતં નૈવ કિઞ્ચન ॥ ૧૪॥

અયં બભ્રામાન્નજલવિહીનો લોભસંયુતઃ ।
મિલિતં તત્ર નો કિઞ્ચિત્તથાભૂતશ્ચચાર હ ॥ ૧૫॥

તતોઽસ્તમગમત્ સૂર્યસ્તં દૃષ્ટ્વા સ્વગૃહે મતિમ્ ।
ગમનાય તથા ચક્રે માર્ગસંસ્થો બભૂવ હ ॥ ૧૬॥

માર્ગે દુષ્ટો દ્વિજાસ્તત્ર દૃષ્ટ્વા દ્વાદશસઙ્ખ્યકાન્ ।
તાન્ હત્વા સ તદીયં વૈ ગૃહીત્વા સ્વગૃહં યયૌ ॥ ૧૭॥

ચન્દ્રોદયે તતઃ પ્રાપ્તે બુભુજે ભોજનાકુલઃ ।
પુત્રં ગણેશનામાનમાહ્વયામાસ તેન સઃ ॥ ૧૮॥

પુનશ્ચકાર તદ્વત્ સ કદાચિત્ પાપમુલ્બણમ્ ।
કૃષ્ણપક્ષે ચતુર્થ્યાં ચ સ મમારોદયે વિધોઃ ॥ ૧૯॥

ગણેશદૂતાસ્તં તત્ર સમાનેતું સમાયયુઃ ।
કૈલાસે ગણપસ્થાને નિન્યુસ્તં તે વિમાનગમ્ ॥ ૨૦॥

સ્વર્ગમાર્ગેષુ દેવૈશ્ચ બ્રહ્મવિષ્ણ્વાદિભિસ્તુતઃ ।
વિમાનગૈઃ સ્તૂયમાનઃ પ્રવિવેશ શિવાસ્પદમ્ ॥ ૨૧॥

તત્ર ભુક્ત્વા પ્રભોગાન્ સ પપાત પૃથિવીતલે ।
માહિષ્મત્યાં સુતો જજ્ઞે ધનકસ્ય મહાબલઃ ॥ ૨૨॥

કૃતવીર્ય ઇતિ ખ્યાતો નાનાધર્મપરાયણઃ ।
દેવવિપ્રાતિથિપ્રેપ્સુર્બભૂવે યજ્ઞકારકઃ ॥ ૨૩॥

અપુત્રઃ સ્માઽભવદ્રાજા કૃતવીર્યઃ પ્રતાપવાન્ ।
પુત્રાર્થં યતતે સ્માતિનાનાધર્મપરાયણઃ ॥ ૨૪॥

ન લેભે સન્તતિં રાજા તતોઽસૌ દુઃખસંયુતઃ ।
પ્રધાનેષુ સમાક્ષિપ્ય રાજ્યં નિહતકણ્ટકમ્ ॥ ૨૫॥

સપત્નીકો વનં રાજા યયૌ તપસિ સંસ્થિતઃ ।
પૂર્વસંસ્કારયોગેન ગણેશે પ્રીતિમાનભૂત્ ॥ ૨૬॥

નાનાતપશ્ચકારાઽસૌ સન્તતિં ન તથાઽપિ ચ ।
લેભે નૃપઃ પ્રજાનાથ નેત્રપ્રાણાવશેષિતઃ ॥ ૨૭॥

અસ્થિત્વચાસમાયુક્તં દૃષ્ટ્વા તં નારદો મુનિઃ ।
સ્વર્ગસ્થં ધનકં તત્ર વૃત્તાન્તમવદન્નૃપમ્ ॥ ૨૮॥

તવ પુત્રો વને સંસ્થઃ પુત્રાર્થં યતતે નૃપ ।
નાનાયત્નસમાયુક્તોઽસ્થિત્વચાપ્રયુતોઽસ્તિ વૈ ॥ ૨૯॥

ન લેભે સન્તતિં રાજા સ્વલ્પકાલે મરિષ્યતિ ।
પુત્રહીનસ્ય ભો રાજન્ કા ગતિઃ પ્રભવેદ્વદ ॥ ૩૦॥

ઇત્યુક્વા તં મુનીન્દ્રઃ સ યયૌ કૈલાસમાદરાત્ ।
ધનકો મનસાઽત્યન્તં વિચારમકરોત્તતઃ ॥ ૩૧॥

બ્રહ્માણં શરણં યામિ સર્વજ્ઞં તેન ચેપ્સિતમ્ ।
ભવિષ્યતિ ન સન્દેહસ્તતઃ સોઽપિ યયૌ વિધિમ્ ॥ ૩૨॥

પ્રણિપત્ય પ્રતુષ્ટાવ નાનાસ્તોત્રૈઃ પ્રજાપતિમ્ ।
ઉવાચ તં મહાભાગં વિનયેન સમન્વિતઃ ॥ ૩૩॥

ધનક ઉવાચ ।
(Page  ખં. ૩ અ. ૩૨ પાન ૭૨)
ધર્મશીલશ્ચ મે પુત્રઃ પુત્રહીનો બભૂવ હિ ।
પુત્રાર્થં યતતે બ્રહ્મન્નાનાવ્રતપરાયણઃ ॥ ૩૪॥

રાજ્યાદિકં સમુત્સૃજ્ય વને તપતિ સંસ્થિતઃ ।
તપસ્તેનાઽવશેષોઽસાવસ્થિચર્મવૃતો બભૌ ॥ ૩૫॥

કેનોપાયેન પુત્રશ્ચ ભવિતા તં વદસ્વ મે ।
પ્રાપયિષ્યામ્યહં તત્ર સ્વવંશસ્ય વિવૃદ્ધયે ॥ ૩૬॥

તતસ્તં પ્રત્યુવાચેદં વચનં ચતુરાનનઃ ।
પૂર્વજન્મનિ સમ્ભૂતં દ્વિજહત્યાયુતં વ્રતમ્ ॥ ૩૭॥

પુનઃ પ્રોવાચ તં દેવો વિધિઃ સર્વાર્થકોવિદઃ ।
પુત્રપ્રાપ્ત્યર્થમેવૈકમુપાયં સર્વસિદ્ધિદમ્ ॥ ૩૮॥

અજ્ઞાનેન વ્રતં તેન કૃતં સઙ્કષ્ટહારકમ્ ।
ચતુર્થીપ્રભવં તેન પાપં સર્વં લયં ગતમ્ ॥ ૩૯॥

મહાપાપાનિ નશ્યન્તિ સઙ્કષ્ટીવ્રતસાધનાત્ ।
સઙ્કષ્ટીવ્રતસમ્બન્ધિદિવસે યત્ કૃતં ભવેત્ ॥ ૪૦॥

તદેવાક્ષયભાવેન તિષ્ઠત્યત્ર ન સંશયઃ ।
ચતુર્થ્યાં ભૂપ કૃષ્ણાયાં પુણ્યમેવ સમાચરેત્ ॥ ૪૧॥

તવ પુત્રેણ રાજેન્દ્ર દ્વાદશ બ્રાહ્મણા હતાઃ ।
ચતુર્થ્યાં પૂર્વજન્મસ્થેન પાપં તત્સ્થિતં મહત્ ॥ ૪૨॥

નાનાતપઃપ્રભાવેણ વ્રતતીર્થાદિકેન ચ ।
યજ્ઞાદિભિશ્ચ તત્પાપં લયં નૈવ ગમિષ્યતિ ॥ ૪૩॥

સઙ્કષ્ટ્યાં યત્કૃતં પાપં વજ્રલેપં ચ તત્સ્મૃતમ્ ।
તત્ર કશ્ચિદુપાયો ન તથાઽપિ શૃણુ મે વચઃ ॥ ૪૪॥

યેન સઙ્કષ્ટિકા પુણ્યા ચતુર્થી સાધિતા નૃપ ।
તસ્ય જન્માદિકં નૈવ ભવિષ્યતિ કદા પુનઃ ॥ ૪૫॥

ચતુર્વિધં પ્રજાનીહિ સર્વં માયામયં જગત્ ।

સઙ્કષ્ટં ચૈવ જીવાનાં તેન યુક્તા ભ્રમન્તિ તે ॥ ૪૬॥

ચતુર્થી ગણનાથસ્ય સઙ્કષ્ટી સાધિતા યદા ।
ચતુર્વિધં તસ્ય કષ્ટં ન ભવેદ્વૈ કદાચન ॥ ૪૭॥

બ્રહ્મણિ બ્રહ્મભૂતોઽતે સ્વાનન્દે વર્તતે નરઃ ।
વ્રતસ્યૈવ પ્રભાવેણેહલોકે સુખમાપ્નુયાત્ ॥ ૪૮॥

ચતુર્થ્યાં પાપકારા યે તેષાં મુક્તિર્ન વિદ્યતે ।
પાપયુક્તતયા રાજન્ સ્વર્ગસ્થાસ્તે ભવન્તિ ચ ॥ ૪૯॥

પુનર્જન્મધરા ભૂમૌ તત્ર પાપફલં સ્વકમ્ ।
ભુઞ્જન્તિ ચ પુનઃ સર્વે ગાણપત્યા ભવન્તિ તે ॥ ૫૦॥

અતો ગણેશદૂતૈઃ સ કૈલાસે સ્થાપિતોઽન્ત્યજઃ ।
પાપભોગાર્થમેવં ચ તવ પુત્રોઽધુનાઽભવત્ ॥ ૫૧॥

ચતુર્થ્યાં યત્કૃતં પાપં ચતુર્થી હન્તિ તત્ સદા ।
તદર્થં તે સુતો રાજંશ્ચતુર્થીમાચરિષ્યતિ ॥ ૫૨॥

તદા પાપવિહીનોઽયં ભવિતા નાત્ર સંશયઃ ।
પુત્રયુક્તશ્ચ તે પુત્રો ભવિષ્યતિ મહામતે ॥ ૫૩॥

અપરાધયુતં કર્મ કૃતં નાશાર્થમાદરાત્ ।
તસ્ય પુણ્યં પ્રકર્તવ્યં દુરિતં તેન નશ્યતિ ॥ ૫૪॥

ચતુર્થી મહિમાઽનન્તો ભૂતં યદપિ તદ્દિને ।
પાપં ક્રોધસમાયુક્તા મહાકૃચ્છ્રેણ હન્તિ સા ॥ ૫૫॥

અતસ્તત્પાપનાશાર્થં સઙ્કષ્ટીર્દ્વાદશાઽઽચરેત્ ।
તદા દ્વાદશવિપ્રાન્તભવં પાપં ગમિષ્યતિ ॥ ૫૬॥

તતસ્તં કરુણાયુક્તઃ સ વિધિ વ્રતમાદરાત્ ।
કથયામાસ વૈ બ્રહ્મા યયૌ રાજા પ્રણમ્ય તમ્ ॥ ૫૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે ધનકસ્ય વ્રતોપદેશો નામ દ્વાત્રિંશોઽધ્યાયઃ ॥ ૩.૩૨
(Page ખં. ૩ અ. ૩૩ પાન ૭૩)

## ૩.૩૩ કૃતવીર્યવ્રતપ્રાપ્તિવર્ણનં નામ ત્રયસ્ત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
વ્રતં લબ્ધ્વા પુસ્તકં સંલિખ્ય સઙ્ગૃહ્ય માયયા ।
ધનકઃ કૃતવીર્યસ્ય સ્વપ્ને સદ્યો જગામ હ ॥ ૧॥

ધનકં પિતરં દૃષ્ટ્વા કૃતવીર્યો નનામ તમ્ ।
પુત્રં રાજા સમાદાયોત્સઙ્ગે સ્વસ્ય જગાદ તમ્ ॥ ૨॥

ધનક ઉવાચ ।
પુત્ર નાનાવિધા યત્ના વિશેષેણ કૃતાસ્ત્વયા ।
પુત્રાર્થમધુનૈકં ત્વં વ્રતં કુરુ મમાજ્ઞયા ॥ ૩॥

તેન પુણ્યેન પુત્રસ્તે ભવિતા નાત્ર સંશયઃ ।
બ્રહ્મણા કથિતં મે યત્ પુસ્તકં તદ્ ગૃહાણ હ ॥ ૪॥

ઇત્યુક્ત્વા પુત્રહસ્તે તદ્દત્વા પુસ્તકમાદરાત્ ।
અન્તર્ધાનં યયૌ રાજા જજાગાર નૃપાત્મજઃ ॥ ૫॥

પુસ્તકં હસ્તગં દૃષ્ટ્વા વિસ્મિતોઽભૂત્ પ્રહર્ષિતઃ ।
પિતરં દુઃખિતો ભૂત્વા સસ્માર સ રુરોદ વૈ ॥ ૬॥

સપત્નીકસ્તતો રાજા કૃતવીર્યો જગામ હ ।
સ્વપુરં માનિતસ્તત્ર પ્રધાનાદિભિરાદરાત્ ॥ ૭॥

તતઃ સ બ્રાહ્મણાન્ રાજા સમાકાર્ય નનામ તાન્ ।
પુસ્તકં દર્શયામાસ તસ્યાર્થં બ્રાહ્મણા જગુઃ ॥ ૮॥

અહો રાજન્ મહાભાગ પુસ્તકે વ્રતમુત્તમમ્ ।
લિખિતં સર્વસઙ્કષ્ટહારકં સર્વદં પરમ્ ॥ ૯॥

કૃષ્ણપક્ષે ચતુર્થ્યાં વૈ ચન્દ્રોદયસમાગમે ।
પૂજનીયો વિશેષેણ ગણેશઃ સિદ્ધિદાયકઃ ॥ ૧૦॥

પૂજયિત્વા ગણાધીશં તતોઽર્ઘ્યં તિથયે નૃપ ।
ગણેશાય ચ ચન્દ્રાય દાતવ્યં વ્રતકારિણા ॥ ૧૧॥

સૂર્યોદયાત્ સમારભ્ય ગણેશસ્મરણં નૃપ ।
કર્તવ્યં વર્જયેત્તત્ર જલપાનાદિકં તથા ॥ ૧૨॥

ચન્દ્રાયાઽર્ઘ્યં તથા દત્વા સપ્તવારં નૃપોત્તમ ।
બ્રાહ્મણાંસ્તત આપૂજ્ય સપત્નીકાન્નમેત્ સ તાન્ ॥ ૧૩॥

ભોજયેત્ પરમાન્નેન મોદકાદિભિરાદરાત્ ।
પાયસેનાઽપિ સિતયા યુતેન મધુરેણ ચ ॥ ૧૪॥

તતઃ સ્વયં સુહૃદ્ભિશ્ચ ભોજનં વૈ સમાચરેત્ ।
દાનં દદ્યાત્ સ વિપ્રેભ્યો યોષિદ્ભ્યઃ કઞ્ચુકાદિકમ્ ॥ ૧૫॥

તતો જાગરણં કાર્યં ગણેશસ્તવનેન ચ ।
પ્રભાતે વિમલે સ્નાત્વા પૂર્વવત્ પૂજયેદ્વિભુમ્ ॥ ૧૬॥

ગણેશં ચ તતો વિપ્રાન્ ભોજયેત્ પૂર્વવન્નૃપ ।
દક્ષિણાં વિપુલાં તેભ્યો દાપયેત્તાન્નમેત્તતઃ ॥ ૧૭॥

માસે માસે પ્રકુર્યાસ્ત્વં વ્રતં ગાણેશ્વરં ત્વિદમ્ ।
સર્વસઙ્કટહીનઃ સન્નન્તે સ્વાનન્દગો ભવેઃ ॥ ૧૮॥

અપારમહિમાયુક્તં વ્રતં પ્રાપ્તં ત્વયા નૃપ ।
ત્વદીયસઙ્ગયોગેન જનેભ્યઃ સિદ્ધિદં ભવેત્ ॥ ૧૯॥

ન શ્રુતં નૈવ દૃષ્ટં ચ વ્રતં કેનાઽપિ ભૂમિપ ।
લોકાનામુપકારાય ભવિષ્યતિ વિશેષતઃ ॥ ૨૦॥

ચતુર્વિધં જગત્સર્વં સઙ્કષ્ટકરમુચ્યતે ।
તસ્માદ્બન્ધનનાશાર્થં વ્રતં ચેદં ભવિષ્યતિ ॥ ૨૧॥

ઇહ ભુક્ત્વાઽખિલાન્ ભોગાન્ દુર્લભાન્ દેવભોગ્યકાન્ ।
અન્તે મુક્તિમવાપ્નોતિ વ્રતસ્યાસ્ય પ્રભાવતઃ ॥ ૨૨॥

એવમુક્ત્વા દ્વિજાઃ સર્વે ગતાઃ સ્વસ્વાશ્રમે તદા ।
કૃતવીર્યસ્તથા રાજા ચકાર વ્રતમુત્તમમ્ ॥ ૨૩॥

સૂત ઉવાચ ।
મુદ્ગલસ્ય વચઃ શ્રુત્વા હૃષ્ટરોમા પ્રજાપતિઃ ।
જગાદ તં પુર્નવાક્યં સંશયચ્છેદનાય સઃ ॥ ૨૪॥

દક્ષ ઉવાચ ।
કૃતવીર્યાત્ સમારભ્ય વ્રતં ભૂમ્યાં સમાગતમ્ ।

મહામુને ભીમનામ્નાંઽત્યજેનૈવ કૃતં કથમ્ ॥ ૨૫॥

ચતુર્થીવ્રતપુણ્યેન સ એવ કૃતવીર્યકઃ ।
(Page ખં. ૩ અ. ૩૪ પાન ૭૪)
બભૂવ વર્ણિતં વિપ્ર ત્વયા સંશયદાયકમ્ ॥ ૨૬॥

અતઃ સંશયનાશાર્થં વદ મુદ્ગલ મે વચઃ ।
સર્વજ્ઞસ્ત્વં ન સન્દેહઃ સાક્ષાદ્યોગીશ્વરો મહાન્ ॥ ૨૭॥

મુદ્ગલ ઉવાચ ।
પ્રજાપતે શ‍ૃણુ હ્યત્ર વચનં મે મહામતે ।
યેન તે સંશયો નાશં ગમિષ્યતિ ન સંશયઃ ॥ ૨૮॥

વ્રતં ગાણેશ્વરં દક્ષ ચતુર્થીસંજ્ઞકં પરમ્ ।
સઙ્કષ્ટહરણં પ્રોક્તં તજ્જાનીહિ પુરાતનમ્ ॥ ૨૯॥

પૃથિવ્યાં સ્વર્ગલોકે તત્ પાતાલે સર્વસમ્મતમ્ ।
ચતુર્થી ચ સમુત્પન્ના તદારભ્ય પ્રતિષ્ઠિતમ્ ॥ ૩૦॥

જનાસ્તન્નૈવ જાનન્તિ પૃથિવ્યાં કુત્રચિત્ પ્રભો ।
કૃતવીર્યાચ્ચ સર્વત્ર પ્રકાશમગમદ્વ્રતમ્ ॥ ૩૧॥

એત્તતે સર્વમાખ્યાતં શ‍ૃણુ તસ્ય કથાનકમ્ ।
કૃતવીર્યસ્ય ભૂપસ્ય પુણ્યદં શ‍ૃણ્વતે ભવેત્ ॥ ૩૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે કૃતવીર્યવ્રતપ્રાપ્તિવર્ણનં નામ ત્રયસ્ત્રિંશોઽધ્યાયઃ ॥ ૩.૩૩

## ૩.૩૪ કૃતવીર્યચરિતં નામ ચતુસ્ત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
વર્ષમાત્રવ્રતેનૈવ ગતં પાપં લયં મહત્ ।
દ્વાદશબ્રહ્મહત્યાખ્યં તતો રાજા બભૌ વિધે ॥ ૧॥

વ્રતપુણ્યપ્રભાવેણ સસત્ત્વાઽભૂન્નૃપાઙ્ગના ।
સુષુવે શુભવેલાયાં પુત્રં તેજસ્વિનાં વરમ્ ॥ ૨॥

હસ્તપાદવિહીનં તં દૃષ્ટ્વા માતા રુરોદ હ ।

કૃતવીર્યસ્તથા સર્વૈઃ પ્રધાનૈઃ બોધિતોઽભવત્ ॥ ૩॥

ત્યક્ત્વા શોકં સ્વયં રાજા જાતકર્મ ચકાર વૈ ।
મહોત્સવયુતૈઃ સર્વૈર્નગરે સંસ્થિતોઽભવત્ ॥ ૪॥

રાત્રૌ સ્વપ્ને દદર્શાઽસૌ દત્તાત્રેયં ચ યોગિનમ્ ।
તેન યત્ કથિતં સ્વપ્ને તચ્છૃણુષ્વ પ્રજાપતે ॥ ૫॥

ગતે દ્વાદશવર્ષે તુ ત્વત્પુત્રસ્ય નૃપોત્તમ ।
આગમિષ્યામિ તે ગેહં સાઙ્ગં પુત્રં કરોમ્યહમ્ ॥ ૬॥

મા ચિન્તાં કુરુ રાજેન્દ્ર ગણનાથપ્રસાદજઃ ।
પુત્રોઽયં તે સુતેજસ્વી દેવમાન્યો ભવિષ્યતિ ॥ ૭॥

તતઃ સોઽન્તર્દધે યોગી દત્તાત્રેયસ્તથા નૃપઃ ।
પ્રબુદ્ધો હર્ષયુક્તઃ સ બભૂવ ગણપં સ્મરન્ ॥ ૮॥

તતસ્તેન પૃથિવ્યાં તુ ઘોષઃ સર્વત્ર કારિતઃ ।
ચતુર્થ્યાં કૃષ્ણપક્ષસ્ય વ્રતં કાર્યં જનૈઃ સદા ॥ ૯॥

યેન વ્રતમિદં નૈવ કૃતં ચેત્તં નિહન્મ્યહમ્ ।
ચાણ્ડાલાદિદ્વિજાન્તાસ્તે વ્રતં ચક્રુર્વિશેષતઃ ॥ ૧૦॥

અષ્ટવર્ષસમાયુક્તા નરા નાર્યઃ સ્મ માનદ ।
અકુર્વન્ વિધિવત્ સર્વે વ્રતં ગાણેશ્વરં મહત્ ॥ ૧૧॥

તસ્ય રાજ્યે નરઃ કોઽપિ દુઃખયુક્તો બભૂવ ન ।
ન વન્ધ્યાદિ ભયં તદ્વદ્રોગાદિકભયં નહિ ॥ ૧૨॥

તતો દ્વાદશવર્ષેષુ ગતેષુ સ જગામ હ ।
દત્તો યોગીન્દ્રસેવ્યશ્ચ તં નનામ નરાધિપઃ ॥ ૧૩॥

પૂજિતો ભોજિતસ્તેન વચો દત્તસ્તમબ્રવીત્ ।
પુત્રં દર્શય તે રાજન્નદ્ભુતં દ્રષ્ટુમાગતઃ ॥ ૧૪॥

(Page ખં. ૩ અ. ૩૪ પાન ૭૫)
તતઃ સ હર્ષિતો રાજા દદૌ પુત્રં ચ તત્કરે ।
અઙ્કે સઙ્ગૃહ્ય યોગીન્દ્રો રાજાનં પ્રત્યુવાચ હ ॥ ૧૫॥

રાજન્ વ્રતં ત્વયા તત્રાઙ્ગહીનત્વમજાનતા ।
કૃતં તુ તેન તે પુત્રોઽઙ્ગહીનઃ પ્રબભૂવ હ ॥ ૧૬॥

વ્રતસ્ય જાગરે રાજન્ જૃમ્ભિતં ચ પુનઃ પુનઃ ।
ત્વયા નાચમનં તત્ર કૃતં તેનાયમીદૃશઃ ॥ ૧૭॥

વ્રતસ્યાઽયં પ્રભાવેણ વિષ્ણુઃ સાક્ષાન્નરાકૃતિઃ ।
પુત્રોઽભવત્તદંશેન વિખ્યાતઃ પ્રભવિષ્યતિ ॥ ૧૮॥

તત એકાક્ષરં મન્ત્રં દદૌ તસ્મૈ મહામુનિઃ ।
વિધિયુક્તં ગણેશસ્ય કાર્તવીર્યાય ધીમતે ॥ ૧૯॥

અનુષ્ઠાનં સમાદિશ્ય દ્વાદશાબ્દમયં પ્રભુઃ ।
અન્તર્ધાનં ચકારાઽસૌ રાજા સંહર્ષિતોઽભવત્ ॥ ૨૦॥

પ્રવાલક્ષેત્રસાન્નિધ્યે વને વ્યાઘ્રાદિસંયુતે ।
રાજા બભૂવ સંસ્થાપ્ય જનૈઃ પુત્રં ચ દુઃખિતઃ ॥ ૨૧॥

તતશ્ચ કાર્તવીર્યેણ તપસ્તપ્તં સુદારુણમ્ ।
વાયુમાત્રાશનેનૈવ ધ્યાત્વા હૃદિ ગજાનનમ્ ॥ ૨૨॥

મન્ત્રં જજાપ ભો દક્ષ હસ્તપાદવિવર્જિતઃ ।
દેહભાવમતિક્રમ્ય સંસ્થિતઃ કાષ્ઠવદ્ભમૌ ॥ ૨૩॥

તપઃપ્રભાવતસ્તસ્ય વને નિર્વૈરભાવતઃ ।
પ્રાણિનઃ સઞ્ચરન્તિ સ્મ ગજસિંહાદયઃ સદા ॥ ૨૪॥

એવં દ્વાદશવર્ષાણિ ગતાનિ તપસો યદા ।
તદા તત્રાઽઽયયૌ ઢુણ્ઢિર્ભક્તં પરમભાવિકમ્ ॥ ૨૫॥

તડાગમધ્યભાગાત્તં નિઃસૃતં ગણપં નૃપઃ ।
દૃષ્ટ્વા નનામ વિઘ્નેશં પૂજયન્ ભક્તિસંયુતઃ ॥ ૨૬॥

હર્ષેણ મહતા યુક્તસ્તં તુષ્ટાવ ગજાનનમ્ ।
સરોમાઞ્ચો મહાવીરઃ કાર્તવીર્યો મહાયશાઃ ॥ ૨૭॥

કાર્તવીર્ય ઉવાચ ।
નમસ્તે ગણનાથાય વિઘ્નેશાય નમો નમઃ ।
વિનાયકાય દેવેશ સર્વેષાં પતયે નમઃ ॥ ૨૮॥

નિર્ગુણાય પરેશાય પરાત્પરતરાય વૈ ।
અનાદયે ચ સર્વાદિપૂજ્યાય તુ નમો નમઃ ॥ ૨૯॥

સર્વપૂજ્યાય હેરમ્બ દીનપાલાય તે નમઃ ।
બ્રહ્મણે બ્રહ્મણાં ચૈવ બ્રહ્મદાત્રે નમો નમઃ ॥ ૩૦॥

નિરાકારાય સાકારરૂપાય પરમાત્મને ।
યોગાય યોગદાત્રે તે શાન્તિરૂપાય વૈ નમઃ ॥ ૩૧॥

સદા જ્ઞાનઘનાયૈવ કર્મમાર્ગપ્રવર્તિને ।
આનન્દાય સદાનન્દકન્દરૂપાય તે નમઃ ॥ ૩૨॥

રજસા સૃષ્ટિકર્ત્રે તે સત્ત્વતઃ પાલકાય ચ ।
તામસેન પ્રસંહર્ત્રે ગુણેશાય નમો નમઃ ॥ ૩૩॥

નાનામાયાધરાયૈવ નાનામાયાવિવર્જિત ।
માયિભ્યો મોહદાત્રે વૈ માયામાયિક તે નમઃ ॥ ૩૪॥

સ્વાનન્દપતયે તુભ્યં સિદ્ધિબુદ્ધિવરાય ચ ।
સિદ્ધિબુદ્ધિપ્રદાત્રે ચ લમ્બોદર નમોઽસ્તુ તે ॥ ૩૫॥

કિં સ્તૌમિ ગણનાથ ત્વાં યત્ર વેદા વિસિસ્મિરે ।
શિવવિષ્ણ્વાદયશ્ચૈવ યોગિનો યોગરૂપિણમ્ ॥ ૩૬॥

જગાદ ગણનાથસ્તુ તતસ્તં ભક્તમુત્તમમ્ ।
વરં વૃણુ મહાભાગ કાર્તવીર્ય હૃદીપ્સિતમ્ ॥ ૩૭॥

ત્વયા કૃતં મદીયં યત્ સ્તોત્રં સર્વપ્રદં ભવેત્ ।
અઙ્ગહીનસ્ય સર્વસ્ય સ્વઙ્ગદં પ્રભવિષ્યતિ ॥ ૩૮॥

કૃત્વા ભાવેન મત્પૂજાં નરઃ સ્તોત્રમિદં પઠેત્ ।
તસ્ય સાઙ્ગં સદા સર્વં કરોમિ સ્તોત્રપાઠતઃ ॥ ૩૯॥

ઇહ ભુક્ત્વાઽખિલાન્ ભોગાન્ પુત્રપૌત્રાદિસંયુતઃ ।
અન્તે સ્વાનન્દગો ભૂત્વા બ્રહ્મભૂતો ભવિષ્યતિ ॥ ૪૦॥

તતસ્તં કાર્તવીર્યશ્ચ જગાદ ગણનાયકમ્ ।
હર્ષયુક્તો મહાભક્તો ભક્તેશં ભક્તવત્સલમ્ ॥ ૪૧॥

કાર્તવીર્ય ઉવાચ ।
કિં વૃણોમિ ગણાધીશ સર્વં માયામયં વિભો ।
તવ દર્શનમાત્રેણ મયા જ્ઞાતં ન સંશયઃ ॥ ૪૨॥

સુહૃદાં તદપિ સ્વામિન્ સન્તોષાર્થં વૃણોમ્યહમ્ ।

શરીરે ચારુતાં દેહિ ભક્તિં ત્વચ્ચરણે પ્રભો ॥ ૪૩॥

યદ્યદિચ્છામિ તત્તચ્ચ સુલભં મે ગજાનન ।
ભવતુ ત્વત્પ્રસાદેન રાજ્યં પૂર્ણં પ્રદેહિ ચ ॥ ૪૪॥

અસ્મિન્ ક્ષેત્રે સ્થિરો ભૂત્વા ભક્તાન્ પાલય વિઘ્નપ ।
ધર્માર્થકામમોક્ષાદિ બ્રહ્મભૂયપ્રદં કુરુ ॥ ૪૫॥

પ્રવાલમયરૂપેણ મયા દૃષ્ટો ગજાનનઃ ।
પ્રવાલક્ષેત્રમિત્યુક્તં નામ્ના ભવતુ નિત્યદા ॥ ૪૬॥

સદા વિજયસંયુક્તં સહસ્રભુજસંયુતમ્ ।
માં કુરુષ્વ દયાસિઙ્ધો વિષ્ણુતુલ્યપરાક્રમમ્ ॥ ૪૭॥

મદીયસેવનં દેવ દેવવચ્ચ સદા ભવેત્ ।
મન્ત્રાદિકં ચ મે નાથ ભવતુ ત્વપ્રસાદતઃ ॥ ૪૮॥

મદીયસ્મરણેનૈવ ગતં પ્રાપ્તં કુરુ પ્રભો ।
ન મત્સમસ્ત્રિલોકેષુ સેન્દ્રાદિષુ ભવેત્કિલ ॥ ૪૯॥

તતસ્તં ગણનાથઃ સ તથેતિ પ્રત્યુવાચ હ ।
સર્વં તે ભવિતા રાજન્ મત્પ્રસાદાન્ન સંશયઃ ॥ ૫૦॥

મદીયસ્મરણેનૈવ મન્ત્રાદીનાં પ્રસેવયા ।
નિર્વિઘ્નં તે ચ રાજેન્દ્ર ભવિષ્યતિ નિરન્તરમ્ ॥ ૫૧॥

એવમુક્ત્વા ગણેશસ્તમન્તર્ધાનં જગામ હ ।
તતસ્તસ્ય પ્રજાનાથ દેહઃ સાઙ્ગો બભૂવ હ ॥ ૫૨॥

સહસ્રભુજસંયુક્તો બભૂવ પદસંયુતઃ ।
મહાબલો મહાવીર્યસ્તેજસા સંયુતોઽભવત્ ॥ ૫૩॥

તત્ર દેવાદયો જગ્મુર્દર્શનાર્થં નૃપસ્ય ચ ।
સાક્ષાદ્ વિષ્ણુઃ કલાંશેન કાર્તવીર્યો બભૌ તદા ॥ ૫૪॥

તતસ્તેન દ્વિજૈઃ સાર્ધં સ્થાપિતા મૂર્તિરાદરાત્ ।
ગણેશ્વરસ્ય તાં રાજાઽપૂજયત્ ભક્તિસંયુતઃ ॥ ૫૫॥

પૂજાર્થં બ્રાહ્મણાંસ્તત્ર સ્થાપયામાસ ભૂમિપઃ ।
તતો દેવાન્ દ્વિજાંસ્તત્રાઽપૂજયત્ સ ચથાવિધિ ॥ ૫૬॥

નનામ ભક્તિયુક્તસ્તાંસ્તેઽપિ તસ્મૈ વરાન્ દદુઃ ।
હર્ષિતાશ્ચ પુનઃ સ્વર્ગં જગ્મુર્દેવાઃ સવાસવાઃ ॥ ૫૭॥

કાર્તવીર્યો રથસ્થઃ સ યયૌ સ્વનગરં તતઃ ।
દૂતૈર્જ્ઞાત્વા ચ વૃત્તાન્તં તં યયુઃ સર્વનાગરાઃ ॥ ૫૮॥

પ્રધાનાશ્ચ પ્રણમ્યૈનં સુહૃદ્ભિરભિનન્દિતમ્ ।
અલઙ્કૃતે પુરે સર્વે વેશયામાસુરાદરાત્ ॥ ૫૯॥

નનામ માતરં સોઽપિ પિતરં હર્ષસંયુતઃ ।
તાભ્યામાશીર્ભિરત્યન્તં મુદિતશ્ચ કૃતો બભૌ ॥ ૬૦॥

તતઃ કિયતિ કાલે સંસ્થાપ્ય પુત્રં યશસ્વિનમ્ ।
સ્વરાજ્યે કૃતવીર્યશ્ચ સસ્ત્રીકઃ પ્રયયૌ વનમ્ ॥ ૬૧॥

રાજા ગણપતિં તત્રાઽભજત્ સોઽનન્યચેતસા ।
સ્વલ્પકાલેન સસ્ત્રીકઃ સોઽપિ તં ગણપં યયૌ ॥ ૬૨॥

તસ્ય રાજ્યે જનાઃ સર્વે સઙ્કષ્ટીવ્રતકારકાઃ ।
ક્રમેણ ગણનાથં તે યયુર્દક્ષ પ્રજાપતે ॥ ૬૩॥

ઇદં ચ કૃતવીર્યસ્ય ચરિતં યઃ શ ૃણોતિ ચેત્ ।
પઠેદ્વા તસ્ય સઙ્કષ્ટં ભવેન્ન ચ ચતુર્વિધમ્ ॥ ૬૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે કૃતવીર્યચરિતં નામ ચતુસ્ત્રિંશોઽધ્યાયઃ ॥ ૩.૩૪
(Page ખં. ૩ અ. ૩૫ પાન ૭૭)

## ૩.૩૫ સહસ્રાર્જુનનિમન્ત્રણં નામ પઞ્ચત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
ચકાર કાર્તવીર્યોઽયં સ તતો રાજ્યમુત્તમમ્ ।
ધર્મેણ રાજ્યનીત્યા સ્વાં પાલયામાસ હિ પ્રજામ્ ॥ ૧॥

તતસ્તેન ચ ભૂપેન જિતાઃ સર્વે મહીભૃતઃ ।
સપ્તદ્વીપવતીં પૃથ્વીં બુભુજે બલસંયુતઃ ॥ ૨॥

દેવૈઃ સંસ્થાપિતં નામ સહસ્રાર્જુન આદરાત્ ।

ન સમસ્તેન કશ્ચિદ્વૈ બભૂવ ક્ષાત્રમણ્ડલે ॥ ૩॥

સ્વર્ગે દેવાદયશ્ચૈવ ત્રાસયુક્તા બભૂવિરે ।
યદા ક્રુદ્ધઃ સ્વયં રાજા તદા સ્વર્ગં ગ્રહીષ્યતિ ॥ ૪॥

ન સઙ્ખ્યા વર્તતે તસ્ય સૈન્યાનાં ચ પ્રજાપતે ।
યશસા તેજસા પૂર્ણં પૂરિતં તેન વૈ જગત્ ॥ ૫॥

સસ્ત્રીકો નર્મદામધ્યે ચિક્રીડ નૃપ એકદા ।
સહસ્રબાહુભિર્ધૃત્વા જલૌઘં તત્ર લીલયા ॥ ૬॥

યત્ર વૈ નર્મદાતીરે રાવણઃ સ મહાનુગઃ ।
પુપૂજ શાઙ્કરં લિઙ્ગં જલૌઘસ્તત્ર ચાગતઃ ॥ ૭॥

પૂજાવિધિં સ શીઘ્રં સમાપ્ય વૈ રાક્ષસાધિપઃ ।
પપ્રચ્છ કેન દૂતેશા જલૌઘઃ સમ્પ્રવર્તિતઃ ॥ ૮॥

ગત્વા પશ્યત મામત્ર ક્ષોભયુક્તં સ ચાઽકરોત્ ।
તં હનિષ્યામિ સઙ્ક્રુદ્ધો નિત્યભઙ્ગેન દુઃખિતઃ ॥ ૯॥

તતસ્તે ત્વરયા જગ્મુર્દૃષ્ટ્વા તં કાર્તવીર્યકમ્ ।
સમાચખ્યુર્મહાદૈત્યં રાવણં વિસ્મિતા વિભો ॥ ૧૦॥

શ્રુત્વા વૃત્તાન્તમેવં સ રાવણસ્તં યયૌ નૃપમ્ ।
પ્રધાનૈઃ ષડ્ભિરત્યન્તં ક્રોધયુક્તઃ પ્રતાપવાન્ ॥ ૧૧॥

સહસા રાવણં દૃષ્ટ્વા ગદાં ધૃત્વા મહાબલઃ ।
આર્દ્રવસ્ત્રેણ સંયુક્તો યુયુધેઽર્જુન એકકઃ ॥ ૧૨॥

ગદાયુદ્ધં મહાઘોરં તયોસ્તત્ર બભૂવ હ ।
તતઃ સ ગદયા રાજાઽપીડયદ્રાવણં પરમ્ ॥ ૧૩॥

કવચાદિકમેતસ્ય રાક્ષસસ્ય નરાધિપઃ ।
ભેદયામાસ વૈ દક્ષ રાવણસ્તત આપતત્ ॥ ૧૪॥

સઙ્ગૃહ્ય સ્વગૃહં ભૂપો યયૌ તત્ર બબન્ધ તમ્ ।
નિકટે સ્થાપયામાસ સભાયાં ખેલકારકમ્ ॥ ૧૫॥

દશમસ્તકયુક્તં તં દૃષ્ટ્વા ચિક્રીડ ભૂમિપઃ ।
તતસ્તં મુનિવર્યશ્ચ પુલસ્ત્યઃ સહસાઽઽયયૌ ॥ ૧૬॥

તં પ્રણમ્ય મહાભાગં ગાણપત્યં વિશેષતઃ ।
પુપૂજ ભક્તિસંયુક્તો ભોજયામાસ યત્નતઃ ॥ ૧૭॥

પુનઃ પ્રણમ્ય તં વિપ્રં કૃતાઞ્જલિપુટઃ પુરઃ ।
સંસ્થિતસ્તમુવાચાઽથ મુનિઃ સર્વાર્થકોવિદઃ ॥ ૧૮॥

રાવણં મુઞ્ચ રાજેન્દ્ર મત્પૌત્રં વરસંયુતમ્ ।
મિત્રભાવેન તિષ્ઠ ત્વં રાવણસ્ય મહામતે ॥ ૧૯॥

તથેતિ તં જગાદાસાવમુઞ્ચદ્રાવણં નૃપઃ ।
પુલસ્ત્યઃ પ્રયયૌ સ્થાનમાશિષ્યા ચાભિનન્દ્ય તમ્ ॥ ૨૦॥

ઇત્યાદિતેજસા યુક્તઃ સાક્ષાદ્વિષ્ણુમયો નૃપઃ ।
નૈવ શક્યો વર્ણયિતું ધર્મશીલો બભૂવ હ ॥ ૨૧॥

દિગ્જયે યેન રાજ્ઞા વૈ સમુદ્રઃ પાદઘાતતઃ ।
તાડિતઃ સ વિશીર્ણોઽભૂદ્ભયભીતઃ પ્રજાપતે ॥ ૨૨॥

યજ્ઞાન્ સ વિપુલાંશ્ચક્રે ભૂરિદક્ષિણસંયુતાન્ ।
સ્વાહાં સ્વધા વષટ્કારૈર્મુમુદુર્દેવતાદયઃ ॥ ૨૩॥

યેન દ્વિજેન યત્તત્ર પ્રાર્થિતં તદ્દદૌ નૃપઃ ।
સ્વસ્વધર્મરતાન્ લોકાન્ કારયામાસ યત્નતઃ ॥ ૨૪॥

સદા ગણેશભક્તિં સ ચકાર નૃપસત્તમઃ ।
ગાણપત્યપ્રિયશ્ચાસીત્તીર્થદેવાતિથિપ્રિયઃ ॥ ૨૫॥

આગતઃ સ મયૂરેશં યાત્રાં તત્ર ચકાર હ ।
(Page ખં. ૩ અ. ૩૫ પાન ૭૮)
વર્ષમાત્રોષિતો રાજા યાત્રાર્થં લોલુપઃ સ્વયમ્ ॥ ૨૬॥

ગણેશં સ્થાપયામાસ બ્રાહ્મણૈર્મન્ત્રકોવિદૈઃ ।
પ્રવાલગણનાથેતિ નામ કૃત્વા પુપૂજ હ ॥ ૨૭॥

એવં નાનાવિધૈર્ભાવૈર્ગણેશમભજત્ સદા ।
ત્રિલોકકીર્તિસઙ્ગીતો બભૂવ કૃતવીર્યજઃ ॥ ૨૮॥

ચતુર્થીવ્રતજેનૈવ તેજસા સંયુતો બભૌ ।
અઙ્ગહીનકભાવેન મોહયુક્તો બભૂવ હ ॥ ૨૯॥

દેવાદીનામભૂન્ માન્યઃ શ્રિયા પરમયા યુતઃ ।

ભોગયુક્તઃ સ્વભાવેન વિસસ્માર ગજાનનમ્ ॥ ૩૦॥

ત્યક્ત્વા મન્ત્રં ગણેશસ્ય બ્રહ્મજ્ઞાનમદેન સઃ ।
અહં ગણેશરૂપઃ સન્ કં ભજામ્યવદત્ ખલઃ ॥ ૩૧॥

તતો બભૂવાતિવિઘ્નસંયુક્તઃ સોઽર્જુનઃ પ્રભો ।
તચ્છૃણુષ્વ મહાભાગ કથયામિ પ્રચેષ્ટિતમ્ ॥ ૩૨॥

સૈન્યેન સંયુતો રાજા મૃગયાર્થં વનં યયૌ ।
નીલવેષધરો ભૂત્વા સૈનિકાસ્તાદૃશા બભુઃ ॥ ૩૩॥

જઘાન વિવિધાંસ્તત્ર મૃગાંસ્તાન્ નગરે સ્વકે ।
પ્રેષયામાસ દૂતૈઃ સ વિભ્રમન્ યત્ર તત્ર વૈ ॥ ૩૪॥

તતોઽકસ્માન્ મહારાજો દદાર્શાશ્રમમુત્તમમ્ ।
મુનેઃ પ્રપચ્છ રાજાઽસૌ સચિવાન્ કસ્ય ચાશ્રમઃ ॥ ૩૫॥

ત ઊચુર્જમદગ્નેર્વૈ મુનેરાશ્રમ આગતઃ ।
તતઃ સોઽપિ મુનિં દક્ષ યયૌ હર્ષસમન્વિતઃ ॥ ૩૬॥

પ્રણમ્ય સચિવૈર્મુખ્યૈઃ સંવૃતઃ સ કૃતાઞ્જલિઃ ।
ઉવાચ મુનિશાર્દૂલં જમદગ્નિં મહાયશાઃ ॥ ૩૭॥

ધન્યં મેઽદ્ય મહાયોગિન્ જન્મ જ્ઞાનાદિકં તથા ।
કુલં ચ પિતરો સર્વં ત્વદઙ્ઘ્રિયુગદર્શનાત્ ॥ ૩૮॥

તતસ્તં મુનિમુખ્યોઽસાવાસનાદિકમાદરાત્ ।
દત્ત્વા શિષ્યૈશ્ચ સમ્પૂજ્ય પપ્રચ્છ કુશલાદિકમ્ ॥ ૩૯॥

પ્રયોજનં તથા વિપ્રઃ સમ્પૃચ્છન્ રાજસત્તમમ્ ।
માનયામાસ તં ભૂપં વિષ્ણોરંશસમુદ્ભવમ્ ॥ ૪૦॥

તતો રાજા મુનિં દક્ષ જગાદ પ્રીતિસંયુતઃ ।
તવાશીર્વચનેનૈવ કુશલં મે પ્રવર્તતે ॥ ૪૧॥

મૃગયાઽઽસક્તચિત્તોઽહમાગતો મુનિસત્તમ ।
પૂર્વપુણ્યબલેનૈવ પ્રાપ્તં તે દર્શનં મહત્ ॥ ૪૨॥

સર્વૈઃ સહ મહાભાગ પવિત્રોઽહં ન સંશયઃ ।
દર્શનેનૈવ સન્તુષ્ટ આજ્ઞાં દેહ્યધુના પ્રભો ॥ ૪૩॥

ગમિષ્યામિ સસૈન્યોઽહં નગરે સ્વે મહામતે ।
ન તે સમશ્ચ યોગેન તપસા ભાસતે મમ ॥ ૪૪॥

જગાદ મુનિમુખ્યોઽસૌ તતસ્તં હર્ષસંયુતઃ ।
વિષ્ણોરંશઃ સ્વયં ત્વં મેઽધુના સમ્પ્રાપ્ત આશ્રમે ॥ ૪૫॥

અનાયાસેન ભો રાજન્નતસ્ત્વાં પ્રાર્થયે વિભો ।
ભુઙ્ક્ષ્વ કિઞ્ચિન્મયા દત્તમપરાહ્ણે સમાગતઃ ॥ ૪૬॥

તતો રાજા જગાદેદં વચનં તં પ્રણમ્ય ચ ।
સ્વામિન્ વનેષુ મે સૈન્યં ક્ષુધિતં ભ્રમણે રતમ્ ॥ ૪૭॥

સન્ત્યજ્ય કથમેકોઽહં ભુનજ્મિ મુનિસત્તમ ।
સર્વેષાં ભોજને શક્તિર્વર્તતે નૈવ તે મુને ॥ ૪૮॥

વદામિ તેન યોગીન્દ્ર આજ્ઞાં દેહિ ચ મે પ્રભો ।
ગમિષ્યામિ ત્વરાયુક્તો નગરે સૈન્યસંયુતઃ ॥ ૪૯॥

તતસ્તં રાજશાર્દૂલમુવાચ મુનિસત્તમઃ ।
ન ચિન્તાં કુરુ રાજેન્દ્ર સસૈન્યં ભોજયામ્યઽહમ્ ॥ ૫૦॥

(Page ખં. ૩ અ. ૩૬ પાન ૭૯)
તપસા મે મહારાજ વશ્યં બ્રહ્માણ્ડમણ્ડલમ્ ।
અતસ્ત્વં ગચ્છ નદ્યાં વૈ સ્નાનાર્થં સર્વસંયુતઃ ॥ ૫૧॥

તથેતિ તં પ્રણમ્યાઽસાવગમત્ સૈન્યસંયુતઃ ।
સ્નાનાર્થં વિસ્મિતો ભૂત્વા સહસ્રાર્જુન આદરાત્ ॥ ૫૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે સહસ્રાર્જુનનિમન્ત્રણં નામ પઞ્ચત્રિંશોઽધ્યાયઃ ॥ ૩.૩૫

## ૩.૩૬ રેણુકાજમદગ્નિસઞ્જીવનકરણં નામ ષટ્ત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
ગતે રાજનિ ભો દક્ષ જમદગ્નિર્મહામુનિઃ ।
રેણુકાં ચ સમાહૂય વૃત્તાન્તમવદત્ સ્વયમ્ ॥ ૧॥

તતસ્તાભ્યાં સ્મૃતા દેવી કામધેનુઃ પ્રજાપતે ।

સમાગતાં પ્રસમ્પૂજ્ય પ્રાર્થયન્તાવુભૌ સમમ્ ॥ ૨॥

કાર્તવીર્યઃ સસૈન્યશ્ચ ભોજનાય નિમન્ત્રિતઃ ।
તદર્થં કુરુ કલ્યાણિ યત્નં પ્રત્વરિતા સખિ ॥ ૩॥

તયોર્વચનમાકર્ણ્ય કામધેન્વા મહાપુરમ્ ।
રચિતં સ્વપ્રભાવેણ પરિખાવલયાઙ્કિતમ્ ॥ ૪॥

ચતુર્વિધાન્નસંયુક્તાં નિર્મમે પાકશાલિકામ્ ।
ક્ષણેન તાં સમાલોક્ય હર્ષિતશ્ચાઽભવન્ મુનિઃ ॥ ૫॥

શિષ્યૈ રાજાનમાહૂય સસૈન્યં તં પ્રજાપતે ।
ભોજયામાસ વિપ્રોઽસાવન્નૈર્નાનાવિધૈઃ પરૈઃ ॥ ૬॥

અમૃતકલ્પરૂપં તે બુભુજુર્હર્ષસંયુતાઃ ।
તૃપ્તાસ્તે ફલકન્દાદીન્ ભક્ષયામાસુરાદૃતાઃ ॥ ૭॥

તામ્બૂલાનિ તતઃ સર્વે બભક્ષુઃ પ્રેમસંયુતાઃ ।
તતો વસ્ત્રાદિભિસ્તે ચ સત્કૃતા મુનિના બભુઃ ॥ ૮॥

રાજાઽથ વિસ્મિતો ભૂત્વા પ્રણનામ મહામુનિમ્ ।
આજ્ઞાં ગૃહીત્વા સૈન્યેન યયૌ સ્વનગરં પ્રતિ ॥ ૯॥

ગચ્છન્તં તં પ્રધાનં ચ ઊચે વિનયસંયુતઃ ।
ધેનું પ્રાર્થય રાજંસ્ત્વં બ્રાહ્મણસ્તાં પ્રદાસ્યતિ ॥ ૧૦॥

ઇયં ધેનુર્મહારાજ રત્નભૂતા ન સંશયઃ ।
તાં વિના રાજ્યમુગ્રં તે નિષ્ફલં ભાસતેઽધુના ॥ ૧૧॥

તસ્ય તદ્વચનં શ્રુત્વા રાજા મોહેન સંયુતઃ ।
વિઘ્નેન પીડિતોઽત્યન્તમુવાચ સચિવં વચઃ ॥ ૧૨॥

ગચ્છ ત્વં પ્રાર્થ્ય વિપ્રં તં ધેનુમાનય યત્નતઃ ।
તથેતિ સૈન્યમાદાય મુનિં દુષ્ટઃ સમાયયૌ ॥ ૧૩॥

પ્રધાનં મુનિમુખ્યં તં પ્રણમ્યાભિદધે વચઃ ।
મુને ધેનુમિમાં દેહિ રાજ્ઞે હ્યતિથિરૂપિણે ॥ ૧૪॥

તતસ્તં કોપસંયુક્ત ઉવાચ મુનિસત્તમઃ ।
ન દાસ્યામિ મહામૂર્ખ ધેનું દેવસ્વરૂપિણીમ્ ॥ ૧૫॥

તતઃ સોઽપિ મહાવીરૈર્ધૃત્વા ધેનું બલાત્ ખલઃ ।
નિર્જગામ મુનેસ્તસ્યાઽઽશ્રમાત્ કોપસમન્વિતઃ ॥ ૧૬॥

તતો ધેનુઃ સમાક્રુદ્ધા સસૃજે બલમુત્કટમ્ ।
તેન સૈન્યં હતં તસ્ય પ્રધાનસહિતં પ્રભો ॥ ૧૭॥

જ્ઞાત્વા વૃત્તાન્તમુગ્રં તં ક્ષુભિતઃ કૃતવીર્યજઃ ।
યુદ્ધાર્થં ગર્વસંયુક્તો યયૌ તસ્યાશ્રમં વિધે ॥ ૧૮॥

(Page ખં. ૩ અ. ૩૬ પાન ૮૦)
તતસ્તસ્ય મહત્ સૈન્યં હતં ધેન્વા બલેન વૈ ।
રાજા ખેદસમાયુક્તો પપાલ ગતમત્સરઃ ॥ ૧૯॥

કામધેનુર્ગતા સ્વર્ગં પુનઃ રાજા સમાયયૌ ।
હૃદિ વિવ્યાધ બાણેન મુનિઃ સોઽપિ મમાર હ ॥ ૨૦॥

તતસ્તં ભર્ત્સયામાસ રેણુકા ભૂમિપાધમમ્ ।
એકવિંશતિબાણૈસ્તાં નૃપો વિવ્યાધ સર્વતઃ ॥ ૨૧॥

તતઃ સા ક્ષુભિતાઽત્યન્તં તમુવાચ નૃપાધમમ્ ।
સ્વલ્પકાલેન રાજંસ્ત્વં મરિષ્યસિ ન સંશયઃ ॥ ૨૨॥

સહસ્રબાહુચ્છેદસ્તે ભવિષ્યતિ સુદુર્મતે ।
તતઃ સોઽપિ ભયોદ્વિગ્નો જગામ નગરે સ્વકે ॥ ૨૩॥

ગતે ભૂપે મુનેઃ પત્ની રુરોદ કરુણસ્વરા ।
સસ્માર તનયં રામં બદર્યાશ્રમગં પ્રભુમ્ ॥ ૨૪॥

સ્મૃતિમાત્રેણ રામઃ સ યયૌ માતુસ્તદાન્તિકમ્ ।
દૃષ્ટ્વા મૃતં મહાવિપ્રં પિતરં પ્રરુરોદ હ ॥ ૨૫॥

માતરં બાણનિચયૈશ્ચિતાં વીક્ષ્ય વિશેષતઃ ।
પ્રભુર્નિષ્કાસયામાસ શરાન્ માતુઃ શરીરગાન્ ॥ ૨૬॥

તતસ્તં રેણુકાદેવી સાન્ત્વયામાસ યુક્તિતઃ ।
મા શોકં કુરુ પુત્ર ત્વં સ્થાસ્યામિ નિકટે પ્રભો ॥ ૨૭॥

દત્તાત્રેયં સમાનીય કુરુ કર્મ યથાવિધિ ।
આવયોઃ પ્રભવિષ્યાવો દેહયુક્તૌ પુનઃ પ્રભો ॥ ૨૮॥

નાન્યો વક્તા ન સન્દેહઃ તસ્માદ્યત્નપરો ભવ ।

જહિ દુષ્ટં ચ ભૂપં ત્વં હસ્તાનાં છેદનં કુરુ ॥ ૨૯॥

તતસ્તે જનકં તત્ર તસ્ય દેહોદ્ભવેન ચ ।
રક્તેન તર્પયસ્વ ત્વં તૃપ્તઃ સોઽપિ ભવિષ્યતિ ॥ ૩૦॥

મમાઙ્ગે એકવિંશચ્ચ બાણાસ્તેન સમર્પિતાઃ ।
એકવિંશતિવારં ત્વં કુરુ નિઃક્ષત્રિયાં ધરામ્ ॥ ૩૧॥

એવમુક્ત્વા ગતા દેવી સ્વર્ગે દેહં વિસૃજ્ય સા ।
રામસ્તથા ચકારાઽસૌ દત્તેન સહિતસ્તતઃ ॥ ૩૨॥

પઞ્ચમે દિવસે રામઃ કર્મ કૃત્વા સમાસ્થિતઃ ।
દત્તાત્રેયશ્ચ સ્વસ્થાને યયૌ ભિક્ષાર્થમાદરાત્ ॥ ૩૩॥

ષષ્ઠે દિને સમાયાતઃ વ્યાઘ્રસ્તત્ર મહાબલઃ ।
તં દૃષ્ટ્વા ભયસંયુક્તો રામઃ સસ્માર માતરમ્ ॥ ૩૪॥

સ્મૃતિમાત્રેણ સાઽઽયાતા શિરોમાત્રા પ્રજાપતે ।
તાં દૃષ્ટ્વા વિસ્મિતો રામસ્તમુવાચ હિ રેણુકા ॥ ૩૫॥

કિમર્થં પુત્રકાઽઽહૂતા તવ સ્નેહાત્ સમાગતા ।
તતોંઽતર્ધાનમકરોદ્વ્યાઘ્રઃ પરમ દુર્જયઃ ॥ ૩૬॥

એતસ્મિન્નન્તરે તત્ર દત્તાત્રેયઃ સમાયયૌ ।
દૃષ્ટ્વા તાં રામમામન્ત્ર્યોવાચ યોગવિદાં વરઃ ॥ ૩૭॥

સમાગતા ત્વયા તાત કિમર્થં રેણુકા સ્મૃતા ।
ન્યૂનદેહા વિશેષેણ કુરુ કર્મ યથાતથમ્ ॥ ૩૮॥

વૃત્તાન્તં કથયામાસ રામસ્તં મુનિસત્તમમ્ ।
ચકાર કર્મ સાઙ્ગં તદ્દત્તેન સહિતઃ પ્રભુઃ ॥ ૩૯॥

સપિણ્ડીકરણં રામશ્ચકાર દ્વાદશેઽહનિ ।
પાથેયશ્રાદ્ધમેવં સ ત્રયોદશદિને તથા ॥ ૪૦॥

તતઃ સ જમદગ્નિસ્તં દિવ્યદેહઃ સમાગતઃ ।
રામમાલિઙ્ગ્ય સંહૃષ્ટો બભૂવ મુનિસત્તમઃ ॥ ૪૧॥

જમદગ્નિં તતો દત્તો રેણુકાં હર્ષસંયુતઃ ।
ઉવાચ ભાવગમ્ભીરો બોધયન્ બોધદાયકઃ ॥ ૪૨॥

ગણેશં મન્ત્રરાજેન ભજતં ભાવપૂર્વકમ્ ।
તેન વિઘ્નવિહીનૌ ચ શાન્તિરૂપૌ ભવિષ્યથઃ ॥ ૪૩॥

ક્ષત્રહસ્તેન મરણં યુવાભ્યાં પ્રાપ્તમેવ ચ ।
વિઘ્નરાજમવિજ્ઞાય જાતૌ દુઃખેન સંયુતૌ ॥ ૪૪॥

(Page  ખં. ૩ અ. ૩૭ પાન ૮૧)
એવમુક્ત્વા ગણેશસ્ય દદૌ મન્ત્રં મહામુનિઃ ।
તાભ્યામેકાક્ષરં વિપ્રૌ તપોયુક્તૌ બભૂવતુઃ ॥ ૪૫॥

દત્તશ્ચ સ્વાશ્રમે તદ્વધયૌ હર્ષસમન્વિતઃ ।
પિત્રોઃ સેવાર્થમાનન્દાદ્રામસ્તત્ર સ્થિતોઽભવત્ ॥ ૪૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે રેણુકાજમદગ્નિસઞ્જીવનકરણં નામ ષટ્ત્રિંશોઽધ્યાયઃ ॥ ૩.૩૬

## ૩.૩૭ પરશુરામચરિતકથનં નામ સપ્તત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
ગત વર્ષસહસ્રે સ તપતોરાયયૌ પ્રભુઃ ।
વિઘ્નેશ્વરો ભાર્ગવયોર્વરદસ્તાવુવાચ હ ॥ ૧॥

રેણુકે જમદગ્ને ત્વં વૃણુ મે વરમુત્તમમ્ ।
એકાક્ષરવિધાનેન તપસા તોષિતોઽભવમ્ ॥ ૨॥

તસ્ય તદ્વચનં શ્રુત્વા હર્ષયુક્તૌ બભૂવતુઃ ।
ઊચતુર્ગણરાજં તૌ ભક્તિભાવસમન્વિતૌ ॥ ૩॥

ધન્યો વંશો ગણેશાન દર્શનેન તથાઽઽવયોઃ ।
તપઃ સ્વાધ્યાય એવં ત આવયોર્નાત્ર સંશયઃ ॥ ૪॥

એવમુક્ત્વા પ્રણમ્યૈનં પૂજયન્તૌ ગણેશ્વરમ્ ।
સરોમાઞ્ચૌ તુષ્ટુવતુઃ પ્રહર્ષેણ પ્રજાપતે ॥ ૫॥

રેણુકાજમદગ્ની ઉચતુઃ ।
નમસ્તે વિઘ્નપાલાય ભક્તાનાં વિઘ્નહારિણે ।
વિઘ્નકર્ત્રે હ્યભક્તાનાં બ્રહ્મભૂતાય તે નમઃ ॥ ૬॥

અનાદયે ત્વનાધાર વક્રતુણ્ડસ્વરૂપિણે ।
ગણેશાન અનન્તાનાં ગણાનાં પતયે નમઃ ॥ ૭ ॥

નાનાશક્તિયુતાયૈવ નાનાભેદકરાય તે ।
નાનાભેદવિહીનાય હેરમ્બાય નમો નમઃ ॥ ૮ ॥

અમેયમાયયા ચૈવ ખેલકાય ચ ઢુણ્ઢયે ।
સિદ્ધિબુદ્ધિસહાયાય સિદ્ધિબુદ્ધિવરાય ચ ॥ ૯ ॥

સ્વાનન્દપતયે તુભ્યં ભક્તેભ્યો યોગદાયિને ।
યોગાકારાય યોગાય શાન્તિદાય નમો નમઃ ॥ ૧૦ ॥

અખણ્ડાનન્દરૂપાય ભુક્તિમુક્તિપ્રદાય ચ ।
લમ્બોદરાય દેવાય ચૈકદન્તાય તે નમઃ ॥ ૧૧ ॥

મહોદરાય વિઘ્નાનાં પતયે સુખદાયિને ।
મૂષકધ્વજિને તુભ્યં નમો મૂષકવાહન ॥ ૧૨ ॥

ચતુર્ભુજાય સર્વેષામાદિપૂજ્યાય ભોગિને ।
જ્યેષ્ઠરાજાય સર્વેષાં પિતૃમાતૃસ્વરૂપિણે ॥ ૧૩ ॥

યં સ્તોતું ન સમર્થાશ્ચ વેદા દેવાઃ શિવાદયઃ ।
યોગિનસ્તં કથં ચાવાં હ્યતસ્ત્વાં પ્રણમાવહે ॥ ૧૪ ॥

એવં સ્તુત્વા ગણેશાનં પ્રણતૌ ભક્તિસંસ્તુતૌ ।
તાવુત્થાપ્ય ગણાધીશ ઊચિવાન્ હર્ષસંયુતઃ ॥ ૧૫ ॥

વરં ચ વૃણુતં પુત્રૌ દાસ્યામિ મનસીપ્સિતમ્ ।
યમિચ્છથો મહાભાગૌ ભક્તિભાવનિયન્ત્રિતઃ ॥ ૧૬ ॥

ગણેશવચનં શ્રુત્વા દમ્પતી તમથોચતુઃ ।
પ્રણમ્ય ચ પુનઃ પાદૌ સ્પૃષ્ટ્વા તૌ હર્ષસંયુતૌ ॥ ૧૭ ॥

તાવૂચતુઃ ।
યદિ પ્રસન્નભાવેન વરદોઽસિ ગજાનન ।
તદા તે પાદપદ્મે નૌ ભક્તિં દેહિ સુખપ્રદામ્ ॥ ૧૮ ॥

યોગશાન્તિં ચ વિઘ્નેશ દેહિ યોગેશ નૌ પરા ।
ગાણપત્યપ્રિયાં ચૈવ સદા હ્યાનન્દદાયિકામ્ ॥ ૧૯ ॥

ઓમિત્યુક્ત્વા ગણાધ્યક્ષઃ પુનઃ પ્રોવાચ તૌ તદા ।

(Page  ખં. ૩ અ. ૩૭ પાન ૮૨)
દૃષ્ટ્વા ભક્તિં તયોર્ભાવં ભક્તેભ્યઃ સુખદાયકઃ ॥ ૨૦॥

ભવત્કૃતમિદં મે યત્ સ્તોત્રં યોગપ્રદં ભવેત્ ।
યો યદિચ્છતિ તત્તસ્મૈ દાસ્યામિ સ્તોત્રપાઠતઃ ॥ ૨૧॥

જમદગ્ને સદા શાન્તો ભવ મે ભક્તિકારકઃ ।
રેણુકે દેહયુક્તા ત્વં ભજ માં યોગભાવિતા ॥ ૨૨॥

લોકાસ્ત્વાં મસ્તકાકારાં પશ્યન્ત્યત્ર ન સંશયઃ ।
જ્ઞાનદૃષ્ટ્યા તથા સાઙ્ગાં પશ્યેયુર્દેવતાદયઃ ॥ ૨૩॥

એવમુક્ત્વાંઽતર્દધેઽસૌ ગણેશો બ્રહ્મનાયકઃ ।
રેણુકા જમદગ્નિશ્ચ સ્વાશ્રમસ્થૌ બભૂવતુઃ ॥ ૨૪॥

તતઃ કદાચિદ્રામસ્તૌ પ્રણિપત્ય કૃતાઞ્જલિઃ ।
ઉવાચ પિતરૌ વાક્યં સાક્ષાદ્વિષ્ણુઃ પ્રતાપવાન્ ॥ ૨૫॥

શ્રીરામ ઉવાચ ।
અર્જુનં સંહનિષ્યામિ તથા નિઃક્ષત્રિયાં ધરામ્ ।
કરિષ્યામિ ન સન્દેહઃ પિતરૌ ભવદાજ્ઞયા ॥ ૨૬॥

તતસ્તં જમદગ્નિશ્ચોવાચ હર્ષસમન્વિતઃ ।
મા કુરુષ્વ વૃથા હિંસાં રામ ગર્વં પરિત્યજ ॥ ૨૭॥

તતસ્તં ભાર્ગવં રામ ઉવાચ વિનયાન્વિતઃ ।
માતુરગ્રે પ્રતિજ્ઞા ચ મુનીશ્વર કૃતા મયા ॥ ૨૮॥

તાં સત્યાં પ્રકરિષ્યામિ માતૃભક્તિપરાયણઃ ।
દેહત્યાગં કરિષ્યામિ તદર્થમથવા મુને ॥ ૨૯॥

તસ્યાઽઽગ્રહં સમાલોક્ય ન્યગદત્ પુત્રમાદરાત્ ।
શઙ્કરં ગચ્છ ભો રામ સ તેઽભીષ્ટં કરિષ્યતિ ॥ ૩૦॥

તૌ પ્રણમ્ય જગામાઽસૌ કૈલાસે શઙ્કરં પ્રભુઃ ।
પ્રણિપત્ય મહેશાનં સ્તુત્વા તં ચાબ્રવીદ્વચઃ ॥ ૩૧॥

કાર્તવીર્યં હનિષ્યામિ કુર્વે નિઃક્ષત્રિયાં ધરામ્ ।
એકવિંશતિવારં ચ તત્રોપાયં વદ પ્રભો ॥ ૩૨॥

તત એકાક્ષરં મન્ત્રં ગણેશસ્ય દદૌ શિવઃ ।

રામાય તં પ્રગમ્યાશુ વનં પ્રાયાન્ મહાબલઃ ॥ ૩૩॥

પૂર્વજન્મનિ દેવસ્ય ગણેશસ્ય કૃતં તપઃ ।
વામનેન ચ તત્ સ્મૃત્વા તસ્મિન્ તપસિ સંસ્થિતઃ ॥ ૩૪॥

વાયુભક્ષસ્તતો મન્ત્રં જજાપ ધ્યાનસંયુતઃ ।
સમાધિના મહોગ્રેણ તોષયામાસ વિઘ્નપમ્ ॥ ૩૫॥

ગતે વર્ષશતે પૂર્ણે આયયૌ તં ગજાનનઃ ।
ભક્તં ભક્ત્યા સમાયુક્તં મહોગ્રતપસા યુતમ્ ॥ ૩૬॥

ઉવાચ તં મહાભાગં ભાર્ગવં વિષ્ણુમવ્યયમ્ ।
વરં વૃણુ મહાભાગ ભક્ત્યા દાસ્યામિ ભાવિતઃ ॥ ૩૭॥

શ્રુત્વા તસ્ય વચો રમ્યમુત્થાય ગણપં દ્વિજઃ ।
નનામ દણ્ડવદ્ભૂમૌ તં પુપૂજ વિશેષતઃ ॥ ૩૮॥

પૂજયિત્વા પુનર્નત્વા તુષ્ટાવ પ્રકૃતાઞ્જલિઃ ।
રામો ભક્તિરસેનૈવ સમ્પ્લુતઃ સાશ્રુલોચનઃ ॥ ૩૯॥

રામ ઉવાચ ।
નમસ્તે ગણનાથાય ભક્તાનન્દવિવર્ધન ।
ભક્તિપ્રિયાય દેવાય હેરમ્બાય નમો નમઃ ॥ ૪૦॥

વેદાન્તવેદ્યરૂપાય મનોવાણીમયાય ચ ।
મનોવાણીવિહીનાય યોગાકારાય તે નમઃ ॥ ૪૧॥

ગજવક્ત્રાય વૈ તુભ્યં નિર્ગુણાત્મપ્રધારિણે ।
સગુણાય ચ કણ્ઠાધો નરાકારાય તે નમઃ ॥ ૪૨॥

અનાદયે ચ પૂજ્યાય સર્વેષાં સર્વદાયિને ।
આદિપૂજ્યાય વિઘ્નેશ નાનાવિઘ્નપ્રચાલક ॥ ૪૩॥

વિઘ્નહન્ત્રે સુભક્તાનાં વિઘ્નકર્ત્રે દુરાત્મનામ્ ।
સદા સ્વાનન્દનાથાય ઢુણ્ઢિરાજાય તે નમઃ ॥ ૪૪॥

વક્રતુણ્ડાય તે નાથ નમો લમ્બોદરાય વૈ ।
(Page  ખં. ૩ અ. ૩૭ પાન ૮૩)
સતતં શાન્તિરૂપાય શાન્તિદાય નમો નમઃ ॥ ૪૫॥

મહોદરાય સિદ્ધેશ્ચ બુદ્ધેશ્ચ પતયે નમઃ ।

નાનૈશ્વર્યપ્રદાત્રે તે ભ્રમદાય નમો નમઃ ॥ ૪૬॥

નાનાજ્ઞાનપ્રભેદૈશ્ચ મોહકર્ત્રે નમો નમઃ ।
સુભક્તાનાં સદા નાથ ભ્રમમોહાદિહારિણે ॥ ૪૭॥

નાનાદૈત્યનિહન્ત્રે ચ દેવાનાં મદહારિણે ।
સુરાસુરમયાયૈવ બ્રહ્મેશાય નમો નમઃ ॥ ૪૮॥

સર્વત્ર યોગરૂપેણ સંયોગાયોગહીનતઃ ।
સંસ્થિતં તં કથં સ્તૌમિ ત્વાં વિઘ્નેશ વદ પ્રભો ॥ ૪૯॥

યં સમર્થા ગણાધ્યક્ષ યોગિનઃ શેષકાદયઃ ।
શિવાદયશ્ચ વેદા વૈ સ્તૌતું ન પ્રભવન્તિ તે ॥ ૫૦॥

તં કિં સ્તૌમિ ગણાધીશમતસ્ત્વાં પ્રણતોઽભવમ્ ।
તેન તુષ્ટશ્ચ માં નાથ પાલયસ્વ ત્વદાશ્રિતમ્ ॥ ૫૧॥

એવં સંસ્તુવતસ્તસ્ય ભક્તિભાવેન માનદ ।
ભક્ત્યા રોમોદ્ગમઃ પ્રાપ્તઃ કણ્ઠરોધો બભૂવ હ ॥ ૫૨॥

નનર્ત પરમાનન્દયુક્તોઽસૌ ભાર્ગવાગ્રણીઃ ।
જય વિઘ્નેશ હેરમ્બ ગણેશેતિ વદંસ્તદા ॥ ૫૩॥

તં તથા ભક્તિસમ્મગ્નં વીક્ષ્ય દેવો ગજાનનઃ ।
ઉવાચ સાશ્રુનેત્રશ્ચ સરોમાઞ્ચઃ પ્રજાપતે ॥ ૫૪॥

રામ રામ મહાભાગ શ ૃણુ મે પરમં વચઃ ।
ધન્યોઽસિ સર્વભાવેન ભક્તો મે મગ્નતાં ગતઃ ॥ ૫૫॥

ત્વયા કૃતમિદં સ્તોત્રં ભવેત્ ભક્તિરસપ્રદમ્ ।
પઠિષ્યતિ ચ યશ્ચૈતચ્છૃણુયાત્ સતતં પરમ્ ॥ ૫૬॥

તસ્યાઽહં સકલાં બાધાં નાશયિષ્યામિ નિત્યદા ।
ઇહ ભુક્ત્વાઽખિલાન્ ભોગાનન્તે સ્વાનન્દગો ભવેત્ ॥ ૫૭॥

યદ્યચ્ચિન્તયતિ પ્રાજ્ઞ તત્તદ્દાસ્યામિ કેશવ ।
મમ માન્યઃ સદા સોઽપિ ભવિતા નાત્ર સંશયઃ ॥ ૫૮॥

પરશું મે ગૃહાણ ત્વં તેન મત્તૌલ્યગો ભવેઃ ।
જેષ્યસિ ત્વં મહાવીરમર્જુનં રાજભિર્વૃતમ્ ॥ ૫૯॥

નિઃક્ષત્રિયાં તથા પૃથ્વીં કરિષ્યસિ ન સંશયઃ ।
એકવિંશતિવારં ત્વં સદા જયસમન્વિતઃ ॥ ૬૦॥

નામ તે સર્વવિખ્યાતં ભવિષ્યતિ શુભપ્રદમ્ ।
ઉક્તં પરશુરામેતિ સ્મરણેન સુખપ્રદમ્ ॥ ૬૧॥

યજ્ઞાન્ કૃત્વા મહાભાગ યશઃ સંસ્થાપ્ય ભૂતલે ।
શાન્તિયોગસ્થભાવેન માં ભજિષ્યસિ નિત્યદા ॥ ૬૨॥

એવમુક્ત્વાંઽતર્દધેઽસૌ જામદગ્ન્યં ગણેશ્વરઃ ।
રામઃ સંસ્થાપયામાસ ગણેશં બ્રાહ્મણૈસ્તતઃ ॥ ૬૩॥

સમ્પૂજ્ય સ્વગૃહં રામો યયૌ હર્ષસમન્વિતઃ ।
રેણુકાં જમદગ્નિં સ નનામ પરશોર્ધરઃ ॥ ૬૪॥

તયોરાજ્ઞાં ગૃહીત્વા સ ભ્રાતૃભિશ્ચ સમન્વિતઃ ।
જુહાવ કાર્તવીર્યં તં મહાબલપરાક્રમમ્ ॥ ૬૫॥

સિદ્ધૈશ્ચ કવચૈર્યુક્તા રાજાનઃ સર્વ આગતાઃ ।
અવધ્યાઃ સર્વભાવેન દેવાદીનાં મહાબલાઃ ॥ ૬૬॥

ગણેશવરદાનેન પરશોસ્તેજસા પ્રભુઃ ।
રામઃ સર્વાંશ્ચ સઙ્ગ્રામે મારયામાસ યત્નતઃ ॥ ૬૭॥

કાર્તવીર્યં તં જઘાન સ તતો રોષતો દૃઢમ્ ।
યુદ્ધં કૃત્વા મહાઘોરં બાહૂંશ્ચિચ્છેદ લીલયા ॥ ૬૮॥

મમાર કાર્તવીર્યશ્ચ પર્શુના ચ પ્રજાપતે ।
તતઃ સ વિજયી રામઃ ક્ષત્રિયાણાં વધે રતઃ ॥ ૬૯॥

નિઃક્ષત્રિયાં ધરાં તત્ર ચકાર ક્રોધસંયુતઃ ।
પુનર્બ્રાહ્મણવીર્યેણ ક્ષત્રિયાઃ પ્રબભૂવિરે ॥ ૭૦॥

રામેણ તે પુનઃ સર્વે હતાઃ ક્ષત્રકુલોદ્ભવાઃ ।
(Page ખં. ૩ અ. ૩૮ પાન ૮૪)
નિઃક્ષત્રિયાં ધરાં દક્ષ ચકાર સ પુનઃ પુનઃ ॥ ૭૧॥

એકવિંશતિવારં ચ કૃત્વા નિઃક્ષત્રિયાં ધરામ્ ।
ક્ષત્રિયાણાં ચ રક્તેન તર્પયામાસ પૂર્વજાન્ ॥ ૭૨॥

યજ્ઞં કૃત્વા દદૌ પૃથ્વીં બ્રાહ્મણેભ્યો મહાયશાઃ ।

સમુદ્રેણ તતસ્તસ્મૈ દત્તા પૃથ્વી ભયાદ્વિધે ॥ ૭૩॥

તત્રાઽયં સંસ્થિતો રામો ભજતે ગણનાયકમ્ ।
અનન્યભાવસંયુક્તો ગાણપત્યોઽધુના મહાન્ ॥ ૭૪॥

ઇદં તે કાર્તવીર્યસ્ય રામસ્ય ચ મહાદ્ભુતમ્ ।
જમદગ્ને રેણુકાયાશ્ચરિતં કથિતં મયા ॥ ૭૫॥

યઃ શૃણોતિ નરો ભક્ત્યા પઠેદ્વા તસ્ય સમ્ભવેત્ ।
ભુક્તિમુક્તિપ્રદં દક્ષ ચિન્તિતાર્થપ્રદં પરમ્ ॥ ૭૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે પરશુરામચરિતકથનં નામ સપ્તત્રિંશોઽધ્યાયઃ ॥ ૩.૩૭

## ૩.૩૮ હરિવંશવર્ણનં નામાષ્ટત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
કાર્તવીર્યસ્ય પુત્રાસ્તુ શતં તત્ર મહારથાઃ ।
પઞ્ચૈવ બલિનઃ શૂરા ધર્માત્માનો યશસ્વિનઃ ॥ ૧॥

જયધ્વજઃ શૂરસેનો વૃષભોઽથ પુરુર્જિતૌ ।
જયધ્વજસ્તત્ર રાજા મુખ્યોઽભૂત્ સ પ્રજાપતે ॥ ૨॥

જયધ્વજસ્ય પુત્રોઽભૂત્તાલજઙ્ઘઃ પ્રતાપવાન્ ।
તસ્ય પુત્રશતં જજ્ઞે તાલજઙ્ઘા ઇતિ સ્મૃતાઃ ॥ ૩॥

તેષાં જ્યેષ્ઠો મહાબાહુર્વીતિહોત્રોઽભવન્નૃપઃ ।
વૃષપ્રભૃતયશ્ચાન્યે યાદવાઃ પુણ્યકર્મિણઃ ॥ ૪॥

વૃષો વંશકરશ્ચાસીત્તસ્ય પુત્રોઽભવન્ મધુઃ ।
મધોઃ પુત્રશતં જજ્ઞે વૃષ્ણિર્જ્યેષ્ઠઃ સ વંશકૃત્ ॥ ૫॥

વીતિહોત્રસુતશ્ચૈવાનન્તનામા મહાયશાઃ ।
દુર્જયસ્તસ્ય પુત્રોઽભૂત્ સર્વશાસ્ત્રવિશારદઃ ॥ ૬॥

તસ્ય ભાર્યા ગુણૈર્યુક્તા પાતિવ્રત્યપરાયણા ।
વને સ તુ યયૌ રાજોર્વશીં તત્ર દદર્શ હ ॥ ૭॥

તસ્યાં સક્તઃ સ્વયં કામી ન સસ્માર સ્વકાં સ્ત્રિયમ્ ।

ગતે બહુતિથે કાલે યયૌ કણ્વેન બોધિતઃ ॥ ૮॥

સ્વગૃહં પુનરેવાઽસૌ પ્રાયશ્ચિત્તં ચકાર વૈ ।
યાજયામાસ તં કણ્વઃ સ વિનીતો બભૂવ હ ॥ ૯॥

તસ્ય પુત્રો બભૂવાઽપિ સુપ્રતીક ઇતિ શ્રુતઃ ।
સહસ્રજિત્ કુલભવં સર્વં તે કથિતં ત્વિદમ્ ॥ ૧૦॥

યદુપુત્રસ્ય વંશં વૈ શ‌ૃણુ ક્રોષ્ટોઃ પ્રજાપતે ।
ક્રોષ્ટોરેકો વૃજિનવાનિતિ પુત્રોઽભવચ્છ્રુતઃ ॥ ૧૧॥

તસ્ય પુત્રોઽભવચ્છાહિઃ કુશેકુસ્તત્સુતો મતઃ ।
કુશેકોશ્ચાઽભવત્પુત્રો નામ્ના ચિત્રરથો બલી ॥ ૧૨॥

પુત્રશ્ચિત્રરથસ્યાઽભૂચ્છશબિન્દુસ્તતોઽભવત્ ।
દશલક્ષસહસ્રાણિ તેષુ જ્યેષ્ઠઃ પૃથુશ્રવાઃ ॥ ૧૩॥

ઉશનાસ્તસ્ય પુત્રોઽભૂદ્ધર્મ એવ સ કથ્યતે ।
તસ્માદ્રુચકનામાઽભૂત્તતઃ પઞ્ચ સુતા મતાઃ ॥ ૧૪॥

તેષુ વંશધરઃ પ્રોક્તો જ્યામઘો લોકવિશ્રુતઃ ।
તસ્માદ્વિદર્ભઃ પુત્રોઽભૂદ્વિદર્ભાચ્ચ કુશક્રથૌ ॥ ૧૫॥

લોમપાદસ્તૃતીયસ્તુ બભ્રુસ્તસ્યાઽઽત્મજોઽભવત્ ।
(Page ખં. ૩ અ. ૩૮ પાન ૮૫)
કૃતિસ્તસ્યાત્મજઃ પ્રોક્ત ઉશિકસ્તત્સુતોઽભવત્ ॥ ૧૬॥

ઉશિકાત્ પુત્રકો જાતશ્ચેદિશ્ચૈદ્યસ્તતોઽભવત્ ।
તસ્ય પુત્રો મહાબાહુઃપ્રભાવાત્ કૌશિકઃ સ્મૃતઃ ॥ ૧૭॥

અભૂત્તસ્ય સુતો ધીમાન્ સુમન્તુશ્ચ તતોઽમલઃ ।
અમલસ્ય સુતઃ પ્રોક્તો નિઃશ્વેતશ્ચ મહાબલઃ ॥ ૧૮॥

તસ્ય દક્ષાઽભવન્ પુત્રાઃ શતં ચૈવ મહાબલાઃ ।
ક્રથસ્યાપ્યઽભવત્કુન્તિર્ધૃષ્ટિસ્તસ્યાઽથ નિર્વૃતિઃ ॥ ૧૯॥

દશાર્હોઽસ્ય તતો વ્યોમસ્તસ્માજ્જીમૂતકસ્તતઃ ।
વિકૃતિસ્તસ્ય પુત્રો ભીમરથોઽભૂન્ મહાબલઃ ॥ ૨૦॥

તસ્માન્નવરથો નામ બભૂવ ચ મહાબલઃ ।
તસ્ય પુત્રો દશરથઃ શકુનિસ્તસ્ય ચાત્મજઃ ॥ ૨૧॥

તસ્માત્ કરમ્ભિઃ સમ્ભૂતો દેવરાતોઽભવત્તતઃ ।
ઈજે સ ચાશ્વમેધેન દેવક્ષત્રશ્ચ તત્સુતઃ ॥ ૨૨॥

મધુસ્તસ્ય સુતો જજ્ઞે તસ્માત્ કુરુરજાયત ।
પુત્રદ્વયમભૂત્તસ્ય સુત્રામા ચાનુરેવ ચ ॥ ૨૩॥

અનોસ્તુ પુરુહોત્રોઽભૂદાયુસ્તસ્ય સુતો મતઃ ।
આયુષઃ સાત્ત્વતો નામ તસ્ય સપ્ત સુતા મતાઃ ॥ ૨૪॥

ભજમાનો ભજિર્દિવ્યો વૃષ્ણિર્દેવવૃધોંઽધકઃ ।
મહાભોજશ્ચ વિખ્યાતા યાદવેષુ પ્રજાપતે ॥ ૨૫॥

ભજમાનસ્ય નિમ્લોચિઃ કિઙ્કણો વૃષ્ણિરેવ ચ ।
અથ દેવવૃધો રાજા પુત્રાર્થે તપ આચરત્ ॥ ૨૬॥

બભ્રુઃ પુત્રોઽભવત્તસ્ય પુણ્યશ્લોકો મહાયશાઃ ।
સર્વશાસ્ત્રાર્થતત્ત્વજ્ઞઃ શ્લોકૌ યસ્ય બભૂવતુઃ ॥ ૨૭॥

યશસા તેજસા રાજા ત્રિલોકેષુ વિરાજિતઃ ।
મહાભોજકુલે જાતા ભોજાસ્તે વૈ પ્રકીર્તિતાઃ ॥ ૨૮॥

વૃષ્ણેઃ સુમિત્રઃ પુત્રશ્ચ યુધાજિદપરસ્તથા ।
અનમિત્રઃ શિનિસ્તસ્માન્નિમ્નોઽભૂદનમિત્રતઃ ॥ ૨૯॥

સત્રાજિચ્ચ પ્રસેનશ્ચ વિખ્યાતૌ નિમ્નજૌ સુતૌ ।
સત્રાજિત્ સૂર્યમારાધ્ય મણિં લેભે સ્યમન્તકમ્ ॥ ૩૦॥

શિનેરથ સમુત્પન્નઃ પુત્રઃ સર્વાર્થકોવિદઃ ।
સત્યકઃ સત્યસમ્પન્નઃ સત્યનામા મહાયશાઃ ॥ ૩૧॥

સાત્યકિર્યુયુધાનઃ સ જયસ્તસ્યાઽભવત્સુતઃ ।
કુણિશ્ચાથ સુતો ધીમાંસ્તસ્ય પુત્રો યુગન્ધરઃ ॥ ૩૨॥

અનમિત્રસુતો યોઽન્યો વૃષ્ણિઃ શસ્ત્રવિશારદઃ ।
શ્વફલ્કશ્ચ સુતો વૃષ્ણેઃ પરશ્ચિત્રરથોઽભવત્ ॥ ૩૩॥

શ્વફલ્કઃ કાશિરાજસ્ય સુતાં ભાર્યામવિન્દત ।
તસ્યામજનયત્ પુત્રમક્રૂરં સાધુસમ્મતમ્ ॥ ૩૪॥

આસઙ્ગસારમેયાદ્યા અન્યે ચ દ્વાદશાઽઽત્મજાઃ ।

અક્રૂરસ્યાઽભવત્પુત્રો દેવવાનુપદેવકઃ ॥ ૩૫॥

અભૂચ્ચિત્રરથાત્ પુત્રઃ પૃથુશ્ચાપૃથુરેવ હિ ।
અશ્વગ્રીવઃ સુબાહુશ્ચ સુધાશ્વાદ્યાઃ સુતાઃ સ્મૃતાઃ ॥ ૩૬॥

અથાન્ધકો મહાબાહુર્લેભે વૈ ચતુરઃ સુતાન્ ।
કુકુરં ભજમાનં ચ શુચિં કમ્બલબર્હિણમ્ ॥ ૩૭॥

કુકરસ્ય સુતો વહ્નિર્વહ્નિસ્તુ તનયોઽભવત્ ।
કપોતરોમા ભો દક્ષ પુત્રોઽભવદનુસ્તતઃ ॥ ૩૮॥

સોઽભવત્તુમ્બરોર્મિત્રં સુતસ્તસ્યાંઽધકઃ સ્મૃતઃ ।
અન્ધકાદભવત્ પુત્રસ્તેજોયુક્તશ્ચ દુન્દુભિઃ ॥ ૩૯॥

સ ગોવર્ધનમાસાદ્ય તતાપ વિપુલં તપઃ ।
બ્રહ્મા તસ્મૈ દદૌ ચૈવ વરં તન્મનસીપ્સિતમ્ ॥ ૪૦॥

વંશસ્તે ચાક્ષયો ભાવી કીર્તિજ્ઞાનાદિકં યશઃ ।
(Page ખં. ૩ અ. ૩૯ પાન ૮૬)
સુરૈઃ સદાધિકં મૈત્ર્યં કામરૂપિત્વમેવ ચ ॥ ૪૧॥

અરિદ્યોતઃ સુતસ્તસ્ય તેજોયુક્તશ્ચ દુન્દુભેઃ ।
પુનર્વસુઃ સુતસ્તસ્યાહુકસ્તસ્ય સુતઃ સ્મૃતઃ ॥ ૪૨॥

આહુકાદુગ્રસેનશ્ચ દેવકશ્ચ પ્રજાપતે ।
દેવકસ્ય સુતા વીરા જજ્ઞિરે દેવસન્નિભાઃ ॥ ૪૩॥

દેવવાનુપદેવશ્ચ સુદેવો દેવવર્ધનઃ ।
તેષાં સ્વસારઃ સપ્તાઽઽસન્ વસુદેવાય તા દદૌ ॥ ૪૪॥

ધૃતદેવા તથા ચૈવોપદેવા દેવસાક્ષિતા ।
શ્રીદેવા શાન્તિદેવા ચ સહદેવા ચ સુવ્રતા ॥ ૪૫॥

દેવકી વસુદેવાય દદૌ સર્વાઃ પ્રજાપતે ।
ઉગ્રસેનસ્ય પુત્રાસ્તુ કંસમુખ્યા મહાબલાઃ ॥ ૪૬॥

મહાયશા અભૂત્ પુત્રો ભજમાનાદ્વિદૂરથઃ ।
તસ્ય શૂરઃ શિનિસ્તસ્ય સ્વયમ્ભોજશ્ચ તત્સુતઃ ॥ ૪૭॥

હૃદિકોઽતો દેહબાહુસ્તતઃ શતધનુસ્તતઃ ।
કૃતવર્મા તતો દેવમીઢોઽતઃ શૂરકસ્તતઃ ॥ ૪૮॥

વસુદેવાદયો દક્ષ દશ ધર્મપરાયણાઃ ।
વસુદેવાન્ મહાતેજા વાસુદેવો જગદ્ગુરુઃ ॥ ૪૯॥

દેવકીપુત્રતાં યાતો દેવૈઃ સમ્પ્રાર્થિતો હરિઃ ।
ભૂમિભારાવતારાય સાધૂનાં પાલનાય ચ ॥ ૫૦॥

રોહિણી ચ મહાભાગા વસુદેવાદજીજનત્ ।
સઙ્કર્ષણં તતો જ્યેષ્ઠં શેષાંશં ચ હલાયુધમ્ ॥ ૫૧॥

ઉમા દેહધરા જાતા યોગનિદ્રા ચ કૌશિકી ।
નિયોગાદ્વાસુદેવસ્ય યશોદા તનયાઽભવત્ ॥ ૫૨॥

યે ચાન્યે વસુદેવસ્ય વાસુદેવાગ્રજાઃ સુતાઃ ।
જઘાન કંસઃ પ્રાગેવ તાન્ સર્વાન્ સૂતિમાત્રતઃ ॥ ૫૩॥

સુષેણશ્ચ તતો દાયિ ભદ્રસેનો મહાબલઃ ।
ઋતુઃ સમ્મર્દનો ભદ્રઃ કીર્તિમાનિતિ સંજ્ઞિતાઃ ॥ ૫૪॥

હતેષ્વેતેષુ સર્વેષુ રોહિણી વસુદેવતઃ ।
અસૂત લોકનાથં તં બલભદ્રં હલાયુધમ્ ॥ ૫૫॥

જાતે રામે ચ દેવાનામાદિમાત્માનમચ્યુતમ્ ।
અસૂત દેવકી કૃષ્ણં શ્રીવત્સાઙ્કિતવક્ષસમ્ ॥ ૫૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે હરિવંશવર્ણનં નામાષ્ટત્રિંશોઽધ્યાયઃ ॥ ૩.૩૮

## ૩.૩૯ વિષ્ણુદેહધારણવર્ણનં નામૈકોનચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
રામસ્ય રેવતી ભાર્યા સુરૂપાઽઽસીદ્ગુણાન્વિતા ।
તસ્યામુત્પાદયામાસ દ્વૌ પુત્રૌ નિષધોલ્મુકૌ ॥ ૧॥

ષોડશ સ્ત્રીસહસ્રાણિ શતમષ્ટોત્તરં તથા ।
કૃષ્ણસ્ય પત્ન્યઃ સમ્પ્રોક્તાશ્ચારુરૂપાઃ સુલોચનાઃ ॥ ૨॥

તાસુ પુત્રા બભૂવુશ્ચ શતશોઽથ સહસ્રશઃ ।

પ્રત્યેકં દશ પુત્રાશ્ચ દુહિતૈકા બભૂવિરે ॥ ૩॥

પ્રદ્યુમ્નસામ્બમુખ્યાશ્ચ મહાતેજોયુતાઃ સુતાઃ ।
મહારથા મહાભાગા બભૂવુર્જ્ઞાનસંયુતાઃ ॥ ૪॥

પ્રદ્યુમ્નસ્ય ચ પુત્રોઽભૂદનિરુદ્ધઃ પ્રતાપવાન્ ।
તસ્ય પુત્રસ્તુ વજઃ સ એવાભૂદ્વંશધારકઃ ॥ ૫॥

(Page ખં. ૩ અ. ૩૯ પાન ૮૭)
મુસલાત્ સોઽવશિષ્ટોઽભૂદેવં નાનાવિધા નૃપાઃ ।
જાતાસ્તત્ર ન શક્યં વૈ ભવેત્ કથયિતું મયા ॥ ૬॥

દક્ષ ઉવાચ ।
કથં વિષ્ણુઃ સ્વયં સાક્ષાન્ માનુષે દેહધારકઃ ।
બભૂવ તત્ર યન્મૂલં તદેવ વદ માનદ ॥ ૭॥

મુદ્ગલ ઉવાચ ।
કથાં શ‍ૃણુ મહારમ્યાં પુરા જાતાં પ્રજાપતે ।
યયા તે સંશયઃ સર્વો નાશમેષ્યતિ તચ્છ્રુતાત્ ॥ ૮॥

પુરા દેવૈશ્ચ દૈત્યેશા જિતા વિષ્ણુસમન્વિતૈઃ ।
રાજ્યં ત્યક્ત્વા તતો દૈત્યા વનેષુ વ્યચરન્ ભયાત્ ॥ ૯॥

તતસ્તાન્ હન્તુમત્યન્તં યયુર્દેવા ઉદાયુધાઃ ।
પ્રહ્લાદપ્રમુખાઃ સર્વે ભયભીતાસ્તતોઽભવન્ ॥ ૧૦॥

અનાથાંસ્તાનથોચુસ્તે કૃત્વા કરપુટં પુરઃ ।
રાજ્યં ત્યક્ત્વા વયં સર્વે વનેષુ વિચરામહે ॥ ૧૧॥

શસ્ત્રાદિભિર્વિહીનાન્નઃ કથં હન્તું સમુદ્યતાઃ ।
સુરાઃ સર્વં ભવદ્ભિશ્ચ ગૃહીતં તદપિ હ્યહો ॥ ૧૨॥

અતો નો રક્ષત પ્રાજ્ઞાઃ શરણં સમુપાગતાન્ ।
મા હિંસ્યત મહાભાગા દીનાંશ્ચૈવ વિશેષતઃ ॥ ૧૩॥

તથાઽપિ વિષ્ણુના તત્ર પ્રેરિતાસ્તેઽપિ દાનવાન્ ।
દેવા હન્તું પ્રારભન્ત પલાયન્તાઽસુરાસ્તદા ॥ ૧૪॥

શરણં સ્વગુરું તત્ર ભૃગું યોગનિધિં યયુઃ ।
ઉદાયુધાસ્તુ પશ્ચાત્તે જગ્મુઃ ક્રોધસમન્વિતાઃ ॥ ૧૫॥

તત્ર સર્વે ભૃગું દક્ષ દદૃશુર્ન ચ દાનવાઃ ।
સમિદર્થં ગતં જ્ઞાત્વા ભૃગુપત્નીં સમાયયુઃ ॥ ૧૬॥

રક્ષ નો દેવિ ભીતાંસ્તુ દેવેભ્યઃ શરણં ગતાન્ ।
નોચેદ્વયં મરિષ્યામસ્ત્વદગ્રે નાત્ર સંશયઃ ॥ ૧૭॥

તેષાં વચનમાકર્ણ્ય તાનુવાચ સુખપ્રદા ।
મા ભયં કુરુત હ્યેવં વારયામિ સુરાનહમ્ ॥ ૧૮॥

તસ્યાસ્તદ્વચનં શ્રુત્વા હર્ષયુક્તાશ્ચ દાનવાઃ ।
તત્ર સંસ્થાસ્તતો દક્ષ નિઃશ્વાસોચ્છ્વાસસંયુતાઃ ॥ ૧૯॥

એતસ્મિન્નન્તરે તત્રાજગ્મુર્વિષ્ણુપુરોગમાઃ ।
દેવા ઉદાયુધાઃ સર્વે દૈત્યાન્ હન્તું પ્રચક્રમુઃ ॥ ૨૦॥

તાનુવાચ ભૃગોઃ પત્ની મા હિંસ્યત સુરોત્તમાઃ ।
દૈત્યાન્ માં શરણં પ્રાપ્તાન્રાજ્યહીનાન્ વિશેષતઃ ॥ ૨૧॥

તામનાદૃત્ય દેવેન્દ્રો વિષ્ણુના પ્રેરિતઃ સ્વયમ્ ।
વજ્રં ધૃત્વા યયૌ હન્તું દૈત્યાન્ ક્રોધવિલોચનઃ ॥ ૨૨॥

તતો ભૃગોશ્ચ પત્ની સા ચુકોપ તપસા સ્વયમ્ ।
સવજ્રં દેવરાજં તં સ્તમ્ભિતં પ્રચકાર હ ॥ ૨૩॥

તદ્ દૃષ્ટ્વા વિષ્ણુના તત્ર ચક્રેણ ક્ષુરનેમિના ।
શિરશ્છિન્નં ભૃગોઃ પત્ન્યાઃ સા પપાત ધરાતલે ॥ ૨૪॥

એતસ્મિન્નેવ કાલે તુ ભૃગુસ્તત્ર સમાગતઃ ।
મૃતાં પત્નીં તથા દૃષ્ટ્વા ચુકોપારુણલોચનઃ ॥ ૨૫॥

શશાપ વિષ્ણુમાવેશાત્ પત ત્વં પૃથિવીતલે ।
બ્રાહ્મણીવધદોષેણ દેવાધમ ન બુદ્ધ્યસિ ॥ ૨૬॥

ભૃગુણા તપસા સ્વેન જ્ઞાનેનાઽપિ પ્રજાપતે ।
જીવયુક્તા કૃતા પત્ની રક્ષિતા દાનવાસ્તથા ॥ ૨૭॥

તતોઽતિદુઃખિતો દેવો વિષ્ણુઃ શોકસમન્વિતઃ ।
શરણં વિઘ્નરાજં તં યયૌ ક્ષેત્રે મયૂરકે ॥ ૨૮॥

તત્રાઽતિતપસા દેવં વર્ષમાત્રં પ્રજાપતે ।
નિરાહારેણ ભક્ત્યા સ તોષયામાસ વિઘ્નપમ્ ॥ ૨૯॥

તતસ્તં ગણરાજઃ સ યયૌ ભક્તિનિયન્ત્રિતઃ ।
ઉવાચ ચ મહાવિષ્ણું વરં વૃણુ હૃદીપ્સિતમ્ ॥ ૩૦॥

ગણેશં પ્રણનામાથોત્થાયાઽસૌ વિષ્ટરશ્રવાઃ ।
(Page ખં. ૩ અ. ૪૦ પાન ૮૮)
પુપૂજ ભક્તિભાવેન તં તુષ્ટાવ ગજાનનમ્ ॥ ૩૧॥

અથર્વશિરસા તેન સ્તુતસ્તં પ્રત્યુવાચ હ ।
વરં વરય દાસ્યામિ મા ખેદં કુરુ કેશવ ॥ ૩૨॥

શ્રીવિષ્ણુરુવાચ ।
યદિ પ્રસન્નભાવેન વરદોઽસિ ગજાનન ।
શાપં મે ભૃગુસમ્ભૂતં નિવર્તય મહાપ્રભો ॥ ૩૩॥

અત્રૈવ વાસસંસ્થાનં દેહિ તે ભજનાય મે ।
નિર્વિઘ્નં સર્વદા સ્વામિન્ કુરુ માં ત્વત્પદપ્રિયમ્ ॥ ૩૪॥

ઓમિત્યુક્ત્વા સ્વયં ઢુણ્ઢિરૂચિવાન્ ભક્તમુત્તમમ્ ।
મા ચિન્તાં કુરુ વિષ્ણો ત્વં શૃણુ મે પરમં વચઃ ॥ ૩૫॥

ભૃગોર્મદીયભક્તસ્ય તસ્ય વાણીં ન વૈ મૃષા ।
કરિષ્યામિ કદા તસ્માન્ મૃત્યુલોકે પતિષ્યસિ ॥ ૩૬॥

તત્રૈવ તે સદા જ્ઞાનં નષ્ટં નૈવ ભવિષ્યતિ ।
મત્પ્રસાદાચ્ચ દેવેશ સ્વેચ્છાચારી સદા સુખી ॥ ૩૭॥

દેવૈઃ સમ્પ્રાર્થિતસ્ત્વં વૈ દૈત્યાદીનાં વધાય ચ ।
ધર્મસંસ્થાપનાર્થાયાઽવતારં પ્રધરિષ્યસિ ॥ ૩૮॥

તત્ર તે કીર્તિરત્યન્તં ભવિષ્યતિ વિશેષતઃ ।
યશો મહત્ પૃથિવ્યાં ત્વં સ્થાપયિષ્યસિ કેશવ ॥ ૩૯॥

તત્ર ત્વદીયભક્તાશ્ચ ભવિષ્યન્તિ વિશેષતઃ ।
તેષાં ચતુર્વિધાં વાઞ્છાં પૂરયિષ્યસિ નિત્યદા ॥ ૪૦॥

પુનશ્ચ દેવકાર્યં ચ કૃત્વા દેવ જનાર્દન ।
વિકુણ્ઠે તે સદા વાસો ભવિષ્યતિ ન સંશયઃ ॥ ૪૧॥

સ્વેચ્છયા દેહવાંસ્ત્વં વૈ ભવિષ્યસિ ન સંશયઃ ।

મત્પ્રસાદાત્ હૃષીકેશ સર્વં તે વાઞ્છિતં ભવેત્ ॥ ૪૨॥

અન્યત્ત્વયા ચ દેવેશ પ્રાર્થિતં તદ્ ભવિષ્યતિ ।
વસ ત્વં ક્ષેત્રગો ભૂત્વા સ્થાનં દત્તં મયાઽક્ષયમ્ ॥ ૪૩॥

ઇત્યુક્ત્વાંઽતર્દધે દક્ષ ગણેશઃ કરુણાનિધિઃ ।
વિષ્ણુના તત્ર સંવાસઃ કૃતો ભક્ત્યા પ્રજાપતે ॥ ૪૪॥

પૂર્વદિગ્ભાગદેશે વૈ સ્થાપિતો ગણનાયકઃ ।
વિષ્ણુર્વિનાયક ઇતિ નામ તસ્ય કૃતં દ્વિજૈઃ ॥ ૪૫॥

એત્તતે કથિતં દક્ષ દેહધારણકારણમ્ ।
વિષ્ણોર્દેવાધિપસ્યાઽપિ નાનાયોનિસમુદ્ભવઃ ॥ ૪૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે વિષ્ણુદેહધારણવર્ણનં નામૈકોનચત્વારિંશોઽધ્યાયઃ ॥ ૩.૩૯

## ૩.૪૦ માણ્ડવ્યચરિતં નામ ચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ।
મુદ્ગલ ઉવાચ ।
પુરોર્વંશે મહાભાગા રાજાનો ધર્મશાલિનઃ ।
બભૂવુર્યજ્ઞકર્તારઃ સ્વધર્મનિરતાઃ કિલ ॥ ૧॥

તેષાં ચરિત્રમત્યન્તં કથનાય ન શક્યતે ।
બહુત્વાત્ કારણં દક્ષ શ◌ૃણુ તે કથયામ્યહમ્ ॥ ૨॥

પૂરોર્વંશે મહારાજ શન્તનુઃ પ્રબભૂવ હ ।
વિખ્યાતો ધર્મશીલશ્ચ પ્રજાપાલનતત્પરઃ ॥ ૩॥

તસ્ય પુત્રોઽભવચ્છ્રેષ્ઠો ભીષ્મો ધર્મપરાયણઃ ।
ગઙ્ગાયાં સર્વશાસ્ત્રજ્ઞો બ્રહ્મચર્યપરાયણઃ ॥ ૪॥

સત્યવત્યાં ચ પુત્રૌ દ્વૌ શન્તનોર્વૈ બભૂવતુઃ ।
ચિત્રાઙ્ગદો મહાબાહુર્વિચિત્રવીર્યકોઽપરઃ ॥ ૫॥

ચિત્રાઙ્ગદો મહાતેજાઃ પસ્પર્ધે ક્ષત્રિયાન્ સદા ।
ચિત્રાઙ્ગદેન યુદ્ધે સ ગન્ધર્વેણ હતોઽભવત્ ॥ ૬॥

વિચિત્રવીર્યકસ્તત્ર યક્ષ્મણા પીડિતોઽભવત્ ।

(Page ખં. ૩ અ. ૪૦ પાન ૮૯)
મૃતઃ સ રોગદોષેણ દુઃખિતાઃ સુહૃદોઽભવન્ ॥ ૭॥

તસ્ય ભાર્યે પ્રજાનાથ દ્વે કાશીરાજપુત્રિકે ।
અમ્બિકાંઽબાલિકા નામ્ન્યૌ દુઃખિતે તે બભૂવતુઃ ॥ ૮॥

સત્યવત્યા કૃતં તત્ર સન્તાનાર્થં મહામુનેઃ ।
વ્યાસસ્ય સ્મરણં દક્ષ સ્વપુત્રસ્ય વિશેષતઃ ॥ ૯॥

સ આગત ઉવાચૈનાં કિમર્થં દુઃખિતા વદ ।
માતસ્તે દુઃખનાશં ચ કરિષ્યામિ ન સંશયઃ ॥ ૧૦॥

તં પ્રત્યુવાચ સા દેવી વંશવૃદ્ધિં કુરુ પ્રભો ।
વિચિત્રવીર્યક્ષેત્રે ત્વં મદાજ્ઞાવશગો ભવ ॥ ૧૧॥

તથેતિ તેન વંશસ્ય કૃતા વૃદ્ધિઃ પ્રજાપતે ।
કુત્સિતં વેષમાસ્થાય રાત્રૌ રેમે મહામુનિઃ ॥ ૧૨॥

અમ્બિકાયાં મુનેર્વીર્યાત્ ધૃતરાષ્ટ્રો બભૂવ હ ।
પાણ્ડુરમ્બાલિકાયાં વૈ દાસ્યાં ચ વિદુરોઽભવત્ ॥ ૧૩॥

યમોઽયં વિદુરઃ સાક્ષાચ્છૂદ્રયોનૌ સમુદ્ભવન્ ।
માણ્ડવ્યશાપભોગાર્થં નીતિજ્ઞઃ સ બભૂવ હ ॥ ૧૪॥

દક્ષ ઉવાચ ।
કથં માણ્ડવ્યશાપશ્ચ યમેશસ્ય પુરાઽભવત્ ।
ધર્મમાર્ગરતસ્યાપિ સ્વપરેષુ સમસ્ય ભોઃ ॥ ૧૫॥

મુદ્ગલ ઉવાચ ।
સમ્યક્ પૃષ્ટં ત્વયા નાથ શ઼ૃણુ તસ્ય કથાનકમ્ ।
પુરાતનભવં તેઽહં કથયામિ સવિસ્તરમ્ ॥ ૧૬॥

માણ્ડવ્યો મુનિવર્યઃ સ વને તપસિ સંસ્થિતઃ ।
તત્ર ચોરા ધનં હૃત્વા પલન્તશ્ચ સમાયયુઃ ॥ ૧૭॥

રાજ્ઞશ્ચ વીરમુખ્યાસ્તન્નિશાયાં ધર્તુમાયયુઃ ।
ચોરાંશ્ચોરૈર્ધનં સર્વં સ્થાપિતં મુનિસન્નિધૌ ॥ ૧૮॥

ધનં ત્યક્ત્વા ગતાશ્ચોરા વને વૈ યત્ર તત્ર તે ।
રાજદૂતૈર્ધનં દૃષ્ટં સઙ્ગૃહ્ય કુપિતા ભૃશમ્ ॥ ૧૯॥

તતો મુનિં તિરસ્કૃત્ય મૌનભાવસમન્વિતમ્ ।
સઙ્ગૃહ્ય તાડયન્તસ્ત આયયુર્નગરે સ્વકે ॥ ૨૦॥

રાજાનં તે સમાચખ્યુર્ધનં દત્ત્વા યથાતથમ્ ।
વૃત્તાન્તં ચોરસમ્ભૂતં નૃપોઽપિ કુપિતોઽભવત્ ॥ ૨૧॥

શૂલે પ્રોતવ્ય એવં ચેદ્ભવદ્ભિશ્ચોરસત્તમઃ ।
તથેતિ તૈઃ કૃતં તત્ર હસ્તે પ્રોતો મહામુનિઃ ॥ ૨૨॥

તત્ર દુઃખસમાયુક્તો માણ્ડવ્યસ્તપસિ સ્થિતઃ ।
સસ્માર સ્વગુરું વિપ્રં કશ્યપં સૃષ્ટિકારકમ્ ॥ ૨૩॥

સ્મૃતમાત્રઃ સ તસ્યાઽગ્રે કશ્યપઃ સહસાઽઽયયૌ ।
તં તથા દુઃખસંયુક્તં દૃષ્ટ્વા સન્દુઃખિતોઽભવત્ ॥ ૨૪॥

ઉવાચ તં સ્વશિષ્યં સ ભજ ત્વં ગણનાયકમ્ ।
સર્વવિઘ્નનિહન્તારં ભક્તેભ્યઃ શાન્તિદાયકમ્ ॥ ૨૫॥

તતસ્તં મુનિશાર્દૂલં માણ્ડવ્યઃ પ્રજગાદ વૈ ।
કેન માર્ગેણ વિઘ્નેશં તં ભજામિ વદસ્વ મામ્ ॥ ૨૬॥

તસ્ય તદ્વચનં શ્રુત્વા કશ્યપસ્તમુવાચ હ ।
ગણેશસ્ય સ્વરૂપં વૈ ભક્તેભ્યઃ સુખદં પરમ્ ॥ ૨૭॥

કશ્યપ ઉવાચ ।
પઞ્ચધા ચિત્તવૃત્તેશ્ચ ચાલકોઽયં ગજાનનઃ ।
ચિન્તામણિરિતિ ખ્યાતો વેદાન્તે વેદવાદિભિઃ ॥ ૨૮॥

સમ્પ્રજ્ઞાતસ્વરૂપો વૈ દેહસ્તસ્ય મહામુને ।
અસમ્પ્રજ્ઞાતરૂપં ચ શિરો ગણપતેઃ સ્મૃતમ્ ॥ ૨૯॥

તેનાઽયં ગજવક્ત્રોઽભૂદ્ગજશબ્દં વિચારય ।
ભ્રમરૂપાં મહામાયાં સિદ્ધિં વિદ્ધિ મહામતે ॥ ૩૦॥

ભ્રમધારકરૂપાં ત્વં બુદ્ધિં જાનીહિ સત્તમ ।
તયોઃ સ્વામી ગણાધીશો યોગાકારઃ પ્રદૃશ્યતે ॥ ૩૧॥

તં ભજસ્વ વિધાનેન યોગશાન્તિમયં મુને ।
(Page ખં. ૩ અ. ૪૦ પાન ૯૦)
તેન ત્વં વિઘ્નસંહીનો ભવિષ્યસિ ન સંશયઃ ॥ ૩૨॥

ઇત્યુક્ત્વા સ ગણેશસ્ય દદૌ તસ્મૈ મહામુનિઃ ।
એકાક્ષરવિધાનેન કવચં શાસ્ત્રસમ્મતમ્ ॥ ૩૩॥

આજ્ઞાં સઙ્ગૃહ્ય વિપ્રેશઃ કશ્યપઃ સ્વાલયં યયૌ ।
માણ્ડવ્યસ્તત્ર વિઘ્નેશમભજદ્ભાવસંયુતઃ ॥ ૩૪॥

કવચં ગણરાજસ્ય દધાર મુનિસત્તમઃ ।
કવચે સન્ધૃતે દક્ષ પીડાહીનો બભૂવ હ ॥ ૩૫॥

તત્રૈવ સહસા રાજા કસ્મૈ કાર્યાર્થમાયયૌ ।
દદર્શ તં મહાવિપ્રં પ્રણનામ કૃતાઞ્જલિઃ ॥ ૩૬॥

રુદોદ ભયસંયુક્તો વચસ્તં મુનિરબ્રવીત્ ।
મા રુદ ત્વં મહીપાલ નૈવ શાપં દદામ્યહમ્ ॥ ૩૭॥

મદીયકર્મદોષેણ શૂલપ્રોતોઽહમેવ ચ ।
અજાનતા ત્વયા રાજન્ કૃતં તેન સહામ્યહમ્ ॥ ૩૮॥

તતો નૃપેણ વિપ્રાર્થે લોહકારવિચક્ષણાઃ ।
સમાનીતાશ્ચ તૈસ્તત્ર કૃતો યત્નો વિશેષતઃ ॥ ૩૯॥

શૂલાગ્રં હસ્તગં તત્રૈકભાગં સઙ્ગતં બભૌ ।
નિષ્કાસિતું ન શક્તાસ્તે વ્યાકુલા ભયસંયુતાઃ ॥ ૪૦॥

શસ્ત્રૈઃ સઞ્છેદિતં તૈસ્તત્ શૂલાગ્રં હસ્તગં વિધે ।
યાવન્માત્રં મુનેર્હસ્તે સંસ્થિતં તત્સ્થિતં બભૌ ॥ ૪૧॥

રાજ્ઞા સમ્પૂજિતો વિપ્રઃ પ્રયયૌ યમસન્નિધિમ્ ।
ઉવાચ કોપરક્તાક્ષો યમં યમવતાં વરમ્ ॥ ૪૨॥

માણ્ડવ્ય ઉવાચ ।
મયા કિં પ્રકૃતં કર્મ પાપરૂપં વદસ્વ મામ્ ।
યેનાઽહં શૂલજં દુઃખં પ્રાપ્તઃ શીઘ્રં મહાશઠ ॥ ૪૩॥

તસ્ય ક્રોધયુતં વાક્યં શ્રુત્વા ભયસમન્વિતઃ ।
પ્રાઞ્જલિઃ પ્રત્યુવાચેદં વચનં કર્મસૂચકમ્ ॥ ૪૪॥

યમ ઉવાચ ।
બાલભાવે ત્વયા બ્રહ્મન્ કીટઃ કણ્ટકવેધિતઃ ।
તત્કર્મણઃ ફલં પ્રાપ્તં તદેવ મુનિસત્તમ ॥ ૪૫॥

તસ્ય તદ્વચનં શ્રુત્વા ક્રોધયુક્તો મહામુનિઃ ।
જગાદ ધર્મરાજં તં માણ્ડવ્યશ્ચ પ્રજાપતે ॥ ૪૬॥

અહો બાલસ્વભાવેન કૃતં કર્મ મયા કિલ ।
અજ્ઞાનેન મહામૂર્ખ તસ્યેદં કિં ફલં ભવેત્ ॥ ૪૭॥

અતો નીતિવિહીનસ્ત્વં પતિષ્યસિ ધરાતલે ।
શૂદ્રયોનૌ શતં વર્ષાણિ ભુક્ત્વા પુનરેષ્યસિ ॥ ૪૮॥

અધુનાઽહં કરોમ્યેતાં મર્યાદાં શ‍ૃણુ ભાનુજ ।
અષ્ટવર્ષવયોયુક્તૈઃ કૃતં કર્મ હિ નિષ્ફલમ્ ॥ ૪૯॥

મમ વાક્યેન ભવતુ ગણરાજપ્રસાદતઃ ।
તદાદિ બાલકૈઃ કર્મ કૃતં તન્નિષ્ફલં ભવેત્ ॥ ૫૦॥

માણ્ડવ્યઃ સ્વાશ્રમે ગત્વા તતાપ તપ ઉત્તમમ્ ।
એકાક્ષરવિધાનેન તોષયામાસ વિઘ્નપમ્ ॥ ૫૧॥

કવચસ્ય પ્રસાદેન શૂલાગ્રં તસ્ય હસ્તગમ્ ।
બભૂવ માંસરૂપં તુ યથાપૂર્વં કરો બભૌ ॥ ૫૨॥

અણિમાણ્ડવ્યકો નામ્ના તદાદિ સ બભૂવ હ ।
સ્વલ્પકાલેન યોગીશો ગાણપત્યપ્રિયોઽભવત્ ॥ ૫૩॥

નિત્યં ગણપતેર્વિપ્રો મૂર્તિપૂજાપરોઽભવત્ ।
સદા ગણેશભાવજ્ઞઃ સર્વવન્દ્યો મહાયશાઃ ॥ ૫૪॥

માણ્ડવ્યચરિતં પુણ્યં યઃ શ‍ૃણોતિ નરોત્તમઃ ।
પઠેદ્વા તસ્ય વિઘ્નેશઃ પ્રસન્નો જાયતે સદા ॥ ૫૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે માણ્ડવ્યચરિતં નામ ચત્વારિંશોઽધ્યાયઃ ॥ ૩.૪૦
(Page ખં. ૩ અ. ૪૧ પાન ૯૧)

## ૩.૪૧ યુધિષ્ઠિરકૃષ્ણસમાગમો નામૈકચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
ધૃતરાષ્ટ્રં ચ જન્માન્ધં ત્યક્ત્વા પાણ્ડું પ્રચક્રિરે ।

રાજાનં બ્રાહ્મણાઃ સર્વે સ વિજિગ્યે વસુન્ધરામ્ ॥ ૧॥

છત્રાદિ રાજચિહ્નૈસ્તં જ્યેષ્ઠં ભક્તિપરાયણઃ ।
ધૃતરાષ્ટ્રં ચકારાઽસૌ પાણ્ડુઃ પરપુરઞ્જયઃ ॥ ૨॥

ધૃતરાષ્ટ્રસ્ય ભાર્યાઽભૂદ્ગાન્ધારી ચ પતિવ્રતા ।
પાણ્ડોઃ કુન્તી તથા માદ્રી ભાર્યે દ્વે પ્રબભૂવતુઃ ॥ ૩॥

ભાર્યાભ્યાં સંયુતો રાજા વનં પાણ્ડુર્જગામ હ ।
ક્રીડાર્થં તત્ર નિત્યં સ રેમે હર્ષેણ સંયુતઃ ॥ ૪॥

મૃગરૂપધરં રાજા મુનિં જઘ્ને શરેણ સઃ ।
મૃગ્યાસક્તં શશાપાઽસૌ રાજાનં મરણોન્મુખઃ ॥ ૫॥

ભાર્યાસંસક્તરૂપં માં હતવાંશ્ચ નૃપાધમ ।
અતસ્ત્વં ભાર્યયા સક્તો મૈથુનાય ભવિષ્યસિ ॥ ૬॥

તદા તે મરણં સદ્યો મમ વાક્યાદ્ભવિષ્યતિ ।
ઇત્યુક્ત્વા દેહસન્ત્યાગં ચકાર દ્વિજસત્તમઃ ॥ ૭॥

શ્રુત્વા શાપં મહાઘોરં રાજ્યં ત્યક્ત્વા વને સ્થિતઃ ।
ભાર્યાભ્યાં સહિતઃ પાણ્ડુઃ કન્દમૂલાદિ ભક્ષયન્ ॥ ૮॥

તતઃ કુન્ત્યાં સમુદ્ભૂતો ધર્માદ્ધર્મભૃતાં વરઃ ।
યુધિષ્ઠિરો મહાભાગો મન્ત્રસામર્થ્યકારણાત્ ॥ ૯॥

વાયોશ્ચ ભીમસેનો વૈ બભૂવ બલસંયુતઃ ।
ઇન્દ્રાત્ કુન્ત્યામર્જુનઃ સ ધનુર્વિદ્યાપરાયણઃ ॥ ૧૦॥

અશ્વિભ્યાં નકુલસ્તદ્વત્ સહદેવશ્ચ વીર્યવાન્ ।
માદ્યાં ધર્મરતૌ દક્ષ રૂપલાવણ્યસંયુતૌ ॥ ૧૧॥

ગાન્ધાર્યાં ચ શતં પૂર્ણં પુત્રાણામમિતૌજસામ્ ।
બભૂવ પુત્રિકા દક્ષ રૂપલાવણ્યસંયુતા ॥ ૧૨॥

પાણ્ડુઃ શાપવિમોહેન માદ્યાં સક્તો મમાર હ ।
સા વૈ સહગતા જાતા કુન્તી પુત્રાનપાલયત્ ॥ ૧૩॥

બ્રાહ્મણૈઃ સા મહાભાગૈરાનીતા હસ્તિનાપુરે ।
પુત્રૈઃ કુન્તી તથા ભીષ્માદિભિઃ સમ્માનિતાઽવસત્ ॥ ૧૪॥

તતો બહૌ ગતે કાલેઽનુજૈર્દુર્યોધનઃ સ હ ।
પાણ્ડવાન્ દ્વેષસંયુક્તોઽપીડયત્ સ વિષાદિના ॥ ૧૫॥

દગ્ધું તેનૈકદા લાક્ષાગૃહે સંસ્થાપિતાઃ કિલ ।
પાણ્ડવાઃ સહ માત્રા તે રક્ષિતાઃ કર્મણા તદા ॥ ૧૬॥

ઇત્યાદિવિવિધૈર્ભાવૈઃ દ્વેષયુક્તઃ સ દુર્મતિઃ ।
પીડયામાસ તાન્ શૂરાંસ્તતો ભીષ્મ ઉવાચ હ ॥ ૧૭॥

અર્ધં રાજ્યં ચ સઙ્ગૃહ્ય પુરાદ્ ગચ્છન્તુ પાણ્ડવાઃ ।
ઇન્દ્રપ્રસ્થં તતો જગ્મુર્ધૃતરાષ્ટ્રપ્રચોદિતાઃ ॥ ૧૮॥

તત્ર દિગ્વિજયં કૃત્વા શ્રિયા યુક્તાશ્ચ તેઽભવન્ ।
કૃષ્ણસ્તેષાં મહાભાગઃ પક્ષગ્રાહી બભૂવ હ ॥ ૧૯॥

રાજસૂયમખં કૃત્વા શુશુભુઃ પાણ્ડવાસ્તતઃ ।
યત્ર દુર્યોધનો રાજાઽભવન્મનસિ દુઃખિતઃ ॥ ૨૦॥

ધૃતરાષ્ટ્રેણ દુર્બુદ્ધિરાનયામાસ પાણ્ડવાન્ ।
દ્યૂતેન તાન્ મહાભાગાન્ જિત્વા સંહર્ષિતોઽભવત્ ॥ ૨૧॥

વનેષુ સ્થાપયામાસ પાણ્ડવાન્ સાહસપ્રિયઃ ।
વર્ષાણિ દ્વાદશાઽથૈકં વર્ષં ગુપ્તતયા તથા ॥ ૨૨॥

ત્યક્ત્વા રાજ્યાદિકં સર્વં પાણ્ડવા વનમાયયુઃ ।
તત્રાઽજગામ તાન્ કૃષ્ણો બલભદ્રેણ સંયુતઃ ॥ ૨૩॥

પાણ્ડવાન્ સાન્ત્વયામાસ ક્રોધયુક્તો બભૂવ સઃ ।
દુર્યોધનં હનિષ્યામિ મહાદુષ્ટં યુધિષ્ઠિર ॥ ૨૪॥

કુરુ રાજ્યં મયા દત્તં શત્રુહીનં વિશેષતઃ ।
બ્રુવન્તં તં તતઃ કૃષ્ણં જગાદ સ યુધિષ્ઠિરઃ ॥ ૨૫॥

ધર્મયુક્તતયા રાજ્યં કરિષ્યામિ જનાર્દન ।
(Page  ખં. ૩ અ. ૪૨ પાન ૯૨)
અહં નાધર્મસંયુક્તં રાજ્યમિચ્છામિ પાપદમ્ ॥ ૨૬॥

અતઃ કોપં મહાબાહો નિયચ્છ મમ વાક્યતઃ ।
વદ ત્વં ધર્મસંયુક્તમુપાયં રાજ્યલાભદમ્ ॥ ૨૭॥

તતઃ કૃષ્ણઃ સ્વયં તત્ર કોપહીન ઉવાચ હ ।

યુધિષ્ઠિરં સ દ્રૌપદ્યા ભ્રાતૃભિસ્તં સમન્વિતમ્ ॥ ૨૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે યુધિષ્ઠિરકૃષ્ણસમાગમો નામૈકચત્વારિંશોઽધ્યાયઃ ॥ ૩.૪૧

## ૩.૪૨ લક્ષ્મીનારાયણસંવાદવર્ણનં નામ દ્વિચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
શ‍ૃણુ દક્ષ મહાભાગ ચરિતં વિઘ્નપસ્ય ચ ।
કૃષ્ણઃ સઙ્કથયામાસ પાણ્ડવાનમિતદ્યુતિઃ ॥ ૧॥

શ્રીકૃષ્ણ ઉવાચ ।
યુધિષ્ઠિર મહાપુણ્યશીલઃ શ‍ૃણુ વચો મહત્ ।
યેન ત્વં સઙ્કટેભ્યશ્ચ મુક્તઃ સન્ સુખમાપ્સ્યસિ ॥ ૨॥

ઇતિહાસં પુરાવૃત્તં કથયામિ સમાસતઃ ।
સર્વવિઘ્નહરં પુણ્યં મહોદરગુણૈર્યુતમ્ ॥ ૩॥

એકદા દેવદેવેશો વિષ્ણુર્વૈકુણ્ઠસંસ્થિતઃ ।
લક્ષ્મ્યા સહ વિલાસેન વિષ્વક્સેનાદિભિર્વૃતઃ ॥ ૪॥

ગરુડેન સમીપસ્થેન સદા હર્ષસંયુતઃ ।
અપ્સરોભિશ્ચ ગન્ધર્વૈર્દેવૈઃ સંસેવિતો બભૌ ॥ ૫॥

તમુવાચ મહાભાગં ભગવન્તં સનાતનમ્ ।
શ‍ૃણ્વત્સુ સર્વદેવેષુ લક્ષ્મીર્વિનયસંયુતા ॥ ૬॥

શ્રીલક્ષ્મીરુવાચ ।
સ્વામિન્નિચ્છામિ વિજ્ઞાતું મમ ત્વં સતતં ગતિઃ ।
સ્ત્રીણાં ભર્તૃસમં નૈવાસ્તિ કિઞ્ચિદ્વેદભાષિતમ્ ॥ ૭॥

ત્વં સાક્ષાદ્દેવદેવેશઃ શઙ્કરાદ્યૈઃ સુસંસ્તુતઃ ।
ષડૈશ્વર્યસમાયુક્તો ભક્તેભ્યઃ સિદ્ધિદાયકઃ ॥ ૮॥

દેવાદીનાં પદપ્રાપ્તિસ્ત્વત્તો નૈવાત્ર સંશયઃ ।
સર્વેભ્યો ભુક્તિદાતા ત્વં મુક્તિદાતા તથા ભવાન્ ॥ ૯॥

સર્વેષાં પાલકસ્ત્વં વૈ તવ પાતા ન વિદ્યતે ।

તદપિ ધ્યાનસંયુક્તો ભજસે કં વદસ્વ મે ॥ ૧૦॥

એકાન્તે પૂજયસિ કં દેવં ત્વં વિષ્ટરશ્રવાઃ ।
આનન્દં પરમં બ્રહ્મ તદેવ ત્વં શ્રુતેર્મુખાત્ ॥ ૧૧॥

વિસ્માપયતિ માં ચિત્તે ત્વયા ધ્યાનં કૃતં પ્રભો ।
અધુના ત્વાં ચ નિર્લજ્જા નાથ પૃચ્છામિ તે નમઃ ॥ ૧૨॥

સંશયચ્છેદનાર્થં માં વદ વિષ્ણો વિશેષતઃ ।
દાસીં તે પાદપદ્મસ્ય દ્વન્દ્વહીનઃ સદા મતઃ ॥ ૧૩॥

સર્વત્ર સમરૂપસ્ત્વં સદાઽઽનન્દમયસ્તતઃ ।
તસ્માત્પરં કિમત્રાઽસ્તિ કથં મોહયસે જનાન્ ॥ ૧૪॥

ધ્યાનેન પૂજનેનૈવ ફલં કિં તે ભવિષ્યતિ ।
તથાઽપિ ત્વં કિમર્થં ભો ધ્યાનયુક્તોઽસિ કેશવ ॥ ૧૫॥

શ્રીકૃષ્ણ ઉવાચ ।
ઇતિ પ્રિયાવચઃ શ્રુત્વા તાં પ્રહસ્ય જનાર્દનઃ ।
સમાલિઙ્ગ્ય પ્રજાનાથ ઉવાચ જલધેઃ સુતામ્ ॥ ૧૬॥

શ્રીવિષ્ણુરુવાચ ।
શ‍ૃણુ પ્રિયે પ્રવક્ષ્યામિ ત્વયા પૃષ્ટં શુભપ્રદમ્ ।
તારકં સર્વભૂતાનાં સર્વેભ્યઃ સિદ્ધિદાયકમ્ ॥ ૧૭॥

ન કરોમિ જનાનાં વૈ ધ્યાનં મોહાય નિત્યદા ।
કુલદેવં ગણેશાનં ભજામિ સર્વભાવતઃ ॥ ૧૮॥

ગુણેશ્વરાદ્વયં દેવિ સમુત્પન્ના મહેશ્વરાઃ ।
(Page ખં. ૩ અ. ૪૨ પાન ૯૩)
પઞ્ચ દેવા મહાભાગે તેન સંસ્થાપિતાઃ પદે ॥ ૧૯॥

ગુણેશેન તપસ્તસ્વાઽઽરાધિતો ગણનાયકઃ ।
ગણેશેન ગુણેશશ્ચ સ્થાપિતઃ સ્વપદે પુરા ॥ ૨૦॥

જ્ઞાનસત્તાદિસંયુક્તો જાતસ્તદ્વરદાનતઃ ।
સોઽપિ તં ભજતે દેવિ ગણેશં ભક્તિસંયુતઃ ॥ ૨૧॥

પ્રસેવ્ય તં મહેશાના ગણેશં સર્વદં વયમ્ ।
જાતા જ્ઞાનાદિસંયુક્તાઃ સ્વસ્વકાર્યપ્રવર્તકાઃ ॥ ૨૨॥

અતસ્તં ભાવસંયુક્તા ભજામો નિત્યમાદરાત્ ।
સ વૈ સર્વાર્થદોઽસ્માકં કુલદેવઃ પ્રકીર્તિતઃ ॥ ૨૩॥

વિષ્ણોર્વચનમાકર્ણ્ય લક્ષ્મીર્વિસ્મિતમાનસા ।
જગાદ તં મહાવિષ્ણું વિનયેન સમન્વિતા ॥ ૨૪॥

શ્રીલક્ષ્મીરુવાચ ।
કોઽસૌ ગણેશ્વરો નામ વદ તસ્ય વિશેષતઃ ।
સ્વરૂપં કુલદેવસ્ય ભજિષ્યામિ જનાર્દન ॥ ૨૫॥

શ્રીવિષ્ણુરુવાચ ।
સમ્યક્ પૃષ્ટં ત્વયા દેવિ શ‍ૃણુ તસ્ય સ્વરૂપકમ્ ।
વદામિ સ્નેહયુક્તોઽહં યદિ તં બોધયિષ્યસિ ॥ ૨૬॥

સ્વાનન્દે સોઽપિ વસતિ ગણેશો બ્રહ્મનાયકઃ ।
સ્વાનન્દઃ પઞ્ચધા જાતઃ શ‍ૃણુ તસ્ય કથાનકમ્ ॥ ૨૭॥

નામરૂપાત્મકં દેવિ જગતિ બ્રહ્મણિ સ્થિતમ્ ।
તત્ર સ્વાનન્દકો યોગોઽસદ્રૂપઃ પરિકથ્યતે ॥ ૨૮॥

અસત્યમૃતરૂપં યત્તત્ સદાત્મપ્રવાચકમ્ ।
સત્સ્વરૂપં ચ તદ્વિદ્ધિ સત્ સ્વાનન્દઃ પ્રકીર્તિતઃ ॥ ૨૯॥

સત્યાસત્યવિહીનં યત્ સત્યાસત્યમયં તથા ।
આનન્દાત્મકરૂપં તત્ સમસ્વાનન્દ ઉચ્યતે ॥ ૩૦॥

ત્રિપ્રબોધં ત્રિભિર્હીનં મોહહીનં સદા મતમ્ ।
નેતિરૂપં મહાભાગે સ્વાનન્દોઽવ્યક્ત ઉચ્યતે ॥ ૩૧॥

ચતુર્ણાં યોગભાવોઽયં સમાધિર્જાયતે કિલ ।
સ્વાનન્દઃ પઞ્ચમો હ્યત્ર સર્વસંયોગ ઉચ્યતે ॥ ૩૨॥

સ વૈ માયામયઃ પ્રોક્તો ગણેશો વેદવાદિભિઃ ।
ચતુર્ધા રચિતં તેન તેષુ ખેલતિ નિત્યદા ॥ ૩૩॥

માયાહીનતયા ઢુણ્ઢિરભૂત્ સોઽયોગવાચકઃ ।
ન તત્ર કસ્ય સંયોગો બુધૈસ્તસ્યાપિ કથ્યતે ॥ ૩૪॥

માયાયુક્તવિહીનત્વં તદેવ ભ્રાન્તિદાયકમ્ ।
તાભ્યાં હીનો ગણેશોઽયં યોગરૂપઃ પ્રકથ્યતે ॥ ૩૫॥

તત્ર શાન્તિર્ભવેદ્દેવિ યોગિનાં નાત્ર સંશયઃ ।
અતો યોગસ્વરૂપા સા કથ્યતે શાન્તિરુત્તમા ॥ ૩૬॥

મનોવાણીમયં સર્વં ગકારાક્ષરવાચકમ્ ।
મનોવાણીવિહીનં વૈ ણકારાક્ષરરૂપકમ્ ॥ ૩૭॥

તયોઃ સ્વામી ગણાધીશઃ પશ્ય વેદે શુચિસ્મિતે ।
અતસ્તં ભક્તિસંયુક્તો ભજેઽહં સર્વનાયકમ્ ॥ ૩૮॥

ભ્રમરૂપાં મહામાયાં સિદ્ધિં જાનીહિ માનદે ।
સિદ્ધ્યર્થં સર્વલોકાશ્ચ વિભ્રમન્તીશ્વરા અતઃ ॥ ૩૯॥

ભ્રમધારકરૂપાં વૈ બુદ્ધિં જાનીહિ નિશ્ચિતમ્ ।
સિદ્ધ્યા બુદ્ધ્યા ચ તત્રૈવ ભ્રમોત્પત્તિઃ પ્રજાયતે ॥ ૪૦॥

તયોઃ સ્વામી સદાયોગશાન્તિરૂપોઽયમુચ્યતે ।
તસ્યૈવ ભજને દેવિ બ્રહ્મભૂતા ભવન્ત્યતઃ ॥ ૪૧॥

ઇત્યુક્ત્વા વિરરામાઽથ સ્વયં નારાયણઃ પ્રભુઃ ।
શ્રુત્વા સમુદ્રપુત્રી સા વિસ્મિતા માનસેઽભવત્ ॥ ૪૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે લક્ષ્મીનારાયણસંવાદવર્ણનં નામ દ્વિચત્વારિંશોઽધ્યાયઃ ॥ ૩.૪૨
(Page ખં. ૩ અ. ૪૩ પાન ૯૪)

## ૩.૪૩ મહાલક્ષ્મીવરપ્રદાનવર્ણનં નામ ત્રિચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શ્રીકૃષ્ણ ઉવાચ ।
શ‌ૃણુ ધર્મ મહાભાગ કથાં પાપાપનોદિનીમ્ ।
લક્ષ્મીસ્તં પુનરપ્યાહ ગણેશજ્ઞાનલાલસા ॥ ૧॥

શ્રીમહાલક્ષ્મીરુવાચ ।
ભગવન્ ભવતા પ્રોક્તં મહાશાન્તિપ્રદં પરમ્ ।
તથાઽપિ મે સુશાન્ત્યર્થં તત્રોપાયં વદસ્વ મે ॥ ૨॥

શ્રીનારાયણ ઉવાચ ।
ષડક્ષરેણ મન્ત્રેણ યદિ તં સાધયિષ્યસિ ।

તદા તે ગણનાથઃ સ પ્રત્યક્ષં પ્રભવિષ્યતિ ॥ ૩॥

તસ્ય દર્શનમાત્રેણ શાન્તિં પ્રાપ્સ્યસિ નિશ્ચિતમ્ ।
તમારાધય યત્નેન તપસા યોગભાવિતા ॥ ૪॥

એવમુક્ત્વા મહાવિષ્ણુર્ગણેશસ્ય દદૌ મનુમ્ ।
ષડક્ષરં મહાલક્ષ્મ્યૈ વિધિયુક્તં વિધાનતઃ ॥ ૫॥

તતઃ સા તં પ્રણમ્યૈવ તપસે વનમાયયૌ ।
હિમાચલશિરઃસંસ્થા તતાપ તપ ઉત્તમમ્ ॥ ૬॥

ષડક્ષરવિધાનેન ધ્યાત્વા દેવં ગજાનનમ્ ।
જજાપ મન્ત્રરાજં તં નાસાગ્રનયના સતી ॥ ૭॥

ચિત્તસ્ય ચેન્દ્રિયાણાં સંસ્થાપ્ય વૃત્તિં ગજાનને ।
નિરાહારયુતા દેવી બભૂવ તપસિ સ્થિતા ॥ ૮॥

શતવર્ષે ગતે પૂર્ણે સાસ્થિચર્માઽવશેષિતા ।
તામાઽઽયયૌ ગણાધીશો ભક્ત્યા બદ્ધો ધરાપતે ॥ ૯॥

તમાગતં મહાદેવી પ્રણનામ ચતુર્ભુજમ્ ।
મહોદરં ત્રિનેત્રં ચ પરશ્વાદિધરં પ્રભુમ્ ॥ ૧૦॥

મૂષકધ્વજિનં પૂર્ણં મૂષકોપરિ સંસ્થિતમ્ ।
સિદ્ધિબુદ્ધિસમાયુક્તં નાનાભૂષણભૂષિતમ્ ॥ ૧૧॥

ગલે ચિન્તામણિમણિં બિભ્રતં જ્યોતિષાં પતિમ્ ।
શેષનાભિં ગજાસ્યં વૈ પીતવસ્ત્રૈશ્ચ શોભિતમ્ ॥ ૧૨॥

તતસ્તં પૂજયામાસ પ્રભું નાનોપચારકૈઃ ।
પ્રણમ્યોત્થાય તુષ્ટાવ કૃત્વા કરપુટં સતી ॥ ૧૩॥

શ્રીમહાલક્ષ્મીરુવાચ ।
નમો મહોદરાયૈવ નાનાલીલાધરાય તે ।
સદા સ્વાનન્દસંસ્થાય ભક્તિગમ્યાય વૈ નમઃ ॥ ૧૪॥

ચતુર્બાહુધરાયૈવ ચતુર્ણાં ચાલકાય તે ।
મૂષકારૂઢરૂપાય મૂષકધ્વજિને નમઃ ॥ ૧૫॥

અન્નતાનનદેહાય હ્યનન્તવિભવાય તે ।
અનન્તહસ્તપાદાય સદાઽનન્તાય તે નમઃ ॥ ૧૬॥

ચરાચરમયાયૈવ ચરાચરવિવર્જિત ।
યોગશાન્તિપ્રદાત્રે તે સદા યોગસ્વરૂપિણે ॥ ૧૭॥

અનાદયે ગણેશાયાદિમધ્યાન્તસ્વરૂપિણે ।
આદિમધ્યાન્તહીનાય વિઘ્નેશાય નમો નમઃ ॥ ૧૮॥

સર્વાદિપૂજ્યકાયૈવ સર્વપૂજ્યાય તે નમઃ ।
સર્વેષાં કારણાયૈવ જ્યેષ્ઠરાજાય તે નમઃ ॥ ૧૯॥

વિનાયકાય સર્વેષાં નાયકાય વિશેષતઃ ।
ઢુણ્ઢિરાજાય હેરમ્બ ભક્તેશાય નમો નમઃ ॥ ૨૦॥

સૃષ્ટિકર્ત્રે સૃષ્ટિહર્ત્રે પાલકાય નમો નમઃ ।
ત્રિભિર્હીનાય દેવેશ ગુણેશાય નમો નમઃ ॥ ૨૧॥

કર્મણાં ફલદાત્રે ચ કર્મણાં ચાલકાય તે ।
કર્માકર્માદિહીનાય લમ્બોદર નમોઽસ્તુ તે ॥ ૨૨॥

યોગેશાય ચ યોગિભ્યો યોગદાય ગજાનન ।
સદા શાન્તિઘનાયૈવ બ્રહ્મભૂતાય તે નમઃ ॥ ૨૩॥

કિં સ્તૌમિ ગણનાથં ત્વાં સદા બ્રહ્મપતિં પ્રભો ।
અતસ્ત્વાં પ્રણમામ્યેવ તેન તુષ્ટો ભવ પ્રભો ॥ ૨૪॥

ધન્યાઽહં કૃતકૃત્યાઽહં સફલો મે ભવોઽભવત્ ।
ધન્યો મે જનકો નાથો યયા દૃષ્ટો ગજાનનઃ ॥ ૨૫॥

એવં સ્તુતવતી સા તં ભક્તિયુક્તેન ચેતસા ।
સાશ્રુયુક્તા નનર્તૈવ બાષ્પકણ્ઠા યુધિષ્ઠિર ॥ ૨૬॥

(Page ખં. ૩ અ. ૪૩ પાન ૯૫)
તામુવાચ ગણાધીશો વરં વૃણુ યથેપ્સિતમ્ ।
દાસ્યામિ તે મહાલક્ષ્મિ ભક્તિભાવેન તોષિતઃ ॥ ૨૭॥

ત્વયા કૃતં ચ મે સ્તોત્રં ભુક્તિમુક્તિપ્રદં ભવેત્ ।
પઠતાં શ‍ૃણ્વતાં દેવિ નાનાકાર્યકરં તથા ॥ ૨૮॥

પુત્રપૌત્રાદિકં સર્વં લભતે સ્તોત્રપાઠતઃ ।
ધનધાન્યાદિસમ્ભૂતં સુખં વિન્દતિ માનવઃ ॥ ૨૯॥

ગણેશવચનં શ્રુત્વા મહાલક્ષ્મીર્જગાદ તમ્ ।
હર્ષેણ મહતા યુક્તા પ્રણમ્ય કરસમ્પુટા ॥ ૩૦॥

શ્રીમહાલક્ષ્મીરુવાચ ।
યદિ પ્રસન્નભાવેન વરદોઽસિ મહોદર ।
તદા તે ભક્તિમુગ્રાં મે દેહિ નાથ નમોઽસ્તુ તે ॥ ૩૧॥

અસ્માકં કુલદેવસ્ત્વં તત્ર ત્વાં ગણનાયક ।
ભજામિ ભાવયુક્તાઽહં તથાપિ શ ૃણુ મે વચઃ ॥ ૩૨॥

મનશ્ચઞ્ચલભાવેન સંસારે ગચ્છતિ પ્રભો ।
સંસારઃ પુત્રમોહાખ્યસ્તદર્થં ભ્રમતે સદા ॥ ૩૩॥

અતસ્ત્વં પુત્રભાવેન ભવ મે વિઘ્નવારણ ।
તત્ર ત્વાં પુત્રવાત્સલ્યેન ભજામિ નિરન્તરમ્ ॥ ૩૪॥

દેવભાવેન તે મૂર્તિં ગજવક્ત્રાદિચિહ્નિતામ્ ।
ભજામિ ચ તથા ત્વાહં સંસારે પુત્રરૂપિણમ્ ॥ ૩૫॥

યોગરૂપઃ સ્વયં સાક્ષાદ્યદિ પુત્રો ભવિષ્યસિ ।
તેન યોગસ્વરૂપા સા શાન્તિઃ પ્રાપ્તા ન સંશયઃ ॥ ૩૬॥

તવ માતા પિતા ચૈવ બન્ધયુક્તૌ યદિ પ્રભો ।
તદા વેદાદિકં સર્વં મિથ્યારૂપં ભવિષ્યતિ ॥ ૩૭॥

અતો મે પુત્રતાં યાહિ તયાઽહં ગણનાયક ।
ભજામિ બ્રહ્મભૂતા ન સન્દેહો ભક્તિસંયુતા ॥ ૩૮॥

મહ્યમેષ વરો નાથ દાતવ્યઃ કરુણાનિધે ।
નાન્યં યાચે મહાભાગ દેવદેવેશ તે નમઃ ॥ ૩૯॥

ઇતિ લક્ષ્મ્યા વચઃ શ્રુત્વા હર્ષયન્ સ મહોદરઃ ।
ઉવાચ તાં સુભાવજ્ઞો ભાવપૂર ઇતિ સ્મૃતઃ ॥ ૪૦॥

ગણેશ ઉવાચ ।
તવ પુત્રો ભવિષ્યામિ જ્ઞાનારેર્નાશનાય ચ ।
દૈત્યસ્ય તે પ્રસેવાર્થં ભક્તિગ્રહણલાલસઃ ॥ ૪૧॥

યદ્યદિચ્છસિ તત્તત્ત્વં લભસે દેવિ નિશ્ચિતમ્ ।
મદીયવરદાનેન યોગિવન્દ્યા ભવિષ્યસિ ॥ ૪૨॥

આદૌ ત્વયા મહાદેવિ મદીયં ભજનં કૃતમ્ ।
તેન શાન્તિયુતા જાતા યોગસ્થા મોહવર્જિતા ॥ ૪૩॥

તતસ્ત્વાં તપસા વિપ્રો ભૃગુઃ પુત્રીં ચકાર હ ।
સા ત્વં નષ્ટા દ્વિજસ્યૈવ શાપતો મોહસંયુતા ॥ ૪૪॥

સમુદ્રેણ તતો દેવિ તથૈવાઽઽરાધિતા પુરા ।
તસ્ય પુત્રીત્વમાપન્ના ત્વં વિષ્ણોર્દયિતા સદા ॥ ૪૫॥

તેન તે વિસ્મૃતિર્જાતા મદીયા નાત્ર સંશયઃ ।
વિષ્ણુના બોધિતા માં ત્વં પ્રાપ્તા યોગસ્ય સેવયા ॥ ૪૬॥

અધુના સ્મર સર્વં તત્ સ્મારિતં તે મયાઽનઘે ।
વિષ્ણુનાઽપ્યાદિકાલેઽહં પુત્રાર્થે યાચિતોઽભવમ્ ॥ ૪૭॥

ત્વં તથા પુત્રભાવાર્થં યાચસે માં સમુદ્રજે ।
કરોમિ તે હિતં દેવિ વિષ્ણોશ્ચૈવ ન સંશયઃ ॥ ૪૮॥

એવમુક્ત્વા ગણેશસ્તાં યયૌ સ્વાનન્દકે પુરે ।
અન્તર્ધાય સ્વમાત્માનં લક્ષ્મીઃ ખિન્ના તતોઽભવત્ ॥ ૪૯॥

સ્મૃત્વા યોગબલેનૈવ પુરાતનભવાં કથામ્ ।
વિસ્મિતા માનસે જાતા સસ્માર દ્વિરદાનનમ્ ॥ ૫૦॥

મૂર્તિં તત્ર પ્રતિષ્ઠાપ્ય બ્રાહ્મણૈર્વેદપારગૈઃ ।
પૂજયિત્વા યયૌ સ્થાનં લક્ષ્મીર્ભક્તિસમન્વિતા ॥ ૫૧॥

(Page  ખં. ૩ અ. ૪૪ પાન ૯૬)
પ્રણમ્ય તં મહાવિષ્ણું જગાદ સર્વમઞ્જસા ।
વૃત્તાન્તં સોઽપિ તં શ્રુત્વા હર્ષિતસ્તામુવાચ હ ॥ ૫૨॥

ધન્યાઽસિ જલધેઃ પુત્રિ સાક્ષાદ્ દૃષ્ટસ્ત્વયા વિભુઃ ।
પુત્રભાવેન તે ગેહ આગમિષ્યતિ વિઘ્નપઃ ॥ ૫૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે મહાલક્ષ્મીવરપ્રદાનવર્ણનં નામ ત્રિચત્વારિંશોઽધ્યાયઃ ॥ ૩.૪૩

# ૩.૪૪ જ્ઞાનારિવરપ્રાપ્તિવર્ણનં નામ ચતુશ્ચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

યુધિષ્ઠિર ઉવાચ ।
તવ કૃષ્ણમુખામ્ભોજાન્નિઃસૃતાં સર્વપાવનીમ્ ।
કથાં શ્રુત્વા ન મે તૃપ્તિર્જાયતેઽમૃતપાનવત્ ॥ ૧॥

જ્ઞાનારિર્નામ દૈત્યેશઃ કસ્ય પુત્રો બભૂવ હ ।
કિં કર્મ તસ્ય યત્ કૃષ્ણ ચેષ્ટિતં વદ વિસ્તરાત્ ॥ ૨॥

યદર્થં ગણરાજઃ સ દેહધારી બભૂવ હ ।
ન સામાન્યં ચરિત્રં વૈ દૈત્યેશસ્ય જગદ્ગુરો ॥ ૩॥

કથં વિષ્ણોશ્ચ પુત્રોઽભૂદ્ગણેશો બ્રહ્મનાયકઃ ।
ચરિત્રં કિં કૃતં તેન વિસ્તરાદ્વદ કેશવ ॥ ૪॥

મુદ્ગલ ઉવાચ ।
યુધિષ્ઠિરસ્ય ભાવં સ જ્ઞાત્વા વૃષ્ણિકુલોદ્ભવઃ ।
નારાયણઃ કથાં તસ્મૈ અવદદ્ભવનાશિનીમ્ ॥ ૫॥

શ્રીકૃષ્ણ ઉવાચ ।
યુધિષ્ઠિર કથાં રમ્યાં શ‍ૃણુ પાપાપનોદિનીમ્ ।
બ્રહ્મભૂયપ્રદાં ઢુણ્ઢેઃ સુચરિત્રાશ્રિતાં પ્રભોઃ ॥ ૬॥

દુર્બુદ્ધિર્નામ દૈત્યેશો હતો વિઘ્નહરેણ ચ ।
શિવપુત્રસ્વરૂપેણ ત્રૈલોક્યવિજયી પુરા ॥ ૭॥

તસ્ય પુત્રોઽયમુત્પન્નઃ સંસ્થિતઃ સ્વગૃહે તથા ।
બાલભાવાચ્ચ ધર્મજ્ઞાઽભવત્ જ્ઞાનારિનામકઃ ॥ ૮॥

પ્રહ્લાદઃ સ્વસુતાં તસ્મૈ દદૌ હર્ષસમન્વિતઃ ।
રૂપલાવણ્યસંયુક્તાં સુકલાં નામતઃ સ્વયમ્ ॥ ૯॥

સ તુ યૌવનમાપન્નો દુર્મતિં પિતરં સદા ।
સસ્માર દુઃખસંયુક્તો ગણેશેન હતં પુરા ॥ ૧૦॥

સ શુક્રમુપસઙ્ગમ્ય વિદ્યાં પઞ્ચાક્ષરીમગાત્ ।
શૈવીં તયા વને ગત્વાઽઽરાધયામાસ શઙ્કરમ્ ॥ ૧૧॥

વાયુભક્ષો મહાદૈત્યો જ્ઞાનારિર્યત્નમાસ્થિતઃ ।

તતાપ તપ ઉગ્રં સ વર્ષાણામયુતં પ્રભો ॥ ૧૨॥

તતસ્તં પ્રયયૌ શમ્ભુઃ પાર્વત્યા સહિતઃ સ્વયમ્ ।
ઉવાચ તં મહાભક્તં ભક્તવાઞ્છાપ્રપૂરકઃ ॥ ૧૩॥

શ્રીશિવ ઉવાચ ।
વરં વૃણુ મહાભાગ તપસા તોષિતસ્ત્વયા ।
દાસ્યામિ વાઞ્છિતં દૈત્ય યદ્યપિ સ્યાત્ સુદુર્લભમ્ ॥ ૧૪॥

શિવસ્ય વચનં શ્રુત્વા પ્રબુદ્ધો દૈત્યપુઙ્ગવઃ ।
દૃષ્ટ્વા શમ્ભું મુદા યુક્તઃ પ્રણનામ કૃતાઞ્જલિઃ ॥ ૧૫॥

પ્રણમ્ય પૂજયામાસ તતસ્તં દૈત્યપઃ પુનઃ ।
તુષ્ટાવ સુસ્થિરો ભૂત્વા શઙ્કરં ભક્તવત્સલમ્ ॥ ૧૬॥

જ્ઞાનારિરુવાચ ।
નમસ્તે શઙ્કરાયૈવ પાર્વતીસહિતાય તે ।
વૃષધ્વજાય શૈલાદિવાહનાય નમો નમઃ ॥ ૧૭॥

અવ્યક્તદેવાય ચ શિવાય શૂલપ્રધારિણે ।
નિર્ગુણાય ગુણાનાં તે ચાલકાય નમો નમઃ ॥ ૧૮॥

સદાશિવાય માયાયા આધારાય નમો નમઃ ।
(Page ખં. ૩ અ. ૪૫ પાન ૯૭)
માયામોહવિહીનાય શમ્ભવે તે નમો નમઃ ॥ ૧૯॥

સૃષ્ટેઃ કર્ત્રે ચ પાત્રે તે સંહર્ત્રે ત્રિસ્વરૂપિણે ।
અનાથાય ચ સર્વેષાં નાથાય પરમાત્મને ॥ ૨૦॥

ચરાચરસ્વરૂપાય નમોઽચરચરાત્મને ।
મહાદેવાય દેવાનાં પતયે તે નમો નમઃ ॥ ૨૧॥

મનોવાગતિરૂપાય યોગિધ્યેયાય તે નમઃ ।
યોગિનાં પતયે ચૈવ મહેશ્વર નમોઽસ્તુ તે ॥ ૨૨॥

ધન્યો વંશો મદીયોઽદ્ય યેન દૃષ્ટો મહેશ્વરઃ ।
તપો જ્ઞાનં પિતા માતા ધન્યા મે નાઽત્ર સંશયઃ ॥ ૨૩॥

પ્રસન્નોઽસિ મહેશાન તદા દેહિ મહાપ્રભો ।
ચરાચરસ્ય વૈ રાજ્યં તસ્માન્ મૃત્યુર્ન મે ભવેત્ ॥ ૨૪॥

યદ્યદિચ્છામિ દેવેશ તત્તત્ સિદ્ધ્યતુ સર્વદા ।
આરોગ્યાદિ સમાયુક્તં માં કુરુષ્વ સદાશિવ ॥ ૨૫॥

તથેતિ શિવ ઊચે તમન્તર્ધાનં ચકાર હ ।
સ દૈત્યો હર્ષિતોઽત્યન્તં સ્વગૃહં પ્રત્યપદ્યત ॥ ૨૬॥

જ્ઞાનારિકૃતમેતત્તુ સ્તોત્રં પઠતિ યો નરઃ ।
શ્ૃણોતિ શઙ્કરસ્તસ્મૈ વાઞ્છિતં દદતે પરમ્ ॥ ૨૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે જ્ઞાનારિવરપ્રાપ્તિવર્ણનં નામ ચતુશ્ચત્વારિંશોઽધ્યાયઃ ॥ ૩.૪૪

## ૩.૪૫ પૂર્ણાનન્દાવતારો નામ પઞ્ચચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શ્રીકૃષ્ણ ઉવાચ ।
જ્ઞાનારિર્વરસંયુક્તોઽભવદ્દૈત્યૈઃ પ્રપૂજિતઃ ।
શુક્રેણાઽઽગત્ય વિપ્રૈઃ સોઽભિષિક્તો રાજ્યકર્મણિ ॥ ૧॥

નમુચિઃ શમ્બરઃ કાલાસુરશ્ચૈવ પ્રતાપવાન્ ।
જમ્ભો બલાસુરઃ પઞ્ચ પ્રધાનાસ્તસ્ય ચાઽભવન્ ॥ ૨॥

નાનાદૈત્યગણૈર્યુક્તઃ પૃથિવીં સપ્તસાગરામ્ ।
દૈત્યો વિજિગ્યે સદ્વીપાં તથા પાતાલમોજસા ॥ ૩॥

તતઃ સ્વર્ગં યયૌ દૈત્યો દૈત્યપૈશ્ચ સમાવૃતઃ ।
ઇન્દ્રઃ સુરગણૈઃ સાર્ધં પપાલ ભયસઙ્કુલઃ ॥ ૪॥

જ્ઞાનારિઃ સત્યલોકં ચ યયૌ દૈત્યસમન્વિતઃ ।
તત્ર બ્રહ્મસ્થિતો દેવૈર્જ્ઞાત્વા દૈત્યં પપાલ સઃ ॥ ૫॥

વિષ્ણુર્વૈકુણ્ઠમુત્સૃજ્ય પપાલ ચ યુધિષ્ઠિર ।
દૈત્યસ્તત્ર સમાગમ્ય હર્ષિતઃ સમ્બભૂવ હ ॥ ૬॥

જગામ તત આનન્દાત્ કૈલાસં દૈત્યનાયકઃ ।
શઙ્કરં પ્રણિપત્યાઽઽહ કૈલાસં દેહિ મે પ્રભો ॥ ૭॥

નોચેદ્યુદ્ધેન જેષ્યામિ ત્વામહં નાત્ર સંશયઃ ।
શઙ્કરઃ ક્ષુભિતો ભૂત્વા કમ્પિતઃ પ્રદદૌ તથા ॥ ૮॥

પપાલ ભયસંયુક્તઃ સામરઃ સ વનં યયૌ ।
કૈલાસે સંસ્થિતો દૈત્યો નનન્દ ભૃશમોહિતઃ ॥ ૯॥

તતઃ સ્વર્ગેષુ દૈત્યેશાન્ સ્થાપયામાસ નિર્ભયઃ ।
યયૌ સ્વનગરે ધર્મ દૈત્યપૈઃ સંવૃતો બભૌ ॥ ૧૦॥

સુકલાયાં મહાદૈત્યાત્ પુત્રોઽભૂચ્ચ યુધિષ્ઠિર ।
સુમુહૂર્તે મહાતેજા રૂપેણાઽપ્રતિમઃ પરઃ ॥ ૧૧॥

પુત્રજન્મપ્રહૃષ્ટઃ સ દદૌ દાનાનિ ભૂમિપ ।
જાતકર્માદિકં કર્મ ચકાર વિધિપૂર્વકમ્ ॥ ૧૨॥

સદા કર્મવિનાશાર્થં પ્રેષયામાસ દૈત્યપાન્ ।
તૈઃ સર્વત્ર કૃતો નાશઃ કર્મણાં ભૂમિમણ્ડલે ॥ ૧૩॥

(Page ખં. ૩ અ. ૪૫ પાન ૯૮)
ન સ્વાહા ન વષટ્કારો ન સ્વધા કુત્રચિત્ પ્રભો ।
કર્મહીનતયા દેવા દુઃખિતા અભવંસ્તતઃ ॥ ૧૪॥

ઉપોષણસમાયુક્તા વિચારં ચક્રુરાદરાત્ ।
જ્ઞાનારિનાશનાર્થાય ન પ્રાપુસ્તે વિચક્ષણાઃ ॥ ૧૫॥

ગતે બહુતરે કાલે કિં કુર્યામિતિ વિહ્વલાઃ ।
તત્ર વિષ્ણુરુવાચેદં વચનં હિતકારકમ્ ॥ ૧૬॥

શ્રીવિષ્ણુરુવાચ ।
ચરાચરમયં સર્વં તસ્માત્તસ્ય ભયં નહિ ।
અતો વિઘ્નેશ્વરં દેવા ભજામાઽત્ર ન સંશયઃ ॥ ૧૭॥

સ વૈ બુદ્ધિપતિઃ સાક્ષાદ્બુદ્ધ્યા છિદ્રં પ્રકાશયેત્ ।
તેન તં નિહનિષ્યામઃ સિદ્ધિદાતા સ નો ભવેત્ ॥ ૧૮॥

વિષ્ણોર્વચનમાકર્ણ્ય સાધુ સાધુ દિવૌકસઃ ।
ઊચુસ્તં તે તતો ઢુણ્ઢિમભજન્ ભક્તિસંયુતાઃ ॥ ૧૯॥

દશાક્ષરેણ મન્ત્રેણ ધ્યાત્વા દેવં ગજાનનમ્ ।
અતુષ્યન્નમરાઃ સર્વે વિભો નાનાતપોન્વિતાઃ ॥ ૨૦॥

ગતે વર્ષે ગણાધીશઃ પ્રસન્નઃ સ સમાયયૌ ।
રાત્રૌ સ્વપ્ને ચ લક્ષ્મ્યાસ્તામુવાચ વચનં હિતમ્ ॥ ૨૧॥

શ‍ૃણુ માતસ્ત્વયા પૂર્વં યાચિતઃ પુત્રકામ્યયા ।
સોઽહં તે પુત્રભાવેન સંસ્થિતઃ પશ્ય ભામિનિ ॥ ૨૨॥

એવમુક્ત્વાન્તર્દધેઽસૌ ગણેશો ગણવલ્લભઃ ।
લક્ષ્મ્યુત્સઙ્ગે તતો બાલો ભૂત્વા ચિક્રીડ વિઘ્નપઃ ॥ ૨૩॥

જજાગાર મહાલક્ષ્મીર્ગણેશં મનસાઽસ્મરત્ ।
દદર્શ નિજશય્યાયાં બાલં શુણ્ડાધરં પરમ્ ॥ ૨૪॥

વિસ્મિતા હર્ષિતાઽત્યન્તં નારાયણમુવાચ હ ।
વૃત્તાન્તં સા મહાભાગા દર્શયામાસ વિઘ્નપમ્ ॥ ૨૫॥

સસ્ત્રીકઃ પ્રણનામાઽથ તુષ્ટાવ ગણપં પ્રભુમ્ ।
ગાણપત્યૈર્મહાસૂક્તૈર્હર્ષયુક્તશ્ચ માધવઃ ॥ ૨૬॥

ધન્યોઽહં સર્વભાવેન ત્વદઙ્ઘ્રિયુગદર્શનાત્ ।
પુત્રભાવેન માં પાલયસિ નાથ ન સંશયઃ ॥ ૨૭॥

તતસ્તત્રામરાઃ સર્વે મુનયશ્ચ સમાગતાઃ ।
વિસ્મિતાસ્તુષ્ટુવસ્તં તે નાનાસ્તોત્રૈર્યુધિષ્ઠિર ॥ ૨૮॥

તતસ્તે જાતકર્માઽપિ ચક્રુઃ પરમભાવિતાઃ ।
એકાદશદિને તસ્ય મુનયો નામ ચક્રિરે ॥ ૨૯॥

દ્વન્દ્વભાવવિહીનોઽયં સાક્ષાદાનન્દદાયકઃ ।
સમો દ્વન્દ્વેષુ સર્વેષુ તદ્વિકારવિવર્જિતઃ ॥ ૩૦॥

અતો નામાઽસ્ય દેવેશાઃ પૂર્ણાનન્દ ઇતિ સ્ફુટમ્ ।
કુરુધ્વં સર્વદાઽઽનન્દદાયકો નો ભવિષ્યતિ ॥ ૩૧॥

તથેતિ નામ તૈઃ સર્વૈઃ કૃતં તસ્ય મહાત્મનઃ ।
ચકાર વ્રતબન્ધં ચ પઞ્ચમે વિષ્ણુરવ્યયઃ ॥ ૩૨॥

કશ્યપસ્ય ગૃહે દેવ્યૌ સમ્ભૂતે પુત્રિકાત્મિકે ।
વિદ્યાઽવિદ્યે તતોઽદિત્યાં તપસાઽઽરાધિતે વિભો ॥ ૩૩॥

તસ્મૈ દદૌ મુદા યુક્તઃ કશ્યપઃ સમ્પ્રહર્ષિતઃ ।
નનામ પૂર્ણાનન્દાય વિપ્રેશો ભક્તિસંયુતઃ ॥ ૩૪॥

દ્વાદશાબ્દવયો યુક્તો બભૂવ ગણનાયકઃ ।
બાલક્રીડનકેનૈવ મોહયામાસ દેવપાન્ ॥ ૩૫॥

સ્તનપાનાદિકં તસ્ય ભોજનાચ્છાદનાદિકમ્ ।
લક્ષ્મીઃ સ્વયં ચકારૈવ હર્ષયુક્તેન ચેતસા ॥ ૩૬॥

વિષ્ણુસ્તં લાલયામાસ નિત્યં દેવગણૈર્વૃતઃ ।
જામાતરં કશ્યપશ્ચ તથા વિપ્રૈર્યુધિષ્ઠિર ॥ ૩૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે પૂર્ણાનન્દાવતારો નામ પઞ્ચચત્વારિંશોઽધ્યાયઃ ॥ ૩.૪૫
(Page ખં. ૩ અ. ૪૬ પાન ૯૯)

## ૩.૪૬ બ્રહ્મયજ્ઞવર્ણનં નામ ષટ્ચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

યુધિષ્ઠિર ઉવાચ ।
કૃષ્ણ કૃષ્ણ મહાભાગ વદ દૈત્યસ્ય ચેષ્ટિતમ્ ।
પૂર્ણાનન્દઃ કથં દૈત્યં જઘાન કૌતુકં મહત્ ॥ ૧॥

ચરાચરાદ્ભયં તસ્ય નાસ્તિ નારાયણ પ્રભો ।
અત આશ્ચર્યભૂતં વૈ ચરિત્રં મે પ્રભાસતે ॥ ૨॥

મુદ્ગલ ઉવાચ ।
યુધિષ્ઠિરવચઃ શ્રુત્વા કૃષ્ણસ્તં પ્રત્યુવાચ યત્ ।
તદેવ શ‍ૃણુ દક્ષ ત્વં ચેષ્ટિતં ગણપસ્ય ચ ॥ ૩॥

શ્રીકૃષ્ણ ઉવાચ ।
પુત્રો બભૂવ દૈત્યસ્ય જ્ઞાનારેઃ સર્વસમ્મતઃ ।
એકાદશદિને તત્ર બ્રાહ્મણા પ્રયયુર્ગૃહમ્ ॥ ૪॥

સુબોધ ઇતિ નામ્ના તં ચક્રુર્દૈત્યેશસત્તમાઃ ।
દ્વિજેરિતા દ્વિજેભ્યસ્તે દદુર્દાનાનિ હર્ષિતાઃ ॥ ૫॥

સ તુ જ્ઞાનસમાયુક્તો ગાણેશો દૈત્યજો નૃપઃ ।
બાલભાવેઽપિ વિઘ્નેશં ચિન્તયામાસ સર્વદા ॥ ૬॥

સ્તનપાનાદિકં બાલઃ સસ્માર ન કદાચન ।
માતા તસ્મૈ યદા સ્મૃત્વા સ્તનપાનં દદૌ પપૌ ॥ ૭॥

એવં સોઽપિ સ્વમાતૃસ્થઃ સ્તનપાનં ચકાર હ ।
સદા ધ્યાનસમાયુક્તઃ સસ્માર ગણપં હૃદિ ॥ ૮॥

તતઃ પઞ્ચ તથા સપ્ત માસાસ્તસ્ય ગતા વિભો ।
વયસઃ સ તદા ચક્રે ક્રીડનં શ઼ૃણુ તત્પ્રભો ॥ ૯॥

ધૂલિમધ્યે સ્વહસ્તેન ચકાર ગણપાકૃતિમ્ ।
ચિક્ષેપ તત્ર ધૂલિં પૂજોપચારકકારણાત્ ॥ ૧૦॥

ત્રિકાલપૂજનં તત્ર ચકાર નિયમેન સઃ ।
ધ્યાનયુક્તેન વિઘ્નેશમભજચ્ચ તતઃ પરમ્ ॥ ૧૧॥

એકદા ભોજનાર્થં ચ સંસ્થિતો દૈત્યનાયકઃ ।
જ્ઞાનારિસ્તં દદર્શૈવ ક્રીડન્તં બાલભાવતઃ ॥ ૧૨॥

ગણેશાકારમૂર્તિં વૈ ભૂમિમધ્યે ચકાર સઃ ।
પૂજયામાસ તાં પુત્રસ્તતો ધૂલ્યુપચારકૈઃ ॥ ૧૩॥

તતોઽતિકુપિતઃ પત્નીમૂચિવાન્ વિસ્મયાન્વિતઃ ।
પિતુર્મમ નિહન્તારં ભજતેઽયં તવાત્મજઃ ॥ ૧૪॥

અધુના નિશ્ચયાભાવાન્ન સુતં હન્મિ તે પ્રિયે ।
સાવધાનમના ભૂત્વા ચેષ્ટાહીનં સુતં કુરુ ॥ ૧૫॥

પિતૃહન્તારમેવાયં કરોતિ તનયો યતઃ ।
પુનર્દૃષ્ટો મયા ચેત્તં હનિષ્યામિ સુતં પ્રિયે ॥ ૧૬॥

સા તથેતિ તમુચ્ચાર્ય સ્થિતા વિનયસંયુતા ।
પતિવ્રતા મહાભાગા પતિવાક્યપરાઽભવત્ ॥ ૧૭॥

ભર્તુર્ગમનકાલે સા સંયતા પુત્રમાદદે ।
લાલયામાસ તં તત્ર ન પશ્યતિ યથા નૃપઃ ॥ ૧૮॥

તતઃ સુબોધનામાઽસૌ વર્ષાદૂર્ધ્વં વયઃસ્થિતઃ ।
ચકાર ભાષણં તત્ર વાચાઽસ્પષ્ટસ્વરૂપયા ॥ ૧૯॥

નમો હેરમ્બ વિઘ્નેશ ગણેશાય મહોદર ।
લમ્બોદરાય વિકટાય નમો ઢુણ્ઢયે નમઃ ॥ ૨૦॥

ઇત્યાદિભાવયુક્તશ્ચ સસ્માર ગણપં સદા ।
અનન્યમનસા ધર્મ તથા પૂજાપરાયણઃ ॥ ૨૧॥

માતાऽऽગૃહ્ય તતઃ સ્નેહવશાત્પુત્રં યુધિષ્ઠિર ।
ભર્ત્રા ગમનકાલે સા દૂરં ચક્રે સખીજનૈઃ ॥ ૨૨॥

યત્નમાસ્થાય સા દેવી પુત્રં નિત્યં રરક્ષ હ ।
કદાચિત્ સા સ્વપતિનાऽऽજ્ઞપ્તા પુત્રં નયસ્વ ચ ॥ ૨૩॥

નિદ્રિતોऽયં સુતઃ સ્વામિન્નેવં પ્રોચ્ય મહાસતી ।
કાલાતિક્રમણં ચક્રે દુઃખયુક્તા યુધિષ્ઠિર ॥ ૨૪॥

પઞ્ચમે વ્રતબન્ધં ચ જ્ઞાનારિસ્તસ્ય હર્ષિતઃ ।
ચકાર સ સુતસ્તત્ર ગણેશં મનસા સ્મરન્ ॥ ૨૫॥

કર્મભઙ્ગભયાત્ સોऽપિ પૂજાં ચક્રે સુમાનસીમ્ ।
(Page ખં. ૩ અ. ૪૬ પાન ૧૦૦)
તતઃ કર્મસમાપ્તૌ વૈ નનામ સકલાન્નૃપ ॥ ૨૬॥

તતો ગુરુકુલે રાજ્ઞા સ્થાપિતોऽભૂત્ સુબોધકઃ ।
તત્ર દૈત્યસુતાઃ સર્વે નાનારૂપાઃ સ્થિતા બભુઃ ॥ ૨૭॥

શુક્રશિષ્યા મહાભાગાઃ તાન્ સર્વાન્ યત્નતઃ સદા ।
વિદ્યાં તાં શિક્ષયામાસુરાસુરીં દેવમોહિનીમ્ ॥ ૨૮॥

તત્રાऽયં રાજપુત્રશ્ચ ગુરુભિર્માનિતો ભૃશમ્ ।
અતિષ્ઠદ્વિઘ્નરાજં સ સંસ્મરન્ ભક્તિલાલસઃ ॥ ૨૯॥

વિદ્યાં શિક્ષયિતું રાજપુત્રો ગુરુભિરાસુરીમ્ ।
સમ્માનિતશ્ચ તાન્ સોऽપિ નમસ્કૃત્ય સ્થિતોऽભવત્ ॥ ૩૦॥

ગુરુભિઃ કથિતં યચ્ચ શ્રુત્વા વિસ્મિતમાનસઃ ।
ઉવાચ તાન્ મહાબુદ્ધિઃ સુબોધો વિષયાત્મકાન્ ॥ ૩૧॥

સુબોધ ઉવાચ ।
બ્રાહ્મણા બ્રહ્મનિષ્ઠાશ્ચ સદા યોગપરાયણાઃ ।
ગાણપત્યા વિશેષેણ ભજન્તે ગણનાયકમ્ ॥ ૩૨॥

ભેદાભેદાદિભિર્હીને ગણેશાર્થે વિચક્ષણાઃ ।
મોહદામાસુરીં વિદ્યાં ત્યક્ત્વા વન્દ્યા ભવન્ત્યતઃ ॥ ૩૩॥

ભવન્તો જ્ઞાનશીલાશ્ચ કિં માં વદથ વિપ્રપાઃ ।

ગણેશં સર્વપૂજ્યં વૈ ત્યક્ત્વા મોહપ્રદં પરમ્ ॥ ૩૪॥

યદા સ્વધર્મનિષ્ઠાશ્ચેદ્બ્રાહ્મણા વચનં તદા ।
તેષાં ગ્રાહ્યં ન સન્દેહો નાન્યથા મોહકં કદા ॥ ૩૫॥

ગુણયુક્તવિહીનાશ્ચેદ્બ્રાહ્મણા માનવૈઃ સદા ।
વન્દનીયા ન સન્દેહઃ પૂજ્યા સર્વત્ર સમ્મતાઃ ॥ ૩૬॥

અતોઽહં બ્રાહ્મણાન્ સર્વાન્નમામિ વચનં તથા ।
હિતં ચેત્તદ્ ગ્રહીષ્યામિ નાન્યથા ગુરવઃ કદા ॥ ૩૭॥

શ્રીકૃષ્ણ ઉવાચ ।
સુબોધસ્ય વચઃ શ્રુત્વા વિસ્મિતાસ્તે મહર્ષયઃ ।
ઊચુસ્તે દૈત્યપુત્રં વૈ શ ૃણુ ધર્મં સુખપ્રદમ્ ॥ ૩૮॥

દૈત્યાચાર્યા ઊચુઃ ।
સુબોધ ત્વં ચ બાલોઽસિ યોગં વદસિ સૂત્તમમ્ ।
સ્વધર્માદિ સમાયુક્તં સાક્ષાદ્યોગીશ્વરો યથા ॥ ૩૯॥

ન ત્વયા વેદવિદ્યા યા શિક્ષિતા સા મહામતે ।
તથાઽપિ કથમેતત્તે જ્ઞાનં પ્રાપ્તં વદસ્વ ભોઃ ॥ ૪૦॥

સુબોધ ઉવાચ ।
માતા ગર્ભવતી મે ગતા પિતૃર્ગૃહ એકદા ।
તત્રાઽઽયયૌ મહાભાગઃ શુકઃ સર્વાર્થકોવિદઃ ॥ ૪૧॥

તં પ્રણમ્ય સ યોગીશં પ્રહ્લાદો હર્ષસંયુતઃ ।
સમ્પૂજ્ય તં મહાત્માનં પપ્રચ્છ વિનયાન્વિતઃ ॥ ૪૨॥

પ્રલ્હાદ ઉવાચ ।
વ્યાસપુત્ર મહાયોગિન્ શુક સાક્ષાચ્છિવઃ સ્વયમ્ ।
ત્વં જાતોઽસિ ન સન્દેહો યોગીન્દ્રાણાં ગુરોર્ગુરુઃ ॥ ૪૩॥

પૂર્વપુણ્યબલેનૈવ પ્રાપ્તં તે દર્શનં મહત્ ।
અતસ્ત્વાં પરિપૃચ્છામિ વદ ત્વં કરુણાનિધે ॥ ૪૪॥

સર્વમાન્યં ચ સર્વેષાં યોગશાન્તિપ્રદં ભવેત્ ।
નાનામતવિમોહસ્ય ચ્છેદકં વદ વિસ્તરાત્ ॥ ૪૫॥

સુબોધ ઉવાચ ।

પ્રહ્લાદસ્ય વચો રમ્યં શ્રુત્વા યોગીન્દ્રસત્તમઃ ।
જગાદ તં મહાભાગં યોગશાન્તિપરાયણમ્ ॥ ૪૬॥

શ્રીશુક ઉવાચ ।
પ્રહ્લાદ ત્વં મહાભાગાઽસિ સુજ્ઞો યોગધારકઃ ।
અતસ્ત્વાં હિ વિશેષેણ વદામિ હિતકારકમ્ ॥ ૪૭॥

સર્વમાન્યં તથા રાજન્ સર્વેભ્યઃ શાન્તિદાયકમ્ ।
નાનામતેષુ સેવ્યં યત્ કથયામિ સવિસ્તરમ્ ॥ ૪૮॥

એકદા નૈમિષારણ્યે સમાજગ્મુર્મહર્ષયઃ ।
બ્રહ્માણ્ડસ્થા મહાભાગા બ્રહ્મયજ્ઞસ્ય કારણાત્ ॥ ૪૯॥

યત્ર યોગમયી ગાથા વર્તતે દાનવોત્તમ ।
(Page ખં. ૩ અ. ૪૭ પાન ૧૦૧)
વેદેષુ સ બ્રહ્મયજ્ઞ ઇત્યુક્તો વેદવાદિભિઃ ॥ ૫૦॥

મરીચિઃ કશ્યપશ્ચૈવ કણ્વોઽત્રિઃ પુલહઃ ક્રતુઃ ।
વિશ્વામિત્રો મહાતેજા યાજ્ઞવલ્ક્યસ્તથાઽઽરુણિઃ ॥ ૫૧॥

અષ્ટાવક્રો વસિષ્ઠશ્ચ ભરદ્વાજઃ પરાશરઃ ।
વ્યાસઃ પરશુરામઃ શ્વેતકેતુર્મુદ્ગલો મુનિઃ ॥ ૫૨॥

અગસ્ત્યો હનુમાંશ્ચૈવ રાક્ષસશ્ચ વિભીષણઃ ।
અશ્વત્થામા ગૃત્સમદઃ કૃપશ્ચૈવ પ્રતાપવાન્ ॥ ૫૩॥

માર્કણ્ડેયો મૃકણ્ડશ્ચ બકદાલ્ભ્યસ્તથા વિભો ।
નારદઃ કપિલો રૈભ્યઃ કર્દમશ્ચ મહાયશાઃ ॥ ૫૪॥

એકો દ્વિતસ્ત્રિતશ્ચૈવ દેવલો હ્યસિતસ્તથા ।
પુલસ્ત્યશ્ચ ભૃગુશ્ચૈવ ચ્યવનો ગૌતમો મુનિઃ ॥ ૫૫॥

અઙ્ગિરા વૈ દીર્ઘતમા ઉતથ્યો ગાલવસ્તથા ।
દધીચિરુશના જીવો જમદગ્નિર્મહામુનિઃ ॥ ૫૬॥

વૈશમ્પાયન એવં વૈ શૌનકઃ શુનકઃ પ્રભો ।
વામદેવઃ સુમન્તુશ્ચ પૈલઃ શાકલકો મુનિઃ ॥ ૫૭॥

જૈમિનિર્ધૌમ્યકાદ્યાશ્ચ સ શિષ્યાસ્તત્ર તે યયુઃ ।
અન્યે નાના મુનિવરા હર્ષયુક્તા યયુઃ કિલ ॥ ૫૮॥

દત્તાત્રેયશ્ચ દુર્વાસા નિદાઘો ભરતો જડઃ ।
સનાતનઃ સનન્દઃ સનત્કુમારક આયયુઃ ॥ ૫૯॥

અહં રિભૂશ્ચ સનક ઇત્યાદ્યા બહવોઽપરે ।
અવધૂતા યોગિનશ્ચ જગ્મુર્યજ્ઞસ્ય દર્શનાત્ ॥ ૬૦॥

ઇન્દ્રો બ્રહ્મા તથા વિષ્ણુઃ શઙ્કરો ભાનુરેવ ચ ।
સસ્ત્રીકા દેવરાજાશ્ચ દેવા અન્યે સમાયયુઃ ॥ ૬૧॥

શેષો વાસુકિનાગશ્ચ કમ્બલોઽશ્વતરસ્તથા ।
તક્ષકાદ્યા મહાભાગા નાગાસ્તત્ર સમાયયુઃ ॥ ૬૨॥

ગન્ધર્વાશ્ચારણાશ્ચૈવ સિદ્ધાઃ સાધ્યગણાસ્તથા ।
આદિત્યા વસવો યક્ષા આયયુશ્ચાપ્સરોવરાઃ ॥ ૬૩॥

કર્મનિષ્ઠાસ્તપોનિષ્ઠા જ્ઞાનનિષ્ઠાશ્ચ યોગિનઃ ।
નાનાદેવરતાઃ સર્વે આયયુસ્તત્ર માનદ ॥ ૬૪॥

પ્રહ્લાદ બ્રહ્મયજ્ઞસ્ય દર્શનાર્થં વિશેષતઃ ।
તત્રૈવ નિશ્ચયે સક્તાઃ સર્વમાન્યેઽભવઞ્જનાઃ ॥ ૬૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે બ્રહ્મયજ્ઞવર્ણનં નામ ષટ્ચત્વારિંશોઽધ્યાયઃ ॥ ૩.૪૬

## ૩.૪૭ બ્રહ્મયજ્ઞે વેદનિર્ણયો નામ સપ્તચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શ્રીશુક ઉવાચ ।
તત્ર નાનાકથાં ચક્રુર્નાનામતવિકાસિનીમ્ ।
સ્વસ્વબુદ્ધ્યા વિશેષેણ મુખ્યાઃ પ્રહ્લાદ આદરાત્ ॥ ૧॥

કેચિદાહુર્વિધાતારં વિષ્ણું શક્તિં શિવં રવિમ્ ।
બ્રહ્મરૂપં ગણેશાનં નાનામતપરાયણાઃ ॥ ૨॥

કેચિદન્નં ચ પ્રાણં ચ મનોવિજ્ઞાનકં તથા ।
આનન્દં સોઽહમેકં વૈ ચૈતન્યં બિન્દુકં પરે ॥ ૩॥

બોધમાત્માનમેકે ચ સાઙ્ખ્યં કર્મ તથાઽપરે ।
સમમવ્યક્તરૂપં તે આહુર્બ્રહ્મ તથાઽપરમ્ ॥ ૪॥

સ્વસંવેદ્યં તથા કેચિન્નિવૃત્તિં શાન્તિરૂપકમ્ ।
યોગમધ્યાત્મરૂપં ત આહુર્વેદપરાયણાઃ ॥ ૫॥

અસત્યં સત્યમેકે ચ પૂર્ણાનન્દં તથાઽસુર ।
સહજં ચ પરં બ્રહ્મ વાદયુક્તા બભૂવિરે ॥ ૬॥

(Page ખં. ૩ અ. ૪૭ પાન ૧૦૨)
નિશ્ચયસ્તત્ર દૈત્યેશ ન બભૂવ મતૈષિણામ્ ।
સ્વસ્વજ્ઞાનસમાયુક્તા વાદં ચક્રુરપણ્ડિતાઃ ॥ ૭॥

તતો વાદસ્ય શાન્ત્યર્થમવોચદ્ વિષ્ણુરવ્યયઃ ।
સર્વાન્ સમાગતાંસ્તત્ર સર્વજ્ઞઃ શઙ્કરેરિતઃ ॥ ૮॥

શ્રીવિષ્ણુરુવાચ ।
વેદા ગુરુસ્વરૂપાશ્ચ સર્વેષાં નાત્ર સંશયઃ ।
તૈર્યત્ સમ્પાદિતં દેવ મુનયઃ સર્વ આગતાઃ ॥ ૯॥

સમ્પાદ્યતાં વિશેષેણ બ્રહ્મણો નિશ્ચયાર્થિનઃ ।
સુખં તદેવ સર્વેષાં સર્વમાન્યં ભવિષ્યતિ ॥ ૧૦॥

વેદૈઃ સ્વાનુભવં ગીતં યાથાતથ્યં મુનીશ્વરાઃ ।
અતો વેદૈશ્ચ સર્વેષાં જ્ઞાનં સઞ્જાયતે પરમ્ ॥ ૧૧॥

યોગાદિભિર્જનાઃ કેચિન્ મુનયો દેવરાક્ષસાઃ ।
સાક્ષાદ્રૂપં ચ તદ્બ્રહ્મ કુર્વતે નાત્ર સંશયઃ ॥ ૧૨॥

તથાપિ વેદસમ્માન્યં વચસ્તેષાં ન વિદ્યતે ।
વેદાનાં ન સમો વિપ્રા યોગજ્ઞઃ કુત્ર દૃશ્યતે ॥ ૧૩॥

સમ્પૂર્ણયોગિનો વેદા અતસ્તે ગુરવો મતાઃ ।
મહાભાગાઃ સ્મરધ્વં ત્વાંસ્તદા નિઃસંશયો ભવેત્ ॥ ૧૪॥

તતો મુનિગણાઃ સર્વે યોગિનો દેવનાયકાઃ ।
સાધુ સાધુ સમૂચુસ્તં વિષ્ણું બુદ્ધિમતાં વરમ્ ॥ ૧૫॥

તતઃ શઙ્કરમુખ્યૈસ્તૈઃ સંસ્મૃતાઃ કાર્યસિદ્ધ્યે ।
સાઙ્ગાઃ સમાયયુર્વેદા ઓઙ્કારેણ સમન્વિતાઃ ॥ ૧૬॥

તાન્ દૃષ્ટ્વા સહસોત્થાય દેવાઃ સર્ષિગણાઃ પરે ।
પ્રણમ્ય પૂજયામાસુઃ કૃતાઞ્જલિપુટાઃ પુરઃ ॥ ૧૭॥

આસનેષુ સમાસીનાઃ સોઙ્કારા વેદમુખ્યકાઃ ।
ઊચુસ્તાન્ શિવમુખ્યાન્ વૈ પ્રહૃષ્ટમનસોઽભવન્ ॥ ૧૮॥

વેદા ઊચુઃ ।
કિમર્થં સ્મરણં દેવા મુનયશ્ચ કૃતં જનાઃ ।
અસ્માકં બ્રૂત કાર્યં તત્ કરિષ્યામો ન સંશયઃ ॥ ૧૯॥

વેદાનાં વચનં શ્રુત્વા શિવસ્તાનબ્રવીદ્વચઃ ।
વિનયેન વિશેષજ્ઞો નિશ્ચયાર્થં હિતૈષિણામ્ ॥ ૨૦॥

શિવ ઉવાચ ।
બ્રહ્મયજ્ઞઃ સમારબ્ધોઽસ્માભિઃ સર્વૈર્હિતેપ્સુભિઃ ।
તત્ર વાદસમાયુક્તા ન તદન્તં લભામહે ॥ ૨૧॥

અતો ભવત્સ્મૃતિર્વેદાઃ કૃતાઽસ્માભિર્વિશેષતઃ ।
નિશ્ચયં ગુરવો યૂયં વદધ્વં ભેદનાશકમ્ ॥ ૨૨॥

યોગિનો ન ભવન્તીહ કદાપિ ચ ભવત્સમાઃ ।
ભવદ્વચઃપ્રમાણેન યોગજ્ઞા વયમપ્યુત ॥ ૨૩॥

શિવસ્ય વચનં શ્રુત્વા વેદાસ્તત્ર જગુર્વચઃ ।
દેવાન્ મુનીન્ જનાન્ સર્વાન્ દીનપા અસુરેશ્વર ॥ ૨૪॥

વેદા ઊચુઃ ।
બ્રહ્મયજ્ઞસ્ય પારં વૈ ગમિષ્યામઃ કથં વયમ્ ।
અક્ષરાત્મકદેહત્વાત્તથાપિ કથયામહે ॥ ૨૫॥

ન વયં બ્રહ્મરૂપાશ્ચ બ્રહ્મજ્ઞાઃ કિઞ્ચિદપ્યહો ।
યોગમાર્ગબલેનૈવ વદિષ્યામો યથાતથમ્ ॥ ૨૬॥

પ્રત્યેકનિશ્ચયં દેવાઃ શ◌ૃણુત બ્રહ્મધારણમ્ ।
યેન સંશયસંહીના ગમિષ્યથ પરાં ગતિમ્ ॥ ૨૭॥

બ્રહ્મ નાનાવિધં પ્રોક્તં મયા યોગબલેન ચ ।
પ્રજ્ઞાનાદિમહાવાક્યૈસ્તેષુ યોગો વિશિષ્યતે ॥ ૨૮॥

સર્વબ્રહ્મસુયોગસ્ય સ્થાનં યોગાત્મકં ભવેત્ ।
યોગે બ્રહ્માણિ સર્વાણિ તદાકારાણિ વર્ણિતમ્ ॥ ૨૯॥

ન યોગાત્ પરમં બ્રહ્મ યોગશાન્ત્યા પ્રલભ્યતે ।

બ્રહ્મણસ્પતિરેકોઽયં મયા પ્રોક્તો ગણેશ્વરઃ ॥ ૩૦॥

બ્રહ્મણાં સકલાનાં ચ પાતૃપાલયિતૃત્વતઃ ।
તં ભજધ્વં સુરશ્રેષ્ઠા મુનયો ભક્તિસંયુતાઃ ॥ ૩૧॥

(Page ખં. ૩ અ. ૪૭ પાન ૧૦૩)
ભવન્તિ બ્રહ્મભૂતાઃ સર્વે જનાસ્તેન નિશ્ચિતમ્ ।
એવમુક્ત્વા બહ્વૃચસ્તુ તૂષ્ણીમ્ભાવધરોઽભવત્ ॥ ૩૨॥

તતો યજુઃ સ્વયં સાક્ષાદવોચત્ સર્વસંસદિ ।
બ્રહ્મપ્રદં ચ વચનં તત્ર સ્વાનુભવાત્મકમ્ ॥ ૩૩॥

યજુરુવાચ ।
નાનાવિધં મયા બ્રહ્મ વર્ણિતં યોગસેવયા ।
મહાવાક્યૈશ્ચ સર્વજ્ઞાઃ ક્રમાર્થં નાત્ર સંશયઃ ॥ ૩૪॥

તત્ર યોગસ્વરૂપાખ્યમાન્ત્યં બ્રહ્મ વિશિષ્યતે ।
સર્વબ્રહ્મસુયોગેન યોગસ્તેન પ્રકથ્યતે ॥ ૩૫॥

તદેવ ગણરાજશ્ચ ભક્તૈઃ સમ્પ્રાર્થિતઃ પુરા ।
યોગપ્રાપ્ત્યર્થમત્યન્તં તેન સાકારકોઽભવત્ ॥ ૩૬॥

ગણઃ સમૂહરૂપાખ્યઃ સમૂહા બ્રહ્મરૂપિણઃ ।
તેષાં સ્વામી ન સન્દેહસ્તં ભજધ્વં વિધાનતઃ ॥ ૩૭॥

અન્નાનાં સકલાનાં ચ સદૈકાનેકરૂપિણામ્ ।
સમૂહે બ્રહ્મ જ્ઞાતવ્યમન્નાત્મકમિતિ શ્રુતિઃ ॥ ૩૮॥

નાનાવિધાનિ ચ બ્રહ્માણ્યેવં ભો દૈવતર્ષયઃ ।
જ્ઞાતવ્યાનિ વિચારેણ ગણરૂપાણિ નિશ્ચિતમ્ ॥ ૩૯॥

અતો ગણેશભક્ત્યા વૈ સકલં સુલભં ભવેત્ ।
બ્રહ્મભૂયપ્રદઃ પ્રોક્તો મયા યોગેન યોગપઃ ॥ ૪૦॥

ઇત્યુક્ત્વા વિરરામાઽથ યજુર્યોગવિદાં વરમ્ ।
ઉવાચાઽથ તતઃ સામ બ્રહ્મ નિર્ણયકારણમ્ ॥ ૪૧॥

સામ ઉવાચ ।
યોગસેવનસામર્થ્યાત્ સમર્થોઽહં ચ વર્ણને ।
કિઞ્ચિત્ શૃણુત દેવેશા બ્રહ્મણો મુનયો વચઃ ॥ ૪૨॥

પ્રોક્તાનિ નાના બ્રહ્માણિ મહાવાક્યાદિભિર્મયા ।
પાત્રભેદાર્થમત્યન્તં જ્ઞાતવ્યં યોગસેવયા ॥ ૪૩॥

તત્ર શાન્તિપ્રદં બ્રહ્મ યોગાખ્યં નાત્ર સંશયઃ ।
ભવતિ બ્રહ્મણાં યોગો યત્ર તેન ચ યોગકઃ ॥ ૪૪॥

નાસ્તિ યોગાત્ પરં બ્રહ્મ શાન્તિમાર્ગેણ લભ્યતે ।
તદેવ મુનયો દેવા ગણેશો નાત્ર સંશયઃ ॥ ૪૫॥

મનોવાણીમયં દેવા મયા યદ્યત્ પ્રકીર્તિતમ્ ।
ગકારાક્ષરસમ્ભૂતં જ્ઞાતવ્યં વિબુધૈઃ સદા ॥ ૪૬॥

મનોવાણીવિહીનં યદ્વર્ણ્યતે વિવિધં તથા ।
ણકારાક્ષરગં સર્વં નિશ્ચિતં યોગસેવયા ॥ ૪૭॥

તયોઃ સ્વામી ગણેશાનો યોગાકારઃ પ્રકીર્તિતઃ ।
તં ભજધ્વં વિશેષેણ બ્રહ્મભૂતપદપ્રદમ્ ॥ ૪૮॥

નાનાભાવેન યુક્તાસ્તં ભજન્તે તદ્દદાતિ સઃ ।
એવમુક્ત્વા મહાયોગી વિરરામ સ સામગઃ ॥ ૪૯॥

તતોઽથર્વા મહાયોગી જગાદ સકલાંસ્તદા ।
બ્રહ્મયજ્ઞસ્ય વેત્તાઽસૌ પ્રહ્લાદ શૃણુ તદ્વચઃ ॥ ૫૦॥

અથર્વા ઉવાચ ।
આત્માઽહમિતિ વાક્યાદ્યૈર્બ્રહ્મ નાનાવિધં મયા ।
સમ્પાદિતં ચ યોગેન તદેવોપાધિસંયુતમ્ ॥ ૫૧॥

યોગાખ્યં પરમં બ્રહ્મ તદ્યોગેન પ્રલભ્યતે ।
સંયોગાયોગહીનોઽયં યોગો બ્રહ્મ સુતિષ્ઠતિ ॥ ૫૨॥

શાન્તિસ્તત્ર સમાખ્યાતા યોગે યોગવિદાં વરઃ ।
સ એવ ગણનાથસ્તુ સર્વશાન્તિપ્રદોઽભવત્ ॥ ૫૩॥

એક એવ ગણેશાનો જગતાં બ્રહ્મણાં સ્વયમ્ ।
ઈશઃ સમૂહરૂપાણાં યોગરૂપસ્તતઃ સ્મૃતઃ ॥ ૫૪॥

સર્વેષામાદિરૂપોઽયં યોગાકારઃ પ્રભાવતઃ ।
મધ્યે નાનાવિધઃ સ્વાંશૈર્જગત્ સુબ્રહ્મ સુપ્રભુઃ ॥ ૫૫॥

અન્તે સ્વયં તથા તિષ્ઠેત્તેનાદૌ પૂજિતોઽભવત્ ।

સર્વપૂજ્યશ્ચ દેવેશા મુનયો નિશ્ચયાર્થિનઃ ॥ ૫૬॥

ય આદિઃ સોઽતરૂપસ્તુ ભવતે સર્વસમ્મતે ।
(Page ખં. ૩ અ. ૪૮ પાન ૧૦૪)
મધ્યે માયાવિહારેણ ભેદાભેદયુતોઽભવત્ ॥ ૫૭॥

અતસ્તં યોગરૂપાખ્યં ભજધ્વં યોગસેવયા ।
ભવિષ્યથ બ્રહ્મભૂતા બ્રહ્મયજ્ઞસ્ય પારગાઃ ॥ ૫૮॥

એવમુક્ત્વા મહાયોગી વિરરામ મહામતે ।
અથર્વા સર્વયોગજ્ઞસ્તત્રોઙ્કારોઽબ્રવીદ્વચઃ ॥ ૫૯॥

ઓઙ્કાર ઉવાચ ।
ચતુર્વેદપ્રચુરોઽહં મયા યોગસ્ય સેવયા ।
બ્રહ્મ સાક્ષાત્ કૃતં દેવાસ્તેન યોગિમતોઽભવમ્ ॥ ૬૦॥

મયોપદેશિતા વેદાઃ સાધયામાસુરન્વહમ્ ।
યોગં બ્રહ્મપ્રદં તેન બ્રહ્મજ્ઞાઃ સર્વસમ્મતાઃ ॥ ૬૧॥

યોગાત્ પરં ન વિદ્યેત બ્રહ્મ સર્વત્ર સમ્મતમ્ ।
જગત્ સુબ્રહ્મ સુપ્રોક્તં યોગેન બ્રહ્મ શાશ્વતમ્ ॥ ૬૨॥

તદેવ ગણરાજો વૈ નિશ્ચિતો યોગિભિઃ સદા ।
સંયોગાયોગભાવેન ક્રીડતે યોગરૂપધૃક્ ॥ ૬૩॥

સિદ્ધિર્ભ્રાન્તિમયી માયા બુદ્ધિર્ભ્રાન્તિધરા મતા ।
તયોઃ સ્વામી ગણેશાનો માયાભ્યાં ખેલતે વિભુઃ ॥ ૬૪॥

ભુક્તેઃ સિદ્ધિસ્તથા મુક્તેઃ સિદ્ધિર્બ્રહ્મપ્રદાયિની ।
ચિત્તં પઞ્ચવિધં બુદ્ધિસ્તયોર્યોગેન લભ્યતે ॥ ૬૫॥

સ્વસંવેદ્યાત્મકં બ્રહ્મ વેદેષુ કથિતં પરમ્ ।
સર્વસંયોગરૂપાખ્યં તત્રાઽયં દૃશ્યતે સ્વયમ્ ॥ ૬૬॥

તેન સ્વાનન્દવાસી ચ માયાયુક્તઃ પ્રકીર્તિતઃ ।
અયોગે દર્શનં તસ્ય જાયતે ન કદાચન ॥ ૬૭॥

નિર્માયિકસ્તતઃ પ્રોક્તસ્તયોર્યોગેન લભ્યતે ।
ગકારશ્ચૈવ સંયોગો ણકારોઽયોગ ઉચ્યતે ॥ ૬૮॥

તેન નામ્ના સમાખ્યાતો ગણેશો વેદવાદિભિઃ ।

તં ભજધ્વં વિશેષેણ બ્રહ્મીભૂતસ્ય કારણાત્ ॥ ૬૯॥

બ્રહ્મભૂતા દ્વિજા દેવા ભવિષ્યથ ન સંશયઃ ।
એવમુક્ત્વા તદોઙ્કારસ્તૂષ્ણીમાસીન્ મહામતે ॥ ૭૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે બ્રહ્મયજ્ઞે વેદનિર્ણયો નામ સપ્તચત્વારિંશોઽધ્યાયઃ ॥ ૩.૪૭

## ૩.૪૮ શુક્રશિષ્યસુબોધસંવાદો નામાષ્ટચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શ્રીશુક ઉવાચ ।
સોઙ્કારવેદમુખ્યાનાં વચનં હિતકારકમ્ ।
શ્રુત્વા જહૃષિરે નાગાદયઃ સર્ષિગણાઃ સુરાઃ ॥ ૧॥

ત્યક્ત્વા સ્વસ્વમતં સર્વે તાન્ પ્રણમ્ય પ્રપૂજ્ય વૈ ।
ઓઙ્કારાદીન્ મહાભાગા ઊચુઃ પ્રાઞ્જલયો વચઃ ॥ ૨॥

દેવાદય ઊચુઃ ।
ઓઙ્કારસહિતા વેદા ભવદ્ભિઃ કથિતં વચઃ ।
તદેવ સર્વમાન્યં વૈ બ્રહ્મભૂયપ્રદં ભવેત્ ॥ ૩॥

સર્વેષાં ગુરવઃ પ્રોક્તા વેદાસ્તૈઃ કથિતં ભવેત્ ।
તદેવ કરણીયં યદ્ ગતિદં સર્વસમ્મતમ્ ॥ ૪॥

વેદાધારવિહીનં યત્ત્યાજ્યં સર્વૈર્ન સંશયઃ ।
નો ચેન્નરકગો ભૂત્વા યાતનાં લભતે નરઃ ॥ ૫॥

બ્રહ્મયજ્ઞસ્ય પારં વૈ ભવન્તો દેવનાયકૈઃ ।
મુનિભિર્જનસઙ્ઘૈશ્ચ ગતા ભવથ નિશ્ચિતમ્ ॥ ૬॥

દેવાદયો મહાભાગા એવમુક્ત્વા વિશેષતઃ ।
પ્રહ્લાદ તુષ્ટુવુર્વેદમુખ્યાંસ્તે હર્ષસંયુતાઃ ॥ ૭॥

પૂજિતાસ્તૈરુક્તવેદાઃ સોઙ્કારા દૈત્યનાયક ।
(Page ખં. ૩ અ. ૪૮ પાન ૧૦૫)
અન્તર્દધુસ્તતઃ સર્વે હૃષ્ટાઃ સ્થાનં યયુઃ સ્વકમ્ ॥ ૮॥

એવં સર્વૈઃ પુરા સાધો બ્રહ્મયજ્ઞઃ કૃતોઽભવત્ ।

તેન સંશયહીનાસ્તે ભજન્તે ગણનાયકમ્ ॥ ૯॥

એતત્તે કથિતં પૂર્ણયોગશાન્તિપ્રદં પરમ્ ।
સર્વમાન્યં વિશેષેણ ભજ તં ગણનાયકમ્ ॥ ૧૦॥

સુબોધ ઉવાચ ।
એવમુક્ત્વા મહાયોગી શુકશ્ચાન્તર્હિતોઽભવત્ ।
પ્રહ્લાદો ભક્તિસંયુક્તો ભજતે ગણનાયકમ્ ॥ ૧૧॥

સંશ્રુતં માતુરુદરસંસ્થેન સકલં તતઃ ।
મયા ધૃતં વિશેષેણ તદેવં યોગદાયકમ્ ॥ ૧૨॥

પૂર્વપુણ્યબલેનૈવ સ્મૃતિર્મેઽત્ર પ્રસંસ્થિતા ।
જનિતોઽહમતો વિપ્રા ભજામિ ગણનાયકમ્ ॥ ૧૩॥

એતત્ સર્વં મયા પ્રોક્તં યત્પૃષ્ટં ગુરુમુખ્યકાઃ ।
અતો મે મોહદાં વિદ્યાં મા વદેત દયાયુતાઃ ॥ ૧૪॥

શ્રીકૃષ્ણ ઉવાચ ।
સુબોધસ્ય વચઃ શ્રુત્વા બ્રાહ્મણા હર્ષસંયુતાઃ ।
ઊચુસ્તં યોગનિપુણં ભાવજ્ઞા ભાવસિદ્ધયે ॥ ૧૫॥

વિપ્રા ઊચુઃ ।
સુબોધ યત્ત્વયા પ્રોક્તં તત્તથા ન તદન્યથા ।
તથાપિ શૃણુ વત્સ ત્વં હિતકારકમુત્તમમ્ ॥ ૧૬॥

પિતામહો મહાભાગ દુર્બુદ્ધિસ્તે મહાસુરઃ ।
ગણેશેન હતો રોષાદ્દેવપક્ષપ્રધારિણા ॥ ૧૭॥

તં દ્વેષ્ટિ ગણરાજં ચ પિતા તે પિતૃવત્સલ ।
પિતૃદ્રુહં તતસ્ત્વં તં ત્યજ વિઘ્નેશમાદરાત્ ॥ ૧૮॥

નોચેત્ત્વાં તે પિતા પુત્ર હનિષ્યતિ ન સંશયઃ ।
તસ્માદાગ્રહમત્યન્તં મા કુરુષ્વ મહામતે ॥ ૧૯॥

અસુરાણાં કુલે પશ્ય જનિસ્તવ હિતાવહા ।
સ્વકુલસ્થસ્ય માર્ગસ્ય સેવનં કુરુ સર્વદા ॥ ૨૦॥

તેષાં વચનમાકર્ણ્ય સુબોધો રક્તલોચનઃ ।
જગાદ તાન્ દ્વિજાંસ્તત્ર વચનં ધર્મસંયુતમ્ ॥ ૨૧॥

સુબોધ ઉવાચ ।
સર્વત્ર યોગરૂપેણ ગણેશસ્તિષ્ઠતિ દ્વિજાઃ ।
સ્વસ્વધર્મનિયન્તાઽસૌ નાનાક્રીડાપરાયણઃ ॥ ૨૨॥

સ્વર્ગે દેવા નરાઃ પૃથ્વ્યાં પાતાલે તેન દૈત્યપાઃ ।
સ્થાપિતાઃ સ્વસ્વમાર્ગેષુ સ્થાતવ્યં તૈર્હિતેપ્સુભિઃ ॥ ૨૩॥

પિતામહશ્ચ મે વિપ્રાસ્ત્રિલોકી રાજ્યમુત્કટમ્ ।
ચકાર ધર્મહીનઃ સ તસ્માત્તેન હતો બલાત્ ॥ ૨૪॥

પિતા મેઽપિ તથા વિપ્રા ધર્મહીનતયા સ્થિતઃ ।
તં હનિષ્યતિ વેગેન ગણેશો નાત્ર સંશયઃ ॥ ૨૫॥

અતઃ કિં ગણરાજેન વિપરીતં કૃતં દ્વિજાઃ ।
સ્વધર્મસ્ય પ્રિયેણૈવ માં વદેત વિશેષતઃ ॥ ૨૬॥

સર્વેષાં હિતકર્તાઽસૌ વિઘ્નરાજો ન સંશયઃ ।
તં ભજિષ્યામિ યત્નેન ત્યક્ત્વા સ્વપિતરં ખલમ્ ॥ ૨૭॥

ગણેશં ભજમાનં માં વધિષ્યતિ યદા ખલઃ ।
તદેવ મરણં શ્રેષ્ઠં બ્રહ્મભૂયપ્રદં ભવેત્ ॥ ૨૮॥

મશકે કુપિતે કિં વૈ ગૃહં ત્યક્ત્વા મનીષિણઃ ।
તિષ્ઠન્તિ બ્રાહ્મણાઃ સર્વે માં વદેત હિ સામ્પ્રતમ્ ॥ ૨૯॥

બુદ્ધેઃ પતેર્ગણેશસ્ય સત્તા સર્વત્ર વર્તતે ।
સિદ્ધેઃ પતેર્ન સન્દેહઃ કિં કરિષ્યતિ માં પિતા ॥ ૩૦॥

સ્વધર્મઃ સર્વભૂતાનાં ધર્મકામાર્થમુક્તયે ।
બ્રહ્મભૂયાર્થમત્યન્તં ગણેશભજનાત્મકઃ ॥ ૩૧॥

તં તાદૃશં સ્વધર્મં કિં ત્યક્ત્વા વિષયલમ્પટઃ ।
ભવિષ્યામ્યસુરાધીનો બ્રાહ્મણાઃ કુલપાંસવઃ ॥ ૩૨॥

ન બ્રાહ્મણા ભવન્તોઽપિ વિષયેષુ પરાયણાઃ ।
ત્યક્ત્વા ધર્મં સ્થિતા અત્ર દૈત્યાધીના ન સંશયઃ ॥ ૩૩॥

ગણેશભજને સક્તા બ્રહ્મભૂયપરાયણાઃ ।
બ્રાહ્મણાસ્તે મતાઃ શાસ્ત્રે કિં માં વદથ બાલિશાઃ ॥ ૩૪॥

શ્રીકૃષ્ણ ઉવાચ ।

શુક્રશિષ્યાન્ પ્રજાનાથ એવમુક્ત્વા મહામતિઃ ।
સુબોધો ગણનાથસ્ય ભજને તત્પરોઽભવત્ ॥ ૩૫॥

નમો ગણેશાય નમો મહાત્મને નમઃ પરેશાય પરાત્પરાય તે ।
અનાદિમધ્યાન્તમયાય ઢુણ્ઢયે નમો નમો વિઘ્નપતે સુશાન્તિદ ॥ ૩૬॥

એવં વિવદમાનં તં જ્ઞાત્વા કાવ્યસ્ય શિષ્યકાઃ ।
ભયભીતા વિશેષેણ જ્ઞાનારિં તે યયુઃ પ્રભો ॥ ૩૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે શુક્રશિષ્યસુબોધસંવાદો નામાષ્ટચત્વારિંશોઽધ્યાયઃ ॥ ૩.૪૮

## ૩.૪૯ સુબોધભક્તિવર્ણનં નામૈકોનપઞ્ચાશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શ્રીકૃષ્ણ ઉવાચ ।
કાવ્યશિષ્યા ગતાસ્તત્ર યત્ર દૈત્યાધિપોઽભવત્ ।
સભાસનસ્થમૂચુસ્તં દૃષ્ટ્વા ભયસમન્વિતાઃ ॥ ૧॥

શુક્રશિષ્યા ઊચુઃ ।
જ્ઞાનારે શ‌ૃણુ વાક્યં નો દારુણં વિપરીતગમ્ ।
પુત્રસ્તેઽભૂન્ મદોત્સિક્તઃ સર્વદાઽસ્માનુપેક્ષતે ॥ ૨॥

ઉલ્લઙ્ઘ્ય સર્વમસ્માભિઃ કથિતં જાતિદૂષણમ્ ।
કરોતિ સ્વમતેનાયમન્યાન્ સમ્બોધયંસ્તથા ॥ ૩॥

પિતૃહન્તારમત્યન્તં સદા સ્મરતિ ભક્તિતઃ ।
તિરસ્કૃત્ય મહારાજ ત્વામસ્માન્નાત્ર સંશયઃ ॥ ૪॥

અતઃ કથયિતું યાતાઃ શિક્ષયસ્વ સ્વપુત્રકમ્ ।
વયં શિક્ષયિતું શક્તા નાવિનીતં મહામતે ॥ ૫॥

શ્રીકૃષ્ણ ઉવાચ ।
તેષાં વચનમાકર્ણ્ય ક્ષોભિતો દૈત્યનાયકઃ ।
પ્રેષયામાસ દૂતં સ પુત્રમાનેતુમન્તિકે ॥ ૬॥

દૂતેનાગતમેવં તં પુત્રં દૃષ્ટ્વા મહાસુરઃ ।
ઉવાચ કૃતવન્તં તં પ્રણામં ક્રોધસંયુતઃ ॥ ૭॥

જ્ઞાનારિરુવાચ ।
કિં તિરસ્કૃત્ય રે વત્સ ગુરૂન્ સ્મરસિ તદ્વદ ।
હિતં તે હૃદયે કિં ચ વર્તતે કુલપાંસન ॥ ૮॥

પિતુર્વચનમાકર્ણ્ય ક્રોધયુક્તઃ સુબોધકઃ ।
ઉવાચ પિતરં ભ્રાન્તં માયયા ગણપસ્ય સઃ ॥ ૯॥

સુબોધ ઉવાચ ।
સર્વેષાં કુલદેવં ચ સર્વેષાં હિતકારકમ્ ।
ભુક્તિમુક્તિપ્રદં તાત ભજામિ ગણનાયકમ્ ॥ ૧૦॥

બ્રહ્મવિષ્ણ્વાદિભિર્દેવૈઃ કશ્યપાદિમુનીશ્વરૈઃ ।
પૂજિતં કુલવૃદ્ધ્યર્થં યોગશાન્ત્યર્થમાદરાત્ ॥ ૧૧॥

કશ્યપાત્ વયમુત્પન્ના દેવા દૈત્યાસ્તથા નરાઃ ।
જન્તવો વિવિધાશ્ચૈવ તેષાં સ્વામી તથાઽભવત્ ॥ ૧૨॥

ભજામિ ગણનાથં વૈ અતોઽહં સર્વભાવતઃ ।
તમનાદૃત્ય દૈત્યેશ ન સિદ્ધિં લભતે પુમાન્ ॥ ૧૩॥

તસ્ય તદ્વચનં શ્રુત્વા ક્રોધયુક્તો મહાસુરઃ ।
જગાદ તં ધર્મરાજમુખાદનલમુદ્વમન્ ॥ ૧૪॥

જ્ઞાનારિરુવાચ ।
અસ્માકં શત્રવો દેવા દૈત્યાનાં નાત્ર સંશયઃ ।
સુરાસુરાશ્ચ વેદેષુ પ્રોક્તાઃ પશ્ય સુદુર્મતે ॥ ૧૫॥

તત્રાપ્યયં પિતુર્હન્તા મમ તં ભજસે મુધા ।
બાલભાવે મયા જ્ઞાતં ચેષ્ટિતં તે રિપુશ્રિતમ્ ॥ ૧૬॥

(Page ખં. ૩ અ. ૪૯ પાન ૧૦૭)
બાલં મત્વા ન દુષ્ટ ત્વાં હતવાન્ કૃપયા શઠ ।
અધુના તાદૃશં મત્વા ન મુઞ્ચામિ કદાચન ॥ ૧૭॥

ત્યજ શત્રું મહામૂર્ખ નોચેદ્ધન્મ્યધુના કિલ ।
એવમુક્ત્વા ખડ્ગહસ્તો દુદ્રાવ સ્વસુતં નૃપ ॥ ૧૮॥

તતસ્તં દૈત્યરાજં સ ઉવાચ તનયો વચઃ ।
કિં ધર્ષયસિ માં તાત ભ્રાન્તિભાવેન મોહિતઃ ॥ ૧૯॥

સર્વસત્તાધરઃ પ્રોક્તો વેદેષુ ગણનાયકઃ ।
તસ્ય સત્તાં પરિત્યજ્ય કિં માં હંસિ ત્વમેવ ચ ॥ ૨૦॥

સુરાસુરમયઃ સાક્ષાદ્ગણેશો નાત્ર સંશયઃ ।
ઉદ્ધતં હન્તિ વેગેન નાનારૂપધરઃ પ્રભુઃ ॥ ૨૧॥

બ્રુવન્તં સ્વસુતં દૃષ્ટ્વા ભયહીનં યુધિષ્ઠિર ।
ક્રોધયુક્તઃ સ્વયં તત્ર સંસ્થિતો દૈત્યનાયકઃ ॥ ૨૨॥

દૂતાનાજ્ઞાપયામાસ શસ્ત્રાસ્ત્રૈઃ સ્વસુતસ્ય સઃ ।
વધાર્થં તે દૈત્યગણાઃ ક્રોધયુક્તા બભૂવિરે ॥ ૨૩॥

નાનાનાદયુતાઃ સર્વે નગ્નશસ્ત્રધરા યયુઃ ।
હન્તું તં તાનથો દૃષ્ટ્વા સુબોધો નિર્ભયો બભૌ ॥ ૨૪॥

ગણેશભજને સક્તો બભૂવ ન ચચાલ હ ।
દેહપ્રારબ્ધભાવેન ભવેત્તન્ મે ગજાનન ॥ ૨૫॥

વિઘ્નેશ હેરમ્બ જયાખિલેશ સ્વાનન્દવાસિન્ જય વક્રતુણ્ડ ।
નાથોઽસિ સર્વત્ર જગત્ સુઢુણ્ઢે લમ્બોદર બ્રહ્મસુતે નમો વૈ ॥ ૨૬॥

ઇત્યાદ્યૈર્વિવિધૈર્વાક્યૈર્ગણેશમભજત્ સુતઃ ।
તં તથા ક્રોધસંયુક્તા જઘ્નુર્દૈત્યા મહાબલાઃ ॥ ૨૭॥

નાનાશસ્ત્રનિપાતૈસ્તેઽસ્ત્રૈઃ સર્વત્ર યુધિષ્ઠિર ।
ગણેશસ્તસ્ય દેહસ્થો નિષ્ફલાંસ્તાંશ્ચકાર હ ॥ ૨૮॥

ક્રોધાનલેન સર્વાન્ સ દાહયામાસ વિઘ્નપઃ ।
તતઃ પલાયનં ચક્રુર્દૈત્યાઃ પ્રાણપરીપ્સયા ॥ ૨૯॥

તત્ દૃષ્ટ્વા પરમાશ્ચર્યં જ્ઞાનારિઃ ક્રોધમૂર્ચ્છિતઃ ।
શ્રેષ્ઠાનાજ્ઞાપયામાસ વધાય સ્વસુતસ્ય વૈ ॥ ૩૦॥

ચતુરઙ્ગબલૈર્યુક્તા દૈત્યેશાસ્તં સમાયયુઃ ।
અમોઘાસ્ત્રૈઃ સુબોધં તે જઘ્નુઃ પરમદારુણાઃ ॥ ૩૧॥

ગણેશભક્તિં તાં સોઽપિ ચક્રે વૈ નિર્ભયો દૃઢામ્ ।
જય દેવેશ વિઘ્નેશ મહોદર નમોઽસ્તુ તે ॥ ૩૨॥

તસ્ય દેહાન્ મહાનગ્નિઃ શસ્ત્રઘાતચ્છલેન સઃ ।
સમુત્પન્નઃ પ્રજજ્વાલ દૈત્યેશાન્ ક્ષણમાત્રતઃ ॥ ૩૩॥

તે મેઘાસ્ત્રાણિ સસૃજુસ્તૈર્ન શાન્તો બભૂવ હ ।
દદાહ સકલાંસ્તત્ર પ્રલયાગ્નિસમશ્ચ તાન્ ॥ ૩૪॥

મૃતાઃ સર્વે સુરાણાં વૈ નાયકાસ્તત્ર ભૂમિપ ।
જ્ઞાનારિઃ પરમાશ્ચર્યયુક્તોઽભૂત્ ખેદસંયુતઃ ॥ ૩૫॥

પ્રધાનૈઃ સ વિચાર્યૈવં પુત્રં તત્યાજ તત્ક્ષણાત્ ।
શુક્રં તપસિ તિષ્ઠન્તં જ્ઞાત્વા ક્રોધં નિયમ્ય ચ ॥ ૩૬॥

મેધાવી સ યદા શુક્ર આગમિષ્યતિ વૈ ગૃહે ।
તદા તેન સમાયુક્તા હનિષ્યામઃ સુબોધકમ્ ॥ ૩૭॥

એવં નિશ્ચિતસઙ્કલ્પાઃ સ્થિતાસ્તે દૈત્યનાયકાઃ ।
જ્ઞાનારિઃ સ તથા ચક્રે હૃદયેન વિદૂયતા ॥ ૩૮॥

સુબોધો ગણપં તત્રાઽભજત્ સોઽનન્યમાનસઃ ।
નિર્ભયો દાનવાન્ સર્વાન્ તૃણીકૃત્ય વિશેષતઃ ॥ ૩૯॥

તતસ્તેન સુબોધેન દૈત્યપુત્રા યુધિષ્ઠિર ।
શિક્ષિતાઃ પ્રત્યયં દૃષ્ટ્વા તથા ગણપમાભજન્ ॥ ૪૦॥

સત્યં ગણેશમાહાત્મ્યં મહત્તન્નાત્ર સંશયઃ ।
સન્દૃશ્ય દૈત્યભૂપાલા મૃતાઃ કક્ષવદપ્યહો ॥ ૪૧॥

એવં વિચાર્ય સર્વત્ર બાલા વિઘ્નેશમાદરાત્ ।
(Page  ખં. ૩ અ. ૫૦ પાન ૧૦૮)
અભજન્ સર્વભાવેન તિરસ્કૃત્ય ગુરોઃ સુતાન્ ॥ ૪૨॥

યત્ર તત્ર ગણેશસ્ય કીર્તનં હ્યર્ચનાદિકમ્ ।
અકુર્વન્ દૈત્યપુત્રાસ્તે સુબુધેન સમન્વિતાઃ ॥ ૪૩॥

નમો નમો વિઘ્નપતે ગણેશ સદા સ્વસંવેદ્યપુરે નિવાસિન્ ।
અનાદિમધ્યાન્તવિહીનકાય સુશાન્તિદાત્રે જય સર્વપૂજ્ય ॥ ૪૪॥

એવં દૃષ્ટ્વા સ સર્વત્ર જ્ઞાનારિઃ ક્રોધમાદધે ।
સહને ન સમર્થોઽભૂન્ મતિં ચક્રે વધાય વૈ ॥ ૪૫॥

હનિષ્યામિ સુતં દુષ્ટં વરયુક્તપ્રભાવતઃ ।
ન મે મૃત્યુર્ભવેન્નૂનમિતિ વ્યવસિતોઽભવત્ ॥ ૪૬॥

॥ ॐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે સુબોધભક્તિવર્ણનં નામૈકોનપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૩.૪૯

## ૩.૫૦ યુધિષ્ઠિરચરિતં નામ પઞ્ચાશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શ્રીકૃષ્ણ ઉવાચ ।
અધુના શ‍ૃણુ ધર્મજ્ઞ દેવાદીનાં વનેષુ વૈ ।
યજ્જાતં તત્ પ્રવક્ષ્યામિ પૂર્ણાનન્દસ્ય ચેષ્ટિતમ્ ॥ ૧॥

વિષ્ણુમુખ્યાન્ સુરાનાહ પૂર્ણાનન્દઃ પ્રતાપવાન્ ।
કિમર્થં દુઃખસંયુક્તા ભવન્તઃ સર્વજન્તુભિઃ ॥ ૨॥

જ્ઞાનારિણા કૃતં સર્વં જગત્ સ્થાવરજઙ્ગમમ્ ।
દુઃખયુક્તં વિશેષેણ તં હનિષ્યામિ નિશ્ચિતમ્ ॥ ૩॥

મયિ પુત્રત્વમાપન્ને દુર્લભં કિં ભવિષ્યતિ ।
તસ્માદ્દેવગણૈસ્તાત ગચ્છ વૈકુણ્ઠમાદરાત્ ॥ ૪॥

જ્ઞાનારિઃ પુત્રનાશાર્થં યતતે ચાધુના પ્રભો ।
તસ્ય પુત્રો મહાભક્તો મદીયો નાત્ર સંશયઃ ॥ ૫॥

ભક્તરક્ષાર્થમેવાહં ગમિષ્યામ્યધુના સ્વયમ્ ।
તં હત્વા સુખમેષ્યામિ સ્વભક્તદ્વેષિણં ખલમ્ ॥ ૬॥

ચરાચરમયાત્તસ્ય ભયં નાસ્તિ કદાચન ।
ચરાચરમયં સર્વં ત્રૈગુણ્યં નાત્ર સંશયઃ ॥ ૭॥

અતો દ્વન્દ્વવિહીનેન તં રૂપેણ મહાસુરમ્ ।
હનિષ્યામિ સ્વભક્તાર્થં પશ્ય મે ત્વં કુતૂહલમ્ ॥ ૮॥

એતસ્મિન્નન્તરે ચૈવ જ્ઞાનારિઃ ખડ્ગમાદધૌ ।
સુબોધં હન્તુમત્યન્તં ક્રોધયુક્તો યુધિષ્ઠિર ॥ ૯॥

જ્ઞાનારિં તાદૃશં દૃષ્ટ્વા સુબોધો ભક્તિસંયુતઃ ।
ગણેશસ્ય જગાદાપિ તચ્છૃણુષ્વ યુધિષ્ઠિર ॥ ૧૦॥

સુબોધ ઉવાચ ।
અહઙ્કારેણ સંયુક્તસ્તાત ત્વં માયયા ભૃશમ્ ।

ન જાનાસિ ગણેશાનં ચિત્તે સંસ્થિતમેવ તે ॥ ૧૧॥

ચિન્તામણિઃ સ વેદેષુ કથિતો વેદવાદિભિઃ ।
તં ગચ્છ શરણં તાત નોચેત્ત્વં વૈ મરિષ્યસિ ॥ ૧૨॥

ન તે ભયેન ભાવેન ત્યજેયં વિઘ્નનાયકમ્ ।
કિમુ શ્રામ્યસિ મૂર્ખ ત્વં સત્તાધારં ન પશ્યસિ ॥ ૧૩॥

ઇતિ પુત્રં બ્રુવન્તં સ જઘાન દૃઢરોષતઃ ।
ખડ્ગેન તીક્ષ્ણધારેણ સ ખડ્ગો નિષ્ફલોઽભવત્ ॥ ૧૪॥

તતો નાનાસ્ત્રવર્ષૈસ્તમવર્ષદ્દૈત્યનાયકઃ ।
તાનિ નિષ્ફલરૂપાણિ બભૂવુશ્ચ યુધિષ્ઠિર ॥ ૧૫॥

અગ્ન્યસ્ત્રાદીનિ શસ્ત્રાણિ નિષ્ફલાનિ મહાસુરઃ ।
વીક્ષ્ય વિસ્મિતચિત્તોઽસૌ મલ્લયુદ્ધોદ્યતોઽભવત્ ॥ ૧૬॥

પુત્રં પાદે શિલાયાં સ સઙ્ગૃહ્યાઽઽસ્ફાલયદ્યદા ।
(Page ખં. ૩ અ. ૫૦ પાન ૧૦૯)
તાવત્ સ્વયં પપાતૈવ મૂર્ચ્છિતસ્તાડિતોઽભવત્ ॥ ૧૭॥

અદૃશ્યરૂપભાવેન હતો વિઘ્નવિનાશિના ।
પુનઃ સંજ્ઞાસમાયુક્તોઽપશ્યત્પુત્રં સુદુર્મતિઃ ॥ ૧૮॥

ગણેશભજને સક્તં વીક્ષ્ય વિસ્મિતમાનસઃ ।
વિચારં હૃદયે સોઽપિ ચકાર પરમાદ્ભુતમ્ ॥ ૧૯॥

અહો માં કો જઘાનૈવં ન પશ્યામિ મહારિપુમ્ ।
કેન માર્ગેણ મે પુત્રં હનિષ્યામિ કુલાન્તકમ્ ॥ ૨૦॥

પુત્રસ્ય મરણાર્થાય યતેઽહં વિવિધં સદા ।
તદર્થં દૈત્યનાથાશ્ચ સુહૃદ્ભિરભવન્ મૃતાઃ ॥ ૨૧॥

અહં કિં વા મરિષ્યામિ હનિષ્યામિ સુતં નુ વા ।
અધુના કિં મયા કાર્યમેવં વ્યવસિતોઽભવત્ ॥ ૨૨॥

તતસ્તેન વધાર્થાય પ્રાપ્તં જ્ઞાનં વિશેષતઃ ।
પુત્રરક્ષાકરં ચાદૌ હન્મિ પશ્ચાત્ સુતં ખલમ્ ॥ ૨૩॥

મૃતો રક્ષાકરસ્તસ્ય રક્ષિતા ન ભવિષ્યતિ ।
પુત્રસ્ય તેન મૃત્યું મે ગમિષ્યતિ સુતોઽધુના ॥ ૨૪॥

એવં નિશ્ચિતસઙ્કલ્પો જગાદ ક્રોધસંયુતઃ ।
પુત્રં સુબોધનામાનં મોહેનામોહિતોઽસુરઃ ॥ ૨૫॥

સુબોધ કુત્ર તે રક્ષિતા વિશેષેણ વર્તતે ।
તમાનય મહાદુષ્ટ હનિષ્યામ્યધુના શઠ ॥ ૨૬॥

તતસ્તં મોહિતં પ્રાહ સુબોધઃ કરુણાયુતઃ ।
તાત પશ્ય હૃદિસ્થં તં ચિત્તવૃત્તિપ્રચાલકમ્ ॥ ૨૭॥

વૈરભાવં પરિત્યજ્ય તથાઽહઙ્કારમદ્ય વૈ ।
શરણં ગચ્છ વિઘ્નેશં બ્રહ્મભૂતો ભવિષ્યસિ ॥ ૨૮॥

સર્વત્ર સંસ્થિતં પશ્ય સ્વામિનં મે ગજાનનમ્ ।
તં હન્તુમુદ્યતસ્ત્વં વૈ મરિષ્યસિ ન સંશયઃ ॥ ૨૯॥

તતસ્તં પ્રત્યુવાચેદં જ્ઞાનારિર્વચનં નૃપ ।
દર્શયસ્વ મહાભાગ તં ભજિષ્યામિ નિશ્ચિતમ્ ॥ ૩૦॥

એવં કપટભાવેન સુબોધં સ જગાદ હ ।
સુબોધસ્તં ગણેશાનં સસ્માર પિતૃકારણાત્ ॥ ૩૧॥

તતસ્તં મૂષકારૂઢો વિષ્ણુપુત્રઃ સમાયયૌ ।
તમન્વયુર્દ્વિજા દેવા ભયભીતા યુધિષ્ઠિર ॥ ૩૨॥

આકાશે ગુપ્તરૂપેણ મુનયો દેવતાગણાઃ ।
સંસ્થિતા અભવંસ્તત્ર પશ્યન્તશ્ચેષ્ટિતં પ્રભોઃ ॥ ૩૩॥

સુબોધસ્ય સમીપે તં સંસ્થિતં ગણનાયકમ્ ।
પશ્યન્ ક્રૂરો મહાદુષ્ટો જ્ઞાનારિર્હર્ષિતોઽભવત્ ॥ ૩૪॥

સુબોધસ્તં પ્રણમ્યાદૌ સ્તુત્વા ચ વિવિધૈઃ સ્તવૈઃ ।
ઉવાચ પિતરં યોગી પશ્ય તાત ગજાનનમ્ ॥ ૩૫॥

સુબોધસ્ય વચઃ શ્રુત્વા ક્રોધયુક્તો મહાસુરઃ ।
અમોઘં સર્વસંહારકારકં શસ્ત્રમાદદે ॥ ૩૬॥

એતસ્મિન્નન્તરે તત્ર પૂર્ણાનન્દો હૃદિ સ્થિતઃ ।
જીવભાવં સ દૈત્યસ્ય કર્ષયામાસ ભૂમિપ ॥ ૩૭॥

તતઃ સ પતિતો ભૂમૌ ગતચૈતન્યકોઽઞ્જસા ।

હાહાકારં પ્રચક્રુસ્તે દૈત્યાઃ પાતાલમાયયુઃ ॥ ૩૮॥

તતસ્તે દેવવિપ્રાદ્યા નભઃસ્થાઃ સહસાઽઽગતાઃ ।
પ્રણમ્ય તુષ્ટુવુસ્તં વૈ પૂર્ણાનન્દં ગણેશ્વરમ્ ॥ ૩૯॥

સ્તુવતાં પશ્યતાં ભૂપ સુબોધં ગૃહ્ય વિઘ્નપઃ ।
અન્તર્ધાનં ચકારાઽપિ સર્વે ખિન્ના ઇવાઽભવન્ ॥ ૪૦॥

લક્ષ્મીર્નારાયણશ્ચૈવ મૂર્ચ્છિતૌ ધરણીતલે ।
પેતતુર્દુઃખસંયુક્તૌ પૂર્ણાનન્દવિયોગતઃ ॥ ૪૧॥

દ્વિમુહૂર્તાત્ પ્રબુદ્ધૌ તૌ તતો હૃદિ તયોઃ પ્રભુઃ ।
પ્રકટોઽભૂદુવાચાઽથ મૂર્તૌ માં ભજતં યુવામ્ ॥ ૪૨॥

ન વિયોગો ભવેત્તાતૌ પશ્યતં બુદ્ધિચાલકમ્ ।
(Page ખં. ૩ અ. ૫૦ પાન ૧૧૦)
એવમુક્ત્વાન્તર્દધેઽસૌ હૃદિસ્થો ગણનાયકઃ ॥ ૪૩॥

તતસ્તૌ દુઃખસંયુક્તૌ ચક્રતુઃ પરમાદૃતૌ ।
લક્ષ્મીનારાયણૌ મૂર્તિં ભક્ત્યા પ્રભજને રતૌ ॥ ૪૪॥

એવં મહોદરઃ સર્વપ્રદાતા વૈ પ્રતાપવાન્ ।
હર્તા ચ બ્રહ્મભૂતોઽસૌ બ્રહ્મભૂયપ્રદો મતઃ ॥ ૪૫॥

શિવવિષ્ણ્વાદિભિર્દેવૈઃ સેવિતો ભક્તિભાવતઃ ।
મુનિભિર્યોગિભિર્નાનાજન્તુભિર્નાત્ર સંશયઃ ॥ ૪૬॥

તં ભજસ્વ મહીપાલ વિઘ્નહીનો ભવિષ્યસિ ।
સ્વધર્મસ્થો મહાભાગ શાન્તિયોગમવાપ્સ્યસિ ॥ ૪૭॥

મુદ્ગલ ઉવાચ ।
એવં નારાયણં તં સ બ્રુવન્તં ધર્મપાલકઃ ।
યુધિષ્ઠિર ઉવાચાઽથ પ્રેમયુક્તો મહામતિઃ ॥ ૪૮॥

યુધિષ્ઠિર ઉવાચ ।
કૃષ્ણ કૃષ્ણ મહાપ્રાજ્ઞ કથાં બ્રહ્મપ્રદાયિનીમ્ ।
સર્વકામપ્રદાં પૂર્ણાં વદસ્યત્ર ન સંશયઃ ॥ ૪૯॥

ત્વદીયસઙ્ગયોગેન મયા જ્ઞાતો ગજાનનઃ ।
વદ ત્વં તસ્ય મન્ત્રં મે સસ્ત્રીકાય સબન્ધવે ॥ ૫૦॥

સ તસ્મૈ દેવકીપુત્રો દદૌ મન્ત્રં ષડક્ષરમ્ ।
દેવેશો ધૌમ્યમુખતસ્તથા સર્વેભ્ય આદરાત્ ॥ ૫૧॥

મુદ્ગલ ઉવાચ ।
પાણ્ડવા દ્રૌપદીયુક્તાસ્તેન મન્ત્રેણ વિઘ્નપમ્ ।
અભજન્ ભક્તિસંયુક્તાશ્ચતુર્થીવ્રતકારકાઃ ॥ ૫૨॥

તતો દુઃખવિહીનાસ્તે સૂર્યાત્ પ્રાપ્ય યથેપ્સિતમ્ ।
સ્થાલીસ્થમન્નમત્યન્તં પોષયામાસુરગ્રજાન્ ॥ ૫૩॥

વનસ્થાઃ દુખહીનાશ્ચ ભ્રમન્તસ્તે સમાયયુઃ ।
વ્યાસેન વાસુદેવેન યુતાઃ સ્વાનન્દકે પુરે ॥ ૫૪॥

મયૂરેશં ચ તત્રૈવાઽપૂજયન્ ભક્તિસંયુતાઃ ।
પાણ્ડવેશં સમાસ્થાપ્ય શ્રાદ્ધં ચક્રુઃ પિતુસ્તતઃ ॥ ૫૫॥

તત્ર પિણ્ડપ્રદાનેન પાણ્ડું સ્વર્ગસ્થમાદરાત્ ।
નાનાસુહૃદ્ગણૈર્યુક્તં સમાનેતું યયુર્ગણાઃ ॥ ૫૬॥

ગાણેશેન વિમાનેન સ્વાનન્દે બ્રહ્મરૂપિણમ્ ।
ચક્રુર્દક્ષ મહાભાગ મહિમ્ના ક્ષેત્રજેન તે ॥ ૫૭॥

ગુપ્તરૂપેણ વર્ષં તે નિર્વિઘ્ના અવસંસ્તતઃ ।
પશ્ચાત્ પ્રાકટ્યમાસ્થાય સસ્ત્રીકાઃ પાણ્ડવા યયુઃ ॥ ૫૮॥

હત્વા દુર્યોધનં વીરાઃ સસૈન્યં કર્ણસંયુતમ્ ।
રાજ્યં પ્રાપ્યાઽભજંસ્તે તં ગણેશં સર્વનાયકમ્ ॥ ૫૯॥

એવં યુધિષ્ઠિરેણૈવારાધિતઃ સ મહોદરઃ ।
મોહશૂન્યસ્વભાવેન યોગિના શાન્તિધારિણા ॥ ૬૦॥

પૂર્ણાનન્દાવતારો મહોદરાન્તર્ગતઃ સ્મૃતઃ ।
એવં નાનાવતારૈશ્ચ કુરુતે ક્રીડનં સ્વયમ્ ॥ ૬૧॥

તેષાં કથયિતું પુણ્યં ચરિત્રં ન પ્રશક્યતે ।
વર્ષાણામયુતૈર્દક્ષ મયા કેનાપિ નિશ્ચિતમ્ ॥ ૬૨॥

ઇદં યુધિષ્ઠિરસ્યૈવ ચરિત્રં પાપનાશનમ્ ।
શ‍ૃણ્વતે પઠતે વાઽપિ તસ્મૈ સર્વાર્થદં ભવેત્ ॥ ૬૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે

તૃતીયે ખણ્ડે મહોદરચરિતે યુધિષ્ઠિરચરિતં નામ પઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૩.૫૦
(Page ખં. ૩ અ. ૫૧ પાન ૧૧૧)

## ૩.૫૧ શ્રવણફલવર્ણન નામૈકપઞ્ચાશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
મહોદરસ્ય ક્ષેત્રં યદ્દક્ષિણસ્યાં દિશિ સ્થિતમ્ ।
દેવૈશ્ચ મુનિભિસ્તત્ર સ્થાપિતો ગણનાયકઃ ॥ ૧॥

દશયોજનવિસ્તારસ્તસ્ય ક્ષેત્રસ્ય માનદ ।
મહોદરશ્ચ તન્મધ્યે ચતુરસ્રે સ્થિતોઽભવત્ ॥ ૨॥

સ્વસ્વખણ્ડેષુ સર્વત્ર દ્વીપેષુ મુનિભિઃ પુરા ।
સ્થાપિતો દક્ષિણસ્યાં સ દિશિ બ્રહ્મમયઃ પ્રભુઃ ॥ ૩॥

તત્ર દેવાદયઃ સર્વે ઋષયો યોગિનસ્તથા ।
તીર્થાનિ ક્ષેત્રમુખ્યાનિ સંસ્થિતાનિ ભવન્તિ ચ ॥ ૪॥

સમુદ્રે સ્નાનકર્તારઃ સ્વસ્વતીર્થેષુ નિત્યદા ।
ગણેશાનં ભજન્તસ્તે પરસ્પરહિતે રતાઃ ॥ ૫॥

નાનારૂપાણિ તે સર્વે મહોદર કૃતાનિ ચ ।
ચેષ્ટિતાનિ સ્મરન્તો વૈ હૃષ્ટરોમાણ આભવન્ ॥ ૬॥

સિદ્ધિબુદ્ધિયુતં તં તે મૂષકં પુરતઃ સ્થિતમ્ ।
દૂર્વાદિભિઃ પૂજયન્તિ વિશેષેણ પ્રજાપતે ॥ ૭॥

ભાદ્રશુક્લચતુર્થીજસ્તત્ર મુખ્યો મહોત્સવઃ ।
વર્ષમધ્યે વૈ ભવતિ ભક્તા યાત્રાં પ્રકુર્વતે ॥ ૮॥

તતો મહોદરસ્યૈવ દર્શનેન હૃદીપ્સિતમ્ ।
લભતે માનવઃ સર્વં સ્મરણેન તથા વિભોઃ ॥ ૯॥

ક્ષેત્રે મરણતો દક્ષ બ્રહ્મભૂતો ભવેન્નરઃ ।
અષ્ટૌ વિનાયકાઃ પ્રોક્તાસ્તેષાં ક્ષેત્રાણિ સર્વદા ॥ ૧૦॥

બ્રહ્મભૂતમયાન્યેવ તેષુ સર્વે શિવાદયઃ ।
સંસ્થિતા ભક્તિકાર્યાર્થં જ્ઞાતવ્યં વિબુધૈઃ સદા ॥ ૧૧॥

ત્રૈલોક્યે શ્રેષ્ઠરૂપા યે શેષાદય ઉદાહૃતાઃ ।
તે સર્વે નિવસન્ત્યત્ર ક્ષેત્રેષ્વષ્ટસુ નિશ્ચિતમ્ ॥ ૧૨॥

તત્ર ગાણેશતીર્થં મહોદરસ્ય ચ હર્ષદમ્ ।
સ્નાનેનાત્રકૃતેનૈવ પુમાન્ સર્વાર્થસિદ્ધિભાક્ ॥ ૧૩॥

વિષ્ણ્વાદિષુ તથાઽન્યેષુ તીર્થેષુ ચ વિશેષતઃ ।
ગણેશક્ષેત્રગેષ્વેવ સ્નાનમાત્રેણ દેહિનામ્ ॥ ૧૪॥

તત્તત્પદપ્રદાનિ સ્યુસ્તેષામન્તે પ્રજાપતે ।
બ્રહ્મભૂતા ભવિષ્યન્તિ સ્વાનન્દે વાસકારિણઃ ॥ ૧૫॥

અન્યદેવસ્ય ભક્તા યે ક્ષેત્રે ગાણેશકે મૃતાઃ ।
તસ્ય દેવસ્ય લોકે તે ગમિષ્યન્તિ ન સંશયઃ ॥ ૧૬॥

મહાલયે ત્રયો દેવા લયં ગચ્છન્તિ ચેત્ પ્રભો ।
તદા તે નિજલોકે વૈ ગમિષ્યન્તિ સુખપ્રદે ॥ ૧૭॥

ક્ષેત્રે મરણસંસ્કારાદ્બ્રહ્મભૂતા ભવન્તિ ચ ।
અતો નરેણ તદ્ભક્ત્યા ગાણેશં સેવ્યમાદરાત્ ॥ ૧૮॥

યત્ર કુત્ર સ્થિતા ભક્તા યે ભજન્તિ મહોદરમ્ ।
તે સર્વે બ્રહ્મભૂતા વૈ જ્ઞાતવ્યાઃ પાવના નૃણામ્ ॥ ૧૯॥

કુર્વન્તિ યે શિવાદીનાં ભજનં જન્મજન્મસુ ।
તેન સંસ્કારયોગેન ગાણેશાસ્તે ભવન્તિ વૈ ॥ ૨૦॥

ગાણેશાન્ન પરં બ્રહ્મ કથિતં સર્વસમ્મતમ્ ।
અતો ગણેશભક્તા યે બ્રહ્મભૂતાશ્ચ તે મતાઃ ॥ ૨૧॥

ઇદં મહોદરાખ્યાનં કથિતં તે પ્રજાપતે ।
સર્વસિદ્ધિપ્રદં પૂર્ણં સમાસેન યથામતિ ॥ ૨૨॥

શ ૃણુયાદ્યો નરો ભત્તયા શ્રાવયેદ્વા પઠેદ્યદિ ।
અન્તે સ બ્રહ્મભૂતશ્ચ ભવિતા નાત્ર સંશયઃ ॥ ૨૩॥

અનેન ન સમં કિઞ્ચિત્ ત્રિષુ લોકેષુ વિદ્યતે ।
સર્વદં માનવાદીનાં બ્રહ્માદીનાં ચ યોગિનામ્ ॥ ૨૪॥

વ્રતાનિ વિધિવન્નાના કુરુતે માનવોત્તમઃ ।
અસ્ય શ્રવણમાત્રેણ તત્ ફલં લભતે પ્રભો ॥ ૨૫॥

નાનાતીર્થેષુ યઃ સ્નાયાત્તર્પયેદ્દેવતાદિકાન્ ।
યથાશાસ્ત્રં ફલં તસ્ય તદસ્ય શ્રવણાલ્લભેત્ ॥ ૨૬॥

(Page ખં. ૩ અ. ૫૧ પાન ૧૧૨)
ક્ષેત્રેષુ ભક્તિસંયુક્તો નરો વાસં કરોતિ યઃ ।
વિધિવદ્ધર્મશીલજ્ઞસ્તત્ ફલં શ્રવણાલ્લભેત્ ॥ ૨૭॥

યજ્ઞૈર્નાનાવિધૈર્દક્ષ દૃષ્ટ્વા દેવાન્ યથાર્થતઃ ।
યત્ફલં લભતે મર્ત્યસ્તદસ્ય શ્રવણાત્ ફલમ્ ॥ ૨૮॥

ઇષ્ટાપૂર્તાદિકં સર્વં યઃ કરોતિ નરોત્તમઃ ।
અસ્ય શ્રવણતઃ સદ્યસ્તત્ફલં લભતે પુમાન્ ॥ ૨૯॥

બહુનાઽત્ર કિમુક્તેન બ્રહ્મભૂયપ્રદં ભવેત્ ।
શ્રવણેન ન સન્દેહો ધર્મકામાર્થમોક્ષદમ્ ॥ ૩૦॥

પુત્રપૌત્રાદિકં સર્વં ધનં ધાન્યં વિશેષતઃ ।
રાજ્યમશ્વાદિકં સર્વં લભતે શ્રવણેન ચ ॥ ૩૧॥

મહોદરસ્ય માહાત્મ્યં ગૃહે સંલિખિતં ભવેત્ ।
ન તત્ર રાક્ષસાદિભ્યશ્ચોરાગ્ન્યાદ્યાદ્ભયં ભવેત્ ॥ ૩૨॥

ગ્રહરોગાદિકા પીડા પૂજનેન ચ નશ્યતિ ।
પુસ્તકસ્યાસ્ય ભો દક્ષ નાત્ર કાર્યા વિચારણા ॥ ૩૩॥

ઇચ્છન્તિ જન્તવો યદ્યદસ્ય શ્રવણકારકાઃ ।
તત્તન્ મહોદરઃ સુપ્રીતો દદાતિ પ્રતાપવાન્ ॥ ૩૪॥

વાચકં પરિતોષ્યૈવ લભતે તત્ક્ષણાત્ ફલમ્ ।
ગણેશસન્નિધાને ચ શ્રવણેન ન સંશયઃ ॥ ૩૫॥

પતિતા ઉદ્ધરિષ્યન્તિ શ્રવણેનાસ્ય નિશ્ચિતમ્ ।
કિં પુર્નભાવસંયુક્તા બ્રહ્મભૂતા ભવન્તિ ચેત્ ॥ ૩૬॥

નાનેન સદૃશં કુત્ર વર્તતે બ્રહ્મગોલકે ।
સાક્ષાદ્યોગપતિર્યત્ર વર્ણ્યતે સ મહોદરઃ ॥ ૩૭॥

ઇતિ તે કથિતં સર્વં સઙ્ક્ષેપેણ મયા પ્રભો ।
મહોદરસ્ય માહાત્મ્યં શ્રોતુમિચ્છસિ કિં પુનઃ ॥ ૩૮॥

સૂત ઉવાચ ।
એવમુક્ત્વા મહાયોગી મુદ્ગલો વિરરામ હ ।
તદેતત્ કથિતં સર્વં મયા તે નાત્ર સંશયઃ ॥ ૩૯॥

સર્વમાન્યં વિશેષેણ મતમાન્યં મહામતે ।
વેદાદીનાં તથા સારં જ્ઞાતવ્યં બ્રાહ્મણા ઇદમ્ ॥ ૪૦॥

નાનાશાસ્ત્રપુરાણાનિ મન્થયિત્વા મહામુનિઃ ।
વ્યાસઃ સઙ્ગ્રથયામાસ મહ્યં બ્રહ્મપ્રદં પ્રભુઃ ॥ ૪૧॥

ન ગણેશાત્ પરં બ્રહ્મ ન ગણેશાત્ પરં તપઃ ।
ન ગણેશાત્ પરં કર્મ જ્ઞાનં ન ગણપાત્પરમ્ ॥ ૪૨॥

ત્યક્ત્વા ગણેશમેકં યો નરઃ કર્મપરાયણઃ ।
બ્રહ્મજ્ઞાનાદિકં સર્વં સાધયેચ્ચેત્ સુનિષ્ફલમ્ ॥ ૪૩॥

સિદ્ધેઃ પતિં પરિત્યજ્ય સિદ્ધિમિચ્છતિ શાશ્વતીમ્ ।
ફલહીનઃ સ્વભાવેન નારકી જાયતે નરઃ ॥ ૪૪॥

બુદ્ધેઃ પતિં પરિત્યજ્ય સ્થિરબુદ્ધિં ય ઇચ્છતિ ।
ન યોગં લભતે સોઽપિ ભસ્મનિ પ્રહુતં યથા ॥ ૪૫॥

સર્વપૂજ્યોઽયમેકશ્ચ સર્વાદિઃ સર્વભાવનઃ ।
તં ભજધ્વં વિશેષેણ દ્વિજા વેદાદિસમ્મતમ્ ॥ ૪૬॥

કથિતં સર્વસારં તે મહોદરકથાનકમ્ ।
કિં શ્રોતુમિચ્છસિ પ્રાજ્ઞ વદ શૌનક તે નમઃ ॥ ૪૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
તૃતીયે ખણ્ડે મહોદરચરિતે શ્રવણફલવર્ણન નામૈકપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૩.૫૧
॥ ઇતિ તૃતીયઃ ખણ્ડઃ સમાપ્તઃ ॥

॥ ઇતિ શ્રીમુદ્ગલપુરાણે તૃતીયઃ ખણ્ડઃ સમાપ્તઃ ॥

Proofread by Yash Khasbage

*MudgalapurAna Khanda 3 Mahodaracharitam*
pdf was typeset on September 18, 2023

Please send corrections to *sanskrit@cheerful.com*